| चं. | | | । | | | | । | । | | | | । |
| ल. | | | । | । | | । | | | | । | । | । |
| रे. यो. | ४ | २ | ६ | ४ | १ | ६ | ४ | ३ | ४ | ४ | ३ | ७ |
| बि. यो. | ४ | ६ | २ | ४ | ७ | २ | ४ | ५ | ४ | ४ | ५ | १ |

## चन्द्राष्टक वर्गः

| रा. | मे. | वृ. | मि. | क. | सिं. | क. | तु. | वृ. | ध. | म. | कुं. | मी. |
|---|---|---|---|---|---|---|---|---|---|---|---|---|
| ग्र. | ल. | | | | | र.बृ. | बु.शु. | | | चं. | | म.श. |
| श. | | । | | । | । | | | | | । | | |
| बृ. | । | | । | । | । | । | | | । | | | । |
| मं. | । | । | | । | । | | | । | । | । | | |
| र. | । | | । | । | | | | । | | | । | । |
| शु. | । | | । | । | । | | | | । | । | । | |
| बु. | । | । | | । | । | | । | | । | । | । | |
| चं. | | | । | । | | | । | । | | । | | |
| ल. | | | । | | | । | | | | । | । | । |
| रे. यो. | ५ | ३ | ५ | ७ | ५ | २ | २ | ३ | ४ | ६ | ४ | ३ |
| बि. यो. | ३ | ५ | ३ | १ | ३ | ६ | ६ | ५ | ४ | २ | ४ | ५ |

## भौमाष्टक वर्गः

| रा. | मे. | वृ. | मि. | क. | सिं. | क. | तु. | वृ. | ध. | म. | कुं. | मी. |
|---|---|---|---|---|---|---|---|---|---|---|---|---|
| ग्र. | ल. | | | | | र.बृ. | बु.शु. | | | चं. | | मं.श. |
| श. | | | । | | | । | । | । | । | । | | । |
| बृ. | | | । | । | । | | | | | | । | |
| मं. | । | | । | | | । | । | | । | । | | । |
| र. | | | । | । | | | | । | | । | । | |
| शु. | | । | | | । | । | | | | | | । |
| बु. | | | | | । | | | | । | | । | । |
| चं. | | | । | | | | | । | | | | । |
| ल. | । | | । | | | । | | | | । | । | |
| रे. यो. | २ | १ | ६ | २ | ३ | ४ | २ | ३ | ३ | ४ | ४ | ५ |
| बि. यो. | ६ | ७ | २ | ६ | ५ | ४ | ६ | ५ | ५ | ४ | ४ | ३ |

## बुधाष्टक वर्गः

| रा. | मे. | वृ. | मि. | क. | सिं. | क. | तु. | वृ. | ध. | म. | कुं. | मी. |
|---|---|---|---|---|---|---|---|---|---|---|---|---|
| ग्र. | ल. | | | | | र.बृ. | बु.शु. | | | चं. | | मं.श. |
| श. | । | | । | | | । | । | । | । | । | | । |
| बृ. | । | | | । | । | | | | | | । | |
| मं. | । | | । | | | । | । | । | । | । | | । |
| र. | | । | | । | । | | | | | । | । | |
| शु. | | । | । | | । | | । | । | । | । | । | |
| बु. | | | । | । | । | । | । | | । | | । | । |
| चं. | । | | । | | । | | । | । | | | । | |
| ल. | । | । | | । | | । | | । | | । | । | |
| रे.यो. | ५ | ३ | ५ | ४ | ५ | ४ | ५ | ५ | ४ | ५ | ६ | ३ |
| बि.यो. | ३ | ५ | ३ | ४ | ३ | ४ | ३ | ३ | ४ | ३ | २ | ५ |

## गुरोरष्टक वर्गः

| रा. | मे. | वृ. | मि. | क. | सिं. | क. | तु. | वृ. | ध. | म. | कुं. | मी. |
|---|---|---|---|---|---|---|---|---|---|---|---|---|
| ग्र. | ल. | | | | | र.बृ. | बु.शु. | | | चं. | | मं.श. |
| श. | | । | | । | । | | | | | | । | |
| बृ. | । | | । | । | | । | । | । | । | | | । |
| मं. | । | | । | | | । | । | | । | । | | । |
| र. | । | । | । | । | | । | । | । | । | | | । |
| शु. | | | । | । | । | | | । | | | । | । |
| बु. | | | । | । | । | | । | । | | । | । | । |
| चं. | | । | | । | | । | | । | | | । | |
| ल. | । | । | | । | । | । | । | | । | । | । | |
| रे.यो. | ४ | ४ | ५ | ७ | ४ | ५ | ५ | ५ | ४ | ३ | ५ | ५ |
| बि.यो. | ४ | ४ | ३ | १ | ४ | ३ | ३ | ३ | ४ | ५ | ३ | ३ |

## शुक्राष्टक वर्गः

| रा. / ग्र. | मे. ल. | वृ. | मि. | क. | सिं. | क. र.बृ. | तु. बु.शु. | वृ. | ध. | म. चं. | कुं. | मी. मं.श. |
|---|---|---|---|---|---|---|---|---|---|---|---|---|
| श. | | । | । | । | | | । | । | । | । | | |
| बृ. | । | । | । | । | | | | | | । | | |
| मं. | | । | | । | । | | | । | | । | । | |
| र. | । | | | । | । | | | | | | | |
| शु. | | । | । | । | । | | । | । | । | । | । | |
| बु. | | | । | | । | | | | । | | । | । |
| चं. | । | । | | | । | । | | । | । | । | । | । |
| ल. | । | । | । | । | । | | | । | । | | । | |
| रे. यो. | ४ | ६ | ५ | ६ | ६ | १ | २ | ५ | ५ | ५ | ५ | २ |
| वि. यो. | ४ | २ | ३ | २ | २ | ७ | ६ | ३ | ३ | ३ | ३ | ६ |

## शनेरष्टक वर्गः

| रा. / ग्र. | मे. ल. | वृ. | मि. | क. | सिं. | क. र.बृ. | तु. बु.शु. | वृ. | ध. | म. चं. | कुं. | मी. मं.श. |
|---|---|---|---|---|---|---|---|---|---|---|---|---|
| श. | | । | | । | । | | | | | । | | |
| बृ. | | | | । | । | | | | | । | । | |
| मं. | | । | | । | । | | | | । | । | । | |
| र. | । | | । | । | | । | । | | । | | | । |
| शु. | | | | | । | । | | | | | | । |
| बु. | | । | । | । | । | । | | | | | | । |
| चं. | | | । | | | | | । | | | | । |
| ल. | । | | । | । | | । | | | | । | । | |
| रे. यो. | २ | ३ | ४ | ६ | ५ | ४ | १ | १ | २ | ४ | ३ | ४ |
| वि. यो. | ६ | ५ | ४ | २ | ३ | ४ | ७ | ७ | ६ | ४ | ५ | ४ |

**लग्नाष्टक वर्गः**

| रा. | मे. | वृ. | मि. | क. | सिं. | क. | तु. | वृ. | ध. | म. | कुं. | मी. |
|---|---|---|---|---|---|---|---|---|---|---|---|---|
| ग्र. | ल. | | | | | र.वृ. | बु.शु. | | | चं. | | मं.श. |
| श. | | । | । | | । | | | | । | । | | । |
| बृ. | | । | । | । | | । | । | | । | । | । | । |
| मं. | | । | | | । | | | | । | । | | । |
| र. | | | । | । | । | | | । | । | | । | |
| शु. | | । | । | | | | । | । | । | । | । | |
| बु. | | । | | । | । | | । | । | | । | | । |
| चं. | | | । | | | | । | । | । | | | । |
| ल. | | | । | | | । | | | | । | । | |
| रे. यो. | ० | ५ | ६ | ३ | ४ | २ | ४ | ४ | ६ | ६ | ४ | ५ |
| बि. यो. | ८ | ३ | २ | ५ | ४ | ६ | ४ | ४ | २ | २ | ४ | ३ |

इन चक्रों में ग्रन्थकार ने ग्रहों का क्रम शनि, बृहस्पति, मंगल, सूर्य, शुक्र, बुध, चन्द्रमा व लग्न के क्रम से अपनाया है। ग्रहाधिष्ठित राशि से चक्र बनाने पर सूर्यादि क्रम से तथा मेषादि राशि क्रम से बनाने से ग्रहों को इस प्रकार से रखने की प्रथा है। हम समझते हैं कि राशियां मेषादि क्रम से और ग्रहों को सूर्यादि क्रम से स्थापित करने में सुविधा होगी तथा ऐसा करने से व्यावहारिक हानि भी नहीं दिखती।

यह स्थिति रेखाष्टक वर्गादि के प्रसंग में तो ठीक होगी, किन्तु प्रस्ताराष्टवर्ग में नियमतः कक्ष्याक्रम से अर्थात् शनि बृहस्पति आदि क्रम से ही ग्रहों को स्थापित किया जाएगा। अतः पाठक चाहें तो प्रारम्भ से ही इस क्रम से अभ्यास कर सकते हैं। प्रत्येक परिस्थिति में यह ध्यातव्य है कि राशियां स्थापित किए जाने पर भी अष्टक वर्ग की रेखाओं की कुण्डली बनाते समय तत्तत् ग्रह की अधिष्ठित राशि से ही आगे भाव क्रम से गणना की जाएगी। जैसे पहले सूर्य का रेखाष्टक वर्ग चक्र बनाया गया है। जन्म लग्न मेष है तथा सूर्य कन्या राशि में छठे स्थान में स्थित है। सूर्य के अष्टक वर्ग में किस भाव को कितनी शुभ रेखाएं मिलीं? इसका निर्णय सूर्याधिष्ठित राशि से प्रथम (लग्न) भाव की कल्पना कर आगे लिखेंगे। यथा सूर्य की रेखा कुण्डली इस प्रकार बनाई जाएगी—

**वास्तविक उदाहरण :**

सूर्य रेखा कुण्डली



सूर्य की अधिष्ठित राशि से लग्नादि भावों की कल्पना की गई। तब जिस भाव में सूर्य के पूर्वोक्त अष्टक वर्ग चक्र में जितनी रेखाएं पड़ी थीं, उनकी व्यंजक संख्या उसी भाव में अंकित कर दी। यहां पर अंक रेखाओं की संख्या का द्योतक है। राशियों को अनेक आद्यक्षर से प्रदर्शित किया जा सकता है। किन्तु यह आवश्यक नहीं है। ऊपर सूर्याष्टक रेखा व चन्द्राष्टक रेखा आदि स्पष्ट अंकित होने पर यही समझा जाएगा कि यहां पर भावों की कल्पना तत्तद् ग्रहों की अधिष्ठित राशि से आगे की गई है। अतः राशि लिखना आवश्यक नहीं है। उपर्युक्त कुण्डली से यह निष्कर्ष निकला कि सूर्य के अष्टक वर्ग में लग्न में ६ रेखाएं व द्वितीय स्थान में ४ रेखाएं आदि हैं। रेखा संख्या को ८ में से घटानेपर किसी भी भाव की बिन्दु (अशुभ) संख्या जानी जा सकेगी। इसी पद्धति से शेष अष्टक वर्ग कुण्डलियां इस प्रकार बनेंगी—

चन्द्र रेखा कुण्डली



मंगल रेखा कुण्डली




बुध रेखा कुण्डली




गुरु रेखा कुण्डली




शुक्र रेखा कुण्डली




शनि रेखा कुण्डली




लग्न रेखा कुण्डली



**रेखा स्थापन विधि :**

**यस्मिन्राशौ खेचरो विद्यते य-**
**स्तस्माद् गण्या रेखिकाः प्राङ्निरुक्ताः ।**
**रेखादेयास्तत्रभेऽन्येषुदाया**
**देया रेखा शोभना दायकोऽसन् ।।१८।।**

अथेदानीं रेखास्थापनविधिं शालिन्याह—

यस्मिन्निति। यः खेचरो जन्मकाले यस्मिन् राशौ विद्यते, तस्माद्राशेः सकाशात् प्राङ्निरुक्ताः पूर्वोक्ता रेखा गण्या गणनीयाः । तत्र भे तस्मिन् राशौ रेखा देया। अन्येषु राशिषु दाया बिन्दवो देयाः। अत्र रेखा शोभना शुभफलप्रदा, दायको बिन्दुश्चासन् अशुभ इति।

जन्म समय में जो ग्रह जिस राशि में स्थित हो, उसी राशि के क्रम से बारह राशियों को रेखाष्टक वर्ग चक्र में लिखें।

ग्रहों को अपनी-अपनी अधिष्ठित राशियों के नीचे ही लिख लें। सूर्यादि ग्रहों की अधिष्ठित राशि से पूर्वोक्त रेखाप्रद स्थानों को जान कर उन स्थानों में रेखा का (।) चिह्न अंकित कर लेना चाहिए। खाली स्थानों में बिन्दु (०) लिख लेना चाहिए। तत्पश्चात् रेखाओं व बिन्दुओं का योग करें।

रेखाओं की अधिकता होने पर शुभफल व बिन्दुओं की अधिकता होने पर अशुभफल अधिक होगा। रेखा व बिन्दुओं की संख्या की समानता होने पर मध्यम अर्थात् शुभाशुभ मिश्रितफल जानना चाहिए।

इस विषय को पहले प्रत्यक्ष समझ चुके हैं। अब यहां ग्रन्थ के अनुरोध से कहा गया है। अतः पिष्टपेषण अनावश्यक है। यहां तक रेखाष्टक वर्ग बनाने का प्रकार समझाया गया है। इसका खूब अभ्यास कर लेना चाहिए। रेखाएं लिखकर उन्हें पुनः परीक्षित कर लेना चाहिए, क्योंकि कभी-कभी रेखास्थापन में त्रुटि रह सकती है। रेखाष्टक वर्ग की साधारण सी त्रुटि का परिणाम आगे बड़ी त्रुटि में परिवर्तित हो जाएगा तथा इससे मिलने वाले निष्कर्ष भी निश्चय से भ्रामक होंगे। अतः सावधानी से स्थिर चित्त होकर स्थापना करनी चाहिए। अब आगे भिन्नाष्टकादि वर्गों का निर्माण व उनका फल बताया जाएगा।

[इति श्रीमत्पण्डितमुकुन्ददैवज्ञविरचितेऽष्टकवर्गमहानिबन्धे पं० सुरेशमिश्र कृतायां मञ्जुलाक्षरायां हिन्दी व्याख्यायां प्रस्तावनाध्यायोऽवसितः।]

# २

# भिन्नाष्टकवर्गाध्यायः

**रेखायुक्त राशि का शुभाशुभ ज्ञान :**

यत्र ग्रहेन्द्रा नरजन्मकाले
चेत्तत्ररेखा शुभदा भवेत्सा।
फलं न शस्तं यदि तत्र बिन्दु-
स्तयोरभावे तु फलं समानम् ॥१॥

अथेदानीं रेखाबिन्दुयुक्तानां ग्रहाणां सदसत्फलमुपजात्याह—

यत्रेति। नरस्य पुरुषस्य जन्मन उत्पत्तेः कालः समयस्तस्मिन्, यत्र राशौ ग्रहेन्द्राः सूर्यादिग्रहा विद्यन्त इति शेषः। तत्र तस्मिन् राशौ रेखा भवेत् तदा सा शुभदा। यदि बिन्दुः स्यात् तदा शस्तं शुभं फलं न स्यात्। तयो रेखाबिन्द्वोरभावे तु समानं फलं ज्ञेयमिति शेषः।

मनुष्य के जन्म समय उसकी जन्म कुण्डली में जिस राशि को रेखाएं प्राप्त हों और उस स्थान पर ग्रह भी हों तो शुभफल होता है।

यदि किसी राशि में बिन्दु हों तथा रेखा न हों तो अशुभ-फल होता है। किसी राशि में रेखा व बिन्दु की संख्या समान हो और उसमें साथ ही ग्रह भी विद्यमान हो तो उसका मिश्रित (सम) फल होता है। यदि किसी स्थान पर कुछ भी न हो तो समफल (सामान्य) होता है।

इस प्रसंग में यह बात विशेष ध्यातव्य है कि रेखा शुभफल की द्योतक है और बिन्दु अशुभफल का द्योतक होता है।

यदि किसी स्थान में बिन्दु व रेखा की मात्रा (संख्या) समान अर्थात् ४-४ हों तो समान शुभाशुभफल समझना चाहिए। यदि किसी भाव में बिन्दु कम व रेखाएं अधिक हों तो शुभफल का अनुपात अधिक

होगा। इसी प्रकार विन्दु, रेखाओं की अपेक्षा अधिक हों तो अशुभफल की मात्रा अपेक्षाकृत बढ़ जाएगी। इस बात को प्रकट करने के लिए **वराहमिहिर** ने **'बिन्द्वधिके नैव शोभनं प्रायः'** में प्रायः शब्द का प्रयोग किया है।

**रेखा व बिन्दु का शोधन :**

**कला विशोध्या इह दायमध्या-**
**न्मध्यात्कलानां करणं विशोध्यम् ।**
**चेत्तत्र रेखोर्वरिता शुभा सा**
**दायावशेषं गदिता महापत् ॥२॥**

अथेदानीं रेखाबिन्दुशोधनमुपजात्याह—

कला इति। इह भिन्नाष्टक वर्गे दायमध्याद् बिन्दुमध्यात कला रेखा विशोध्याः। कलानां रेखाणां मध्यात् करणं बिन्दुः विशोध्यम्। चेत् तत्र रेखोर्वरिता अवशिष्टा तदा सा शुभा। चेद् दायावशेषं तदा महापत् महाविपत्तिः कष्टमिति यावत्। गदिता कथिता दैवज्ञैरिति शेषः।

इस भिन्नाष्टक वर्ग के प्रसंग में रेखा संख्या में से बिन्दु संख्या और बिन्दु संख्या में से रेखा संख्या घटाकर देखना चाहिए। यदि रेखाएं शेष बचें तो शुभफल होगा और बिन्दु बचने पर अशुभफल होगा। ऐसा ज्योतिषशास्त्र के मर्मज्ञों ने कहा है।

यहां पर पूर्वोक्त नियम को ही परिभाषित किया गया है। सरल प्रकार यही है। रेखाएं अधिक होने पर सदा शुभफल होता है। यहां पर रेखाओं व बिन्दुओं के संस्कार अर्थात् शोधन का सामान्य प्रकार बताया गया है। किन्तु इन्हें स्पष्ट करने के लिए और अधिक संस्कार आवश्यक है। यह विषय अगले श्लोकों में बताया जा रहा है।

**रेखा-बिन्दु के शोधन का स्पष्टीकरण :**

**रेखाभावे बिन्दवोऽष्टौ कलैका**
**षड्वाया द्विस्थानयोर्बैंवदायाः।**
**त्रिस्थानेषु स्तो द्विदायौ समानं**
**तुर्य्यस्थानेष्वेवमक्षोन्मितासु ॥३॥**

**रेखासु द्वेरेखिके षट्कलासु**
**वेदारेखाः सप्तरेखासु रेखाः।**
**शास्त्रैस्तुल्या रेखिका नागतुल्या**
**नो लुप्यन्ते शोधनं रेखिकाणाम् ॥४॥**

अधुना रेखाबिन्दुशोधस्फुटीकरणं शालिनीद्वयाभ्यामाह—

रेखाभाव इति। रेखास्विति च। रेखाभावे यत्र तत्राष्टौ बिन्दवः। यत्रैका रेखा तत्र षड् दाया बिन्दवः। द्विस्थानयोर्द्वयोः रेखयोः वेददायाः चत्वरो बिन्दवः। त्रिस्थानेषु द्विदायौ द्वौ बिन्दू। तुर्यस्थानेषु चतसृषु रेखासु समानं कुर्यादिति चत्वारो बिन्दवः। अर्थात् शून्यं फलं देयम्। अक्षोन्मितासु पञ्चसु रेखासु द्वे रेखिके। षट् कलासु षट्सु रेखासु वेदा रेखाश्च तिस्रो रेखाः। सिप्त रेखासु शास्त्रैस्तुल्याः षट्प्रमिता रेखाः स्युः। यत्र नागतुल्या अष्टसम्मिता रेखा भवन्ति तत्र रेखा नो लुप्यन्ते। तत्र बिन्दूनामभावो बोध्यः। एवं रेखिकाणां शोधनं भवति।

इन श्लोकों में रेखाओं व बिन्दुओं के शोधन का स्पष्टीकरण प्रकार बताया जा रहा है। शोधन के लिए इस प्रकार स्थापना करनी चाहिए—

(i) जिस स्थान में कोई रेखा न हो वहां ८ बिन्दु स्थापित किए जाएंगे।
(ii) जहां पर एक रेखा हो तो ६ बिन्दु होंगे।
(iii) जहां २ रेखाएं हों तो उसके नीचे ४ बिन्दु होंगे।
(iv) यदि ३ रेखाएं हों तो २ बिन्दु होंगे।
(v) यदि ४ रेखाएं हों तो समान बिन्दु होंगे।
(vi) यदि ५ रेखाएं हों तो उसके नीचे २ रेखाएं होंगी।
(vii) यदि ६ रेखाएं हों तो उसके नीचे ४ रेखाएं होंगी।
(viii) यदि ७ रेखाएं हों तो उसके नीचे ६ रेखाएं होंगी।
(ix) यदि ८ रेखाएं हों तो कोई बिन्दु नहीं होगा।

यहां पर भ्रमित होने की आवश्यकता नहीं है। श्लोकोक्त ढंग से ऊपर शोधन बताया गया है। अब हम इसे सरल प्रकार से समझते हैं। ध्यान रखिए कि रेखाओं व बिन्दुओं की एक स्थान पर अधिकतम संख्या ८-८ हैं। शोधन से तात्पर्य है कि किसी भाव का आनुपातिक शुभाशुभत्व अर्थात् रेखा या बिन्दुओं की अधिकता का

ज्ञान। यह स्पष्ट कर चुके हैं कि किसी भी स्थान की रेखा संख्या को ८ में से घटाने पर शेष उस स्थान की बिन्दु संख्या होगी। अब हमें प्रत्येक ग्रह की रेखाओं का शोधन करना है। एतदर्थ, किसी भी ग्रह की अष्टक वर्ग चक्र में कही गई रेखाओं के योग को तत्तद् राशियों के नीचे स्थापित कर लीजिए। इस रेखा योग को ८ में से घटाने पर बिन्दु संख्या आ जाएगी। अब रेखाओं के नीचे अलग-अलग राशियों की बिन्दु संख्या को भी लिख लीजिए।

अब रेखा या बिन्दु में से जो अधिक हो उसमें से कम को घटाइए। जो शेष बचेगा वह शोधित बिन्दु या शोधित रेखा होगी। यदि रेखाओं की संख्या अधिक हो तो घटाने पर शेष बचने वाली संख्या रेखा कहलाएगी। यदि बिन्दुओं की संख्या अधिक हो तो शेष संख्या बिन्दु कहलाएगी। इस विषय को हम अपने पूर्वोक्त उदाहरण के सूर्य रेखा वर्ग के सन्दर्भ से समझते हैं।

पिछले उदाहरण में सूर्य के भिन्नाष्टक वर्ग में मेष, कर्क, तुला, धनु व मकर राशि में चार रेखाएं होने के कारण बिन्दु भी चार-चार ही होंगे। अब इन्हें आपस में घटाने पर शेष ० बचेगा। अर्थात् सूर्य रेखा शोधन करने के उपरान्त इन राशियों में रेखा व बिन्दु का अभाव माना जाएगा। वृष राशि को दो रेखाएं मिलीं, अतः बिन्दु ६ हुए। अब बिन्दु (अधिक संख्या) में से रेखा (अल्प संख्या) को घटाया तो शेष ४ बिन्दु बचे। यही संख्या शुद्ध मानी जाएगी। इसी पद्धति से मिथुन व कन्या में ६-६ रेखाएं होने के कारण उनके नीचे शुद्ध रेखाएं ४-४ बचीं। सिंह की एक रेखा है, अतः उसके नीचे ६ शुद्ध बिन्दु स्थापित किए गए हैं। वृश्चिक और कुम्भ के नीचे ३-३ रेखाएं हैं, अतः इन्हें बिन्दु संख्या ५-५ में से घटाने पर शुद्ध बिन्दु २ माने गए हैं। मीन राशि को ७ रेखाएं प्राप्त थीं अतः ६ शुद्ध रेखाएं वहां स्थापित की गईं। इसी पद्धति से चन्द्रमा आदि ग्रहों का भी शोधन करना चाहिए।

ध्यान रखिए बिन्दु अधिक होने पर बिन्दु संख्या में से और रेखाएं अधिक हों तो उनमें से बिन्दु या रेखा संख्या को यथावसर घटाया जाएगा। इस प्रकार जो शेष बचे वे ही शुद्ध रेखाएं या बिन्दु होंगे।

उदाहरणार्थ, रेखा व बिन्दु का शोधन यहां दिया जा रहा है।

**उदाहरण :**

**सूर्य रेखा व बिन्दु का शोधन**

| राशि | मे. | वृ. | मि. | कर्क | सिं. | क. | तु. | वृ. | ध. | म. | कुं. | मी. |
|---|---|---|---|---|---|---|---|---|---|---|---|---|
| रेखायोग | ४ | २ | ६ | ४ | १ | ६ | ४ | ३ | ४ | ४ | ३ | ७ |
| बिन्दुयोग | ४ | ६ | २ | ४ | ७ | २ | ४ | ५ | ४ | ४ | ५ | १ |
| शुद्धरेखा | ० | — | ४ | ० | — | ४ | ० | — | ० | ० | — | ६ |
| शुद्धबिन्दु | ० | ४ | — | ० | ६ | — | ० | २ | ० | ० | २ | — |

इसी पद्धति से अन्य ग्रहों का शोधन करने पर निम्नलिखित परिणाम आए—

**चन्द्र रेखा बिन्दु शोधन**

| राशि | मे. | वृ. | मि. | कर्क | सिं. | क. | तु. | वृ. | ध. | म. | कुं. | मी. |
|---|---|---|---|---|---|---|---|---|---|---|---|---|
| शुद्धरेखा | २ | — | २ | ६ | २ | — | — | — | ० | ४ | ० | — |
| शुद्धबिन्दु | — | २ | — | — | — | ४ | ४ | २ | ० | — | ० | २ |

**मंगल रेखा बिन्दु शोधन**

| राशि | मे. | वृ. | मि. | कर्क | सिं. | क. | तु. | वृ. | ध. | म. | कुं. | मी. |
|---|---|---|---|---|---|---|---|---|---|---|---|---|
| शुद्धरेखा | — | — | ४ | — | — | ० | — | — | — | ० | ० | २ |
| शुद्धबिन्दु | ४ | ६ | — | ४ | २ | ० | ४ | २ | २ | ० | ० | — |

**बुध रेखा बिन्दु शोधन**

| राशि | मे. | वृ. | मि. | कर्क | सिं. | क. | तु. | वृ. | ध. | म. | कुं. | मी. |
|---|---|---|---|---|---|---|---|---|---|---|---|---|
| शुद्धरेखा | २ | — | २ | ० | २ | ० | २ | २ | ० | २ | ४ | — |
| शुद्धबिन्दु | — | २ | — | ० | — | ० | — | — | ० | — | — | २ |

**गुरु रेखा बिन्दु शोधन**

| राशि | मे. | वृ. | मि. | कर्क | सिं. | क. | तु. | वृ. | ध. | म. | कुं. | मी. |
|---|---|---|---|---|---|---|---|---|---|---|---|---|
| शुद्धरेखा | ० | ० | २ | ६ | ० | २ | २ | २ | ० | — | २ | २ |
| शुद्धबिन्दु | ० | ० | — | — | ० | — | — | — | ० | २ | — | — |

### शुक्र रेखा बिन्दु शोधन

| राशि | मे. | वृ. | मि. | कर्क | सिं. | क. | तु. | वृ. | ध. | म. | कुं. | मी. |
|---|---|---|---|---|---|---|---|---|---|---|---|---|
| शुद्धरेखा | ० | ४ | २ | ४ | ४ | — | — | २ | २ | २ | २ | — |
| शुद्धबिन्दु | ० | — | — | — | — | ६ | ४ | — | — | — | — | ४ |

### शनि रेखा बिन्दु शोधन

| राशि | मे. | वृ. | मि. | कर्क | सिं. | क. | तु. | वृ. | ध. | मं. | कं. | मी, |
|---|---|---|---|---|---|---|---|---|---|---|---|---|
| शुद्धरेखा | — | — | ० | ४ | २ | ० | — | — | — | ० | — | ० |
| शुद्धबिन्दु | ४ | २ | ० | — | — | ० | ६ | ६ | ४ | ० | २ | ० |

### लग्न रेखा बिन्दु शोधन

| राशि | मे. | वृ. | मि. | कर्क | सिं. | क. | तु. | वृ. | ध. | म. | कुं. | मी. |
|---|---|---|---|---|---|---|---|---|---|---|---|---|
| शुद्धरेखा | — | २ | ४ | — | ० | — | ० | ० | ४ | ४ | ० | २ |
| शुद्धबिन्दु | ८ | — | — | २ | ० | ४ | ० | ० | — | — | ० | — |

**शुद्ध रेखा-बिन्दु का फल :**

**रेखाष्टके पूर्णफलं प्रदिष्टं**
**पादोनमेवं रससंख्यया च।**
**रेखाचतुष्केण फलं दलं च**
**तथा तदर्द्धं युगलेन वेद्यम् ।।५।।**
**प्रजायते दुष्टफलं सदैवं**
**बिन्दुप्रभावेण समं फलं स्यात् ।**
**समानसंख्यं जनिभाद्विहङ्गा**
**दद्युः फलं चारवशेन तत्र ।।६।।**

अथाधुना शोधितरेखाबिन्दुफलमुपजातिद्वेनाह—

रेखाष्टक इति। प्रजायत इति च। रेखाष्टके अष्टासु रेखासु पूर्णफलं प्रदिष्टम्। पण्डितैरिति शेषः। एवं रससंख्यया षड्भी रेखाभिः पादोनं चतुर्थांशरहितं फलं भवेत्। रेखाचतुष्केणदलमर्धं फलम्। तथा युगलेन रेखाद्वयेन तदर्धं दलार्धमर्थाच्चतुर्थांश फलमिति। एवं बिन्दुप्रभावेण नित्यं दुष्टफलं प्रजायते। यदि समानसंख्यं रेखाबिन्द्वोः साम्यं तदा समं फलं भवति। तत्र

विहंगा ग्रहाः जनिभात् जन्मनि यो ग्रहो यस्मिन् राशौ तिष्ठति तस्मात् चारवशेन गोचरेण फलं स्वकीयं शुभाशुभरूपं दद्युरिति। तथा च बादरायणः—

'एकेन यः शुभः स्यात् षड्भिः स्थानैः स पापदो भवति।
यस्तु चतुर्भिः श्रेष्ठः सर्वफले कल्पनाप्येवम्॥
कष्ट श्रेष्ठे तुल्यसंख्ये फले चेत् स्यातां नाशः फलयोस्तत्रवाच्यः।
वाच्या पंक्तिर्योऽतिरिक्तस्तयोः स्यात् स्थाने स्थाने कल्पनेयं प्रदिष्टे।' इति।

यदि कहीं पर ८ शुद्ध रेखाएं हों तो पूर्ण शुभफल होता है। ६ रेखाएं होने पर त्रिपाद अर्थात् पौना (७५%) फल होता है। ४ रेखाएं होने पर आधा फल होता है। दो रेखाओं का चौथाई फल होता है। इसी अनुपात से बिन्दुओं से अशुभ फल होता है। यदि दोनों की संख्या समान हो, अर्थात् शुद्ध संख्या ० हो तो सम फल होता है। इस शुभ या अशुभ फल की प्राप्ति जन्मराशि से गोचर द्वारा जाननी चाहिए।

रेखा या बिन्दु का फल कब मिलेगा? इस विषय में ध्यान देना चाहिए कि जन्म समय ग्रह जिस राशि में हो, उस राशि से गोचर वशात् जब-जब रेखा युक्त स्थानों में आएगा तब तब उपर्युक्त माला में शुभ फल प्रदान करेगा। बिन्दु युक्त स्थानों में आने पर उक्त परिमाण में दुष्ट फल देगा। यहां यह ध्यान रखना चाहिए कि अष्टक वर्ग के प्रकरण में ग्रहों की अधिष्ठित राशि को लग्न मानकर चलना है। अतः राशियां वहां उस भाव की द्योतक हैं जिस भाव में वे ग्रह की अधिष्ठित राशि से पड़ती हों। यथा अपने इस उदाहरण में सूर्य कन्या राशि में है। अतः सूर्य का प्रथम भाव कन्या राशि में है। मिथुन, कन्या व मीन में रेखाएं (शुद्ध) हैं।

जब सूर्य गोचर से इन राशियों में आएगा तो रेखाओं के अनुपात से शुभ फल होगा। अथवा जन्म चन्द्र राशि (मकर) से ३, ६, ९ स्थानों में सूर्य के गोचर में रेखानुपात से शुभ फल होगा।

रेखाओं के विशेष फल को ग्रन्थकार ने **'मुक्ता वल्ली'** नामक ग्रन्थ के उद्धरण से बताया है।

यदि दो शुद्ध रेखाएं हों तो धन देने वाली और चार रेखाएं शुद्ध हों तो उन्नति, प्रगल्भता व बन्धु-बान्धवों की वृद्धि होती है।

छः रेखाएं शुद्ध होने पर विपुल प्रताप, यश का विस्तार और कांति होती है। यदि आठ रेखाएं शुद्ध हों तो अनेक गुणों से सम्पन्न राजशासन देती हैं। बिन्दुओं का फल **जातक चन्द्रिका** में इस प्रकार बताया गया है—

दो शुद्ध बिन्दु होने पर मृत्यु, चार शुद्ध बिन्दु होने पर पीड़ा, छः शुद्ध बिन्दु होने पर रोग व दरिद्रता और आठ बिन्दु होने पर मृत्यु होती है। यह फल गोचर वशात् तत्तद् ग्रह के तत्तद् भावों में संक्रमण करने पर समझना चाहिए।

**शुभाशुभ फल का विशेष विचार:**

**योवृद्धिगोऽङ्गविधुतः खचरः स्वभोच्च-**
**मित्रत्रिकोणभवनेऽष्टकवर्गजन्यम्।**
**यत्सत्फलं तदखिलं सममत्र दुष्टं**
**पीडर्क्षगस्य शुभमल्पमसत्प्रपुष्टम् ॥७॥**

अथेदानीमष्टकवर्गजफलस्य पुष्टापुष्टत्वपरिज्ञानं वसन्ततिलकेनाह----

य इति। यः खचरो ग्रहोऽङ्गविधुतो लग्नात् चन्द्राद् वा वृद्धिग उपचयभावगतः। स्वराशौ, उच्चराशौ, मूलत्रिकोणमित्रराश्योः तिष्ठति तस्य ग्रहस्य यदष्टकवर्गजन्यं सत्फलं शुभफलं तदखिलं भवति। अत्र दुष्टमशुभं फलं समं भवति। पीडर्क्षगस्योपचयेतरस्थानगतस्य तृतीयषष्ठदशमैकादशेभ्योऽन्य-भावेषु स्थितस्य शुभमल्पं, असदशुभं प्रपुष्टमधिकं भवतीति। तथा च देवकीर्तिः—

'लग्नादुपचयसंस्थश्चन्द्राद्वा स्वगृहमूलतुंगस्थः।
मित्रक्षेत्रगतो वा फलमतिशयितः शुभं दद्यात्॥
अपचयराशौ नीचे शत्रुक्षेत्रे च जन्म काले स्यात्।
यस्तु स दद्यात्पापं फलमतिशयितो यथाकालम्॥' इति

जन्म समय में जन्म लग्न से या चन्द्रमा से जो ग्रह वृद्धि अर्थात् उपचय स्थानों (३, ६, १०, ११) में हो तथा स्वराशि, स्वोच्च राशि, मित्रराशि या मूल त्रिकोण राशि में हो तो उसका अष्टक वर्ग जनित फल यदि शुभ हो तो पूर्ण होगा। यदि उक्त परिस्थितियों में अशुभ अष्टक वर्ग जन्य फल हो तो अशुभ फल की मात्रा मध्यम होती है। यदि कोई ग्रह जन्म लग्न या चन्द्र से पीड़ा स्थान अर्थात् अपचय (१, २, ४, ५,

७, ८, ६, १२) में स्थित हो तो उसका शुभफल **'अल्प'** होता है तथा अशुभ फल अधिक होता है।

इस प्रसंग में अष्टक वर्ग जन्य शुभाशुभ फल जानने के लिए जो नियम क्रमशः बताए गए हैं वे उत्तरोत्तर बलवान् हैं। सामान्यतः रेखायुक्त होना शुभफलकारी है। किन्तु रेखायुक्त ग्रह भी यदि उपचय स्थान में और स्वोच्चादि राशि में स्थित होगा तो उसका फल पूर्ण और तथावत् अपचय स्थानों में होने पर शुभ फल कम हो जाएगा। यही क्रम अशुभ फल के संदर्भ में भी अपनाना चाहिए। उपचय स्थानगत ग्रह का अशुभ फल मध्यम और अपचय स्थानगत ग्रह का अशुभ फल अधिक होता है।

उक्त शुभाशुभ फल कब प्राप्त होगा ? इस विषय में कहा जा चुका है कि अपने दशा परिपाक काल में अथवा गोचर काल में प्रतिफलित होगा। यही बात ऊपर संस्कृत टीका में दिए गए **देवकीर्ति** के उद्धरण में **'यथाकालम्'** शब्द से स्पष्ट की गई है।

**अशुभ फल की अधिकता :**

**किं सूतौ खगविजितो भगाभिभूतो**
**रश्म्यूनोऽधरगृहगोऽरिभेऽरिदृष्टः।**
**योह्रस्वो यदि वपुषा नभश्चरेन्द्रो**
**दद्यात्स त्वतिशयितः फलं च पापम् ॥८॥**

अथाधुनाऽशुभफलस्य पुष्टतां प्रहर्षिण्याह—

किमिति। किमथवा सूतौ जन्मनि यो नभश्चरेन्द्रो ग्रहः खगविजितः ग्रहयुद्धे पराजितः। भगाभिभूतो भगेन सूर्येणाऽस्तंगतः, रश्म्यूनो रश्मिभिः करैरूनोन्यूनः, अधरग्रहगतो नीचस्थानगतः, अरिभे शत्रुराशौ, अरिदृष्टो वपुषा बिम्बेन ह्रस्वो न्यूनः सोऽतिशयितोऽतीव पापमशुभं फलं दद्यात्। इति

जन्म के समय जो ग्रह युद्ध में पराजित, अस्तंगत, कम रश्मियों वाला, नीचराशि में स्थित, शत्रुस्थानगत, शत्रुग्रह से दृष्ट और अल्प बिम्ब वाला होगा, वह अष्टक वर्ग जन्य अशुभ फल को अधिक परिपुष्ट करके प्रदान करेगा।

भौमादि पांच ग्रहों (तारा ग्रहों) की यदि समान अंशकला हों तो परस्पर युद्ध होता है। युद्ध में विजयी ग्रह विपुल रश्मिवान्, उत्तर दिशा में स्थित (शुक्र दक्षिण में स्थित) तथा स्निग्ध होता है। इसके विपरीत ग्रह को पराजित माना जाएगा। उपर्युक्त लक्षण वाले ग्रहों का अशुभ फल यदि सिद्ध हो रहा हो तो उसकी मात्रा स्वाभाविक रूप से बढ़ जाएगी। इसके विपरीत यदि शुभ फल सिद्ध हो रहा हो तो वह भी निरुपयोगी अर्थात् अकिञ्चित्कर हो जाएगा। श्री वराह मिहिर ने इस बात को उपमा के माध्यम से समझाया है। उक्त परिस्थितियों में ग्रह इसी प्रकार शुभ फल करने में असमर्थ (कार्याक्षम) हो जाता है जैसे सर्प को मन्त्र से वश में करने पर वह असमर्थ हो जाता है।

**दद्याद् ग्रहेन्द्रः स्वफलं प्रपुष्टं**
**वीर्यान्वितोऽपुष्टफलं बलोनः।**
**चारे खगामीव समः शशाङ्कः**
**कष्टप्रदश्चेत्सहसा विहीनः॥६॥**

अथाधुना ग्रहाणां बलाबलवशेन फलस्य पुष्टापुष्टत्वं निरूपयन्नाह—

दद्यादिति। यो ग्रहेन्द्रो ग्रहो वीर्यान्वितो बलान्वितो जन्मकाले तदा चारे तदा गोचरे स्वफलं प्रपुष्टमधिकं दद्यात्। बलेन ऊनः हीनोऽपुष्टफलं न्यूनं फलं दद्यात्। खगामीव ग्रह इव शशाङ्कश्चन्द्रः समः सर्वोऽपि परिपूर्ण-मण्डल इत्यर्थः। चेद्यदि सहसा बलेन विहीनो रहितस्तदा कष्टफलप्रदः स्यादिति।
तथा च देवकीर्तिः—

'पुष्टमपुष्टं स्वफलं दद्यात् सबलो बलेन हीनश्च।
ग्रह इव सर्वश्चन्द्रः कष्टफलो बलविहीनश्चेत्॥'

जन्म समय में जो ग्रह बली हो तो गोचर में अपने अष्टक वर्ग जनित फल को और अधिक पुष्ट करके प्रदान करेगा।

इसी प्रकार निर्बल ग्रह अपने फल को अपुष्ट रूप से प्रदान करेगा। फल चाहे शुभ या अशुभ कैसा भी हो उसके पुष्टत्व और अपुष्टत्व का विवेक ग्रह के बलाबल के आधार पर करना चाहिए।

यदि पूर्ण मण्डल वाला चन्द्रमा भी बलहीन होगा तो अवश्य ही अन्य बलहीन ग्रहों की तरह अशुभ फल ही देगा।

**मेषादि राशियों की रेखाओं का फल :**

**मेषाद्येषु गृहेषु येष्विभमिता रेखा यदा स्युस्तदा**
**तद्भानां चयपुष्टिविक्रमकराश्चेत्षट्शरागोन्मितैः।**
**संयुक्तानि च भानि यानि सततं कल्याणदानि क्षमा-**
**युग्माग्नि प्रमितैर्युतानि च फलैः स्युः शोभनानीह नो ।।१०।।**

अथेदानीं मेषादिराशिगतरेखाफलं शार्दूलविक्रीडितेनाह—

मेषाद्येष्विति। यदा येषु मेषाद्येषु ग्रहेषु राशिषु इभामिता अष्टौ रेखाः स्युस्तदा तद्भानां तेषां राशीनां चयपुष्टिविक्रमकरा वृद्धिपुष्टि-बलकराः भवन्ति। यानि भवनानि षट्शरागोन्मितैः फलैः षड्भिः पंचभिः सप्तभिर्वा फलैः रेखाभिः संयुक्तानि सहितानि तानि सततं कल्याणदानि ज्ञेयानि। यानि भानि क्षमायुग्माग्निप्रमितैः फलैः युतानि तानीहास्मिन् प्रकरणे शोभनानि सत्फलप्रदानि नो स्युरिति।

जन्म के समय मेषादि राशियों में से जिन राशियों को आठ रेखाएं मिली हों, वे स्वाधिष्ठित भावों की पुष्टि तथा वृद्धि करने वाली होंगीं। पांच, छह और सात रेखाओं से युक्त राशियां शुभफल करने वाली होती हैं। एक, दो व तीन रेखाओं वाली राशियां शुभ फल देने वाली न होकर कष्टप्रद होती हैं।

इस प्रकरण में शुद्ध राशियों का ही ग्रहण है। सरल प्रकार यह है कि रेखारहित राशि सर्वथा अशुभ होती है। १, २, ३, रेखाओं से युक्त राशि अधम फल देने वाली होती है। ५, ६, ७, रेखाओं से युक्त राशियां मध्यम और ८ रेखाओं से युक्त राशियां उत्तम होती हैं। संस्कृत टीका में **जातकादेश** की साक्षी इस विषय में दी गई है। वहीं पर ग्रन्थान्तर के कथनानुसार रेखाओं का फल इस प्रकार बताया गया है— एक रेखा हानिप्रद, दो रेखाएं धन नाशक, तीन क्लेशप्रद, चार सम, पांच क्षेम व आरोग्यकारी, छह धनप्रद, सात आनन्दकारी एवं आठ सभी मनोरथों को पूर्ण करने वाली होती हैं।

पीछे श्लोक ६ की व्याख्या में बताए गए रेखाफल से यहां विरोध झलकता है। दोनों फल अलग ग्रन्थों के आधार पर लिखे गए हैं। फिर भी यह बात तर्क सम्मत है कि चार से अधिक रेखाएं शुभ व चार से कम अशुभ होती हैं। यही सामान्य सरणी अपनायी जानी चाहिए।

**मिश्रं फलं स्याछ्रुतितुल्यरेखिका-**
**योगे खभावा भ्यपवादरोगदाः ।**
**एकादिरेखाढ्यभगादिखौकसां**
**वक्ष्यामि भिन्नाष्टगणोद्भवं फलम् ॥११॥**

अथाधुना चतूरेखायुक्तराशिफलं रेखोनराशिफलं चेन्द्रवंशयाह—

मिश्रमिति । श्रुतितुल्य रेखिका योगे चतसृणां रेखाणां योगे सति मिश्रं शुभाशुभात्मकं फलं स्यात् । खभावा इति । ये भावा रेखया रहिताः ते भीतिनिन्दारोगकराः । ज्ञेया इति शेषः । एकादिरेखायुक्तानां सूर्यादि ग्रहाणां भिन्नाष्टगणोद्भवं भिन्नाष्टवर्गजन्यं यत्फलं तद् वक्ष्यामि कथयिष्यामि । अहमिति शेषः ।

जन्म समय जिन राशियों को चार रेखाएं मिली हों तो उनका फल शुभाशुभ मिश्रित समझना चाहिए।

जो राशियां रेखा रहित हों तो वे भय, अपवाद (बदनामी) तथा रोग बढ़ाने वाली होती हैं।

अब आगे एकादि रेखा से युक्त सूर्यादि ग्रहों के फल को कहूंगा।

यहां पर यह बात ध्यान में रखनी चाहिए कि बलवान् या निर्बल राशियां अपना यथोक्त फल अपने स्वामी ग्रह की दशा या गोचर में अथवा जो ग्रह उनमें हों उनके गोचर या दशा में अथवा जो ग्रह उन पर दृष्टि आदि कोई सम्बन्ध रख रहे हों, उनके गोचर या दशा में देंगी।

**रेखायुक्त ग्रहों का विस्तृत फल :**

**एकस्थानयुतो गतार्थधिषणं चित्तेऽर्थचिन्तां खगो**
**यानात्पातनमध्वनः प्रकुरुते भ्रंशं तथा कर्म्मणाम् ।**
**सिद्धिं साहसतो व्ययं ह्यपि सकृन्नीचैः कलिं वैरिभि-**
**र्द्वेषं दुःखमथो भयाटनमुखं नानाविधं चामयम् ॥१२॥**

अधुनैकरेखायुक्तग्रहफलमाह—

एकेति । यः खगो ग्रहः एकस्थानयुत एकेन स्थानेन फलेन युतः सहितः तदा अर्थेन धनेन धिषणया बुद्ध्या गतं रहितं प्रकुरुते । जातमिति शेषः । चित्त इति चित्ते हृदयेऽर्थचिन्तां धनचिन्तां यानाद् वाहनात् पातनं पतनं, अध्वनो मार्गात् भ्रंशं भ्रष्टं तथा साहसतः कर्मणां सिद्धिसकृद व्ययमपि, नीचैरधमैः

सह कलि, वैरिभिः शत्रुभिः सार्धं द्वेषं दुःखं भयानटमुखं भयभ्रमादि, नानाविधमनेकप्रकारं, आमयं रोगम् प्रकुरुते । तथा च सत्याचार्यः—

एका रेखा विगतधनधीमानसीवित्तचिन्तां
मार्गाद् भ्रंशं जनयति सदा पातनं वाहनाद् वा ।
लोकद्वेषो भवति च कलिर्वाङ्‌मयेनाधमानां,
शत्रुद्वेषं व्ययमपि सकृत्साहसात्कर्मसिद्धिः । इति ।

जन्म समय जो ग्रह केवल एक रेखा से युक्त हो तो वह धन और बुद्धि का नाश करता है। मन में सदा धन की चिन्ता बनी रहती है। वाहन से दुर्घटना, मार्ग भ्रष्ट होना तथा बड़ी हिम्मत से काम का बनना आदि फल होते हैं। तब नीच व्यक्तियों के साथ विवाद, व्यर्थ में एक बार धन का बड़ा अपव्यय, वैर में वृद्धि, दुःख, भय, वृथा भ्रमण और अनेक प्रकार के रोग होते हैं।

यहां यह समझना चाहिए कि एक रेखा से युक्त ग्रह का उक्त फल अपनी दशा या गोचर में होगा, अथवा एक रेखा से युक्त राशि में जब कोई ग्रह संक्रमण करेगा तब उक्त फल होगा। संस्कृत टीका में जातक पारिजातकार का जो कथन उद्धृत किया गया है वहां पर उनका तात्पर्य एक रेखा युक्त राशि में ग्रह के संक्रमण से ही है।

**दाहं शरीरे विविधं व्ययं भयं**
**रोगं प्रकुर्य्याद् भ्रमणं दृढं द्विकः ।**
**शून्याटवीभूमितलेऽबलाव्यथां**
**साक्षादघाख्यं प्रचुरं प्रवासकम् ॥१३॥**

अथाधुना रेखाद्वययुक्तग्रहफलमिन्द्रवंशयाह—

दाहमिति । द्विको रेखाद्वययुक्तो ग्रहः शरीरे दाहं विविधं बहुविधं व्ययं, भयं, रोगं मान्द्यं, शून्याटवीभूमितले, निर्जनवने दृढं तीव्रं भ्रमणं, अबलाव्यथां स्त्रीकष्टं, साक्षात् प्रत्यक्षं, अघाख्यं पापसंज्ञं, प्रचुरं बहु, प्रवासकं विदेशवासं प्रकुर्यात् । तथा च सत्यः—

'रेखाद्वयं वपुष एव करोति दाहं, स्त्रीदुःखतां विविधरोगभयं च साक्षात् ।
पापं व्ययं विविधमेव बहुप्रवासं शून्याटवी क्षितितले भ्रमणं-सुतीव्रम् ।'

यदि दो रेखाओं से युक्त ग्रह हो तो शरीर में दाह (जलन), अनेक प्रकार से धन का अपव्यय, भय, रोग, निर्जन स्थानों में भ्रमण,

स्त्रीपक्ष से कष्ट, प्रत्यक्ष पाप कर्म में लगना और घर से बाहर रहना आदि फल होते हैं।

**दुःशासिता वित्तहृतिं तनूहृति—**
**मग्नेर्भयं दुश्चरितान्नृपाद्भयम्।**
**यानक्षतिं कुत्सितभोजनाद्भयं**
**कुर्यात्त्रिको व्याकुलमानसं नरम् ॥१४॥**

अथेदानीं रेखात्रययुक्तग्रहफलमिन्द्रवंशयाह—

दुःशासितेति। यदि जन्मनि त्रिको रेखात्रययुक्तो ग्रहश्चेत्तदा दुःशासिता दुष्टशासकोऽतएव वित्तहृतिं धनापहरणं तनूहृतिं शरीरदण्डं, अग्नेर्भयं दुश्चरित्राद् व्यभिचारादितो नृपाद्राज्ञो भयं, यानक्षतिं वाहनहानिं, कुत्सितभोजनात् कदन्नात्, भयं व्याकुलमानसं व्याकुलहृदयं, नरं कुर्यात्। तथा च सत्याचार्यः—

रेखात्रयं यदि भवेद् गणितेऽष्टवर्गे,
दुश्चरित्रा नृपतिभीति कुभोजनाद्यैः।
दुःशासिना धनहतिर्वपुषो हतिर्वा,
वह्नेर्भयं भवति वाहनहानिरेव। इति

यदि ग्रह तीन रेखाओं से युक्त हो तो अग्नि से भय, दुष्ट शासक से भय अर्थात् धन हानि या शरीर हानि, दुश्चरित्र के कारण राजभय, वाहन की हानि, दुष्ट भोजन से कष्ट और चित्त की व्याकुलता जैसे फल होते हैं।

**रेखाचतुष्टययुतो द्युचरः प्रकुर्य्याद्**
**दौर्भाग्यमग्र्यमथ संहनने कृशत्वम्।**
**पीडां तनौ प्रचुरकम्पशुचं प्रघातं**
**प्राज्यं करोति सुजनैः सह विग्रहाख्यम् ॥१५॥**

अथेदानीं रेखाचतुष्टययुक्तग्रहफलं वसन्ततिलकेनाह—

रेखेति। रेखा चतुष्टययुतः चतुर्भी रेखाभिर्युतो द्युचरो ग्रहोऽग्र्यम् प्रधानमधिकं वा दौर्भाग्यं दुष्टभाग्यं प्रकुर्यात्। संहनन इति। संहनने शरीरे कृशत्वं दुर्बलतां तनौ शरीरे पीडां व्यथां, प्रचुरं बहुकम्पं कम्पनं शुचं शोकः प्राज्यं बहु प्रघातमाघातं सुजनैः सज्जनैः सह विग्रहाख्यं कलिं करोति। तथा च सत्याचार्यः—

'बहुप्रघातं बहुशोककम्पं देहे कृशत्वं च शरीरपीडाम्।
दौर्भाग्यमग्र्यम् सुजनैः कलिं चेदुत्पादयेच्च रेखाचतुष्टयम् ॥' इति

जन्म समय यदि ग्रह चार रेखाओं से युक्त हो तो दुर्भाग्य-शीलता, शरीर में निर्बलता और कष्ट, शरीर में कम्पन का बढ़ना, शोक और प्रहार एवं अच्छे लोगों से कलह, ऐसे फल होते हैं।

वैद्यनाथ के मत से चार रेखाओं का फल लाभ और हानि, सुख और दुःख मिश्रित होता है जैसा कि ऊपर दिए गए उद्धरण से स्पष्ट है।

**रेखापञ्चयुतः सुशोभनं च**
**कुर्य्यात्कार्य्यविवाहवाहनानि ।**
**ताम्रस्वर्णनिकेतमानधान्य-**
**सम्प्राप्तिं तुरगादिलाभमेवम् ॥१६॥**

अथाधुना पञ्चरेखायुक्तग्रहफलं त्रिष्टुब्जात्याह—

रेखापञ्चयुतः पञ्चभिः फलैर्युतो ग्रह इति शेषः। सुशोभनमतीवकल्याणं करोति। कार्यं सत्कार्य, विवाहः पाणिपीडनं, वाहनं, ताम्रं धातुः, स्वर्ण, निकेतं गृहं, मानं, धान्यं तेषां सम्प्राप्तिं लाभं कुर्यात्। एवं तुरगादीनामश्वादीनां लाभं प्राप्ति कुर्यात्। तथा च सत्याचार्यः—

'रेखापंचकमतीव शोभनं कार्यवाहनविवाहकृन्नृणाम्।
मानधान्यधनगेहकारकं हेमताम्रहयलाभकृद् भवेत् ॥'

जन्म समय यदि कोई ग्रह पांच रेखाओं से युक्त हो तो अत्यन्त शुभ होता है। शुभकार्य करवाने वाला, विवाह का सुख देने वाला, वाहन, तांबा, सोना, धान्य एवं सम्मान की प्राप्ति कराने वाला और घोड़े आदि वाहन देने वाला होता है।

वैद्यनाथ ने इस विषय में विशेष यह कहा है कि पांच रेखाएं होने पर अच्छे वस्त्र का लाभ, पुत्र का अच्छा लालन-पालन, सज्जनों की संगति, विद्या व धन का लाभ होता है।

**षड्रेखिको युद्धजितं च सज्जन-**
**दानार्पितानामपि नव्यवाससाम्।**
**लाभं समज्ञां बहुलां च सम्पदं**
**रूपं सुशीलं बलवाहनानि च ॥१७॥**

अथाधुना षड्रेखायुक्तग्रहफलमिन्द्रवंशयाह—

षडिति । षड्रेखिकः षड्भी रेखाभिर्युतः । युद्धजितं युद्धे जितं जयशीलं, मज्जनं स्नानं, दानं त्यागः, तयोरर्पितानां दत्तानां, अभिनववाससां नूतनवस्त्राणां लाभं, समज्ञां कीर्ति, बहुलां प्रचुरां, सम्पदं सम्पत्तिं, रूपं सौन्दर्यं, सुशीलं सुष्ठुस्वभावं, बलं सामर्थ्यं, वाहनानि अश्वादीनि कुर्यादिति शेषः । अत्र श्रीमत्याचार्यः—

'अभिनववसनाप्ति स्नानदानार्पितानां जनयति बहुसम्पद्रेखषट्कं नराणाम् ।' इति

यदि ग्रह छः रेखाओं से युक्त हो तो युद्ध में विजय, स्नान दानादि से पूजित होकर सद्वस्त्रों का लाभ, कीर्ति, बहुत सम्पत्ति, रूप वृद्धि, शील, बल एवं वाहनों की प्राप्ति होती है ।

**सप्तावरेखो विविधार्थमङ्गिनां**
**सेनाहयप्राभृतवित्तशोभनम् ।**
**कुर्याद्विहङ्गोऽथभुजङ्गमप्रम-**
**रेखायुतः सङ्गरवैरिनाशनम् ॥१८॥**
**शातं कुटुम्बात्किमु साहसाद्वा**
**सङ्गाद् युवत्याः कनकाव्यजानाम् ।**
**लाभं भुवः सप्तगुणाभिराम-**
**राजप्रतापं रजतांशुकाप्तिम् ॥१९॥**

अथाधुना सप्ताष्टकरेखायुतग्रहफलमिन्द्रवंशाद्वयेनाह—

सप्ताव रेख इति । शातमिति च । सप्तभिः सप्तभिः रेखाभिः सहितः अर्थात् सप्तरेखावान् ग्रहः । अंगिनां मनुष्याणां विविधार्थं अनेकप्रकारं धनं, सेना, हयोऽश्वः, प्राभृतं प्रदेशनं, वित्तं धनं, शोभनं मंगलं, एतानि सर्वाणि वस्तूनि कुर्यात् । यथाह सत्यः—

'विदधाति विविधार्थं रेखिकाः सप्त पुंसाम् ।' इति

अथ शब्दोऽनन्तर वाची । भुजंगप्रमरेखायुतोऽष्टभीरेखाभिर्युतो ग्रहः, संगरे युद्धे, वैरिणां नाशनं कुर्यात् । किमु अथवा, कुटुम्बात्, साहसात्, युवत्याः, संगाद्वा शातं सुखं स्यात् । कनकं स्वर्णं, अविर्मेषः, अजा छागः, एतेषां सर्वेषां वस्तूनां, लाभं भुवो भूमेर्लाभं, सप्तभिः गुणैः राजगुणैरभिरामं मनोहरं, राजप्रतापं राज्ञां तेजः, रजतं रौप्यं, अंशुकं वस्त्रम्, तयोराप्तिं कुर्यात् ।

**यदि ग्रह सात रेखाओं से युक्त हो तो अनेक प्रकार से धन की प्राप्ति और घोड़े आदि वाहनों का सुख मिलता है । तब मित्रों द्वारा**

खूब भेंट मिलती है और सेना वृद्धि[अथवा सेना में उच्च पद, धन तथा कल्याण की प्राप्ति होती है।

यदि ग्रह की आठ रेखाएं हों तो युद्ध में शत्रुओं का नाश, कुटुम्ब में सुख, साहस में वृद्धि, स्त्री से सुख होता है। सोना, भेड़-बकरी और भूमि का लाभ होता है। राजपद की प्राप्ति होकर राज्य के सातों अंगों का विस्तार होता है। अर्थात् स्वामी, मंत्री, मित्र, खजाना, प्रजा, दुर्ग एवं सेना का खब विस्तार होता है। राजा की प्रताप-वृद्धि होती है और चांदी व शुभ्र वस्त्रों का लाभ होता है।

**एकादिरेखात इह क्रमेण**
**कष्टं स्वहानिर्व्यसनं च मध्यम्।**
**क्षेमं च नित्यं द्रविणस्य लाभ-**
**स्त्वत्यन्तहर्षः सकला च सम्पत् ॥२०॥**

अथाधुनैकादिरेखाजन्यफलमिन्द्रवज्रयाह—

एकेति। इहास्मिन् प्रकरणे कष्टं दुःखं, स्वहानिर्धननाशः, व्यसनमापत्, मध्यमं, समं क्षेमं कुशलं, नित्यं सर्वदा द्रविणस्य धनस्य, लाभः अत्यन्तहर्षोऽत्यानन्दः सकला सम्पूर्णा सम्पद् ऐश्वर्यं, एकादिरेखातः क्रमेण एतत्समस्तं फलं ज्ञेयं बुधैरिति शेषः।

यहां एक से आठ रेखाओं तक का फल एक स्थान पर ही संक्षेप में बताया गया है। यदि एक रेखा हो तो कष्ट, दो रेखाओं से धन-हानि, तीन रेखाओं से विपत्ति, चार रेखाओं से मध्यम फल, पांच रेखाओं से कल्याण, छह रेखाओं से नित्य धन-लाभ, सात रेखाओं से अत्यन्त हर्ष व आठ रेखाओं से समस्त सम्पत्तियां मिलती हैं।

**पञ्चादिरेखास्थितभाश्रितो निज-**
**वर्गे विहङ्गः सततं शुभप्रदः।**
**व्यत्यासतश्चेद्विफलप्रदो मतः**
**शून्ये फले गोचरतः प्रमादवान् ॥२१॥**

अथेदानीं पञ्चादिरेखायुक्तग्रहफलमिन्द्रवंशयाह—

पञ्चेति। पंचादिभी रेखाभिः स्थितं सहितं यद्भं तस्मिन्नाश्रितः सन् यो विहंगो ग्रहो निजवर्गे स्वगृहादिवर्गे तिष्ठति स सततं शुभप्रदः स्यात्। चेद्यदि

व्यत्यासतो वैपरीत्यात् विफलप्रदो ज्ञेयः फलरहितो मतः। गोचरतो गोचरवशेन, शून्ये फले फलाभावे प्रमादवान् भवति। जातक इति शेषः।

पांच शुद्ध रेखाओं से युक्त किसी राशि में यदि ग्रह स्थित हो और साथ ही स्व वर्ग, मित्र के वर्ग या अपने उच्च के वर्ग (सप्त वर्ग) में स्थित हो तो सदा शुभ फलदायक होता है।

यदि इस कथित प्रकार से विपरीत अर्थात् स्वादि वर्ग में स्थित न हो और पांच से अल्प रेखाओं से युक्त राशि में स्थित हो तो फल रहित अर्थात् अपने गोचरादि काल में विफल होता है।

यदि रेखा रहित राशि में कोई ग्रह स्थित हो तो असावधानी व प्रमाद जैसे फल उस ग्रह की दशा या गोचर में होते हैं।

**ये स्वर्क्षतुङ्गर्क्षसुहृद्गणस्थिताः**
**केन्द्रादिवीर्य्यैरपि संयुतास्तथा।**
**यद्यल्परेखासहिता विहङ्गमा-**
**स्तेऽनूनका नेष्टफलप्रदा मताः ॥२२॥**

अथेदानीं स्वर्क्षादिगतानामल्परेखायुतानां ग्रहाणां फलमनिष्टमाह —

य इति। ये विहंगमाः ग्रहाः, स्वर्क्षे स्वराशौ, तुङ्गर्क्षे स्वोच्चराशौ, सुहृद्गणे मित्रवर्गे, स्थिताः समाश्रिताः तथा केन्द्रादि वीर्यैः केन्द्रादिबलैः अपि संयुताः, यदि अल्परेखासहिता न्यूनरेखाभिर्युक्ता स्तेऽनूनकाः सम्पूर्णा, नेष्टफलप्रदा अशुभफलप्रदा मता ज्ञेया बुधैरिति शेषः।

जन्म समय जो ग्रह अपनी राशि, अपनी उच्च राशि, मित्रादि के वर्ग में स्थित होकर केन्द्रादि बल से युक्त होकर भी कम रेखा वाली राशि में स्थित होगा तो अशुभ फल देने वाला होता है।

पिछले श्लोक में भी बताया गया है कि मित्रादिवर्ग में स्थित ग्रह बली होकर यदि पांच या अधिक रेखायुक्त राशि में स्थित हो तो नित्य शुभ फलदायक होता है। यदि उक्त स्थितियों में रेखा रहित या कम रेखा वाली राशि में स्थित हो तो अशुभ फलदायक होगा। अष्टक वर्ग के महत्त्व को प्रदर्शित करने वाला नियम सामान्यतः ध्यान में नहीं रखा जाता तथा फलादेश की प्रमाणिकता में शिथिलता देखी जाती है। आशय यह है कि अष्टक वर्ग के बल से प्राप्त बल ही वास्तविक व लक्ष्य

सिद्धि कराने वाला बल है। अन्यथा बली ग्रह भी अष्टक वर्ग की दृष्टि से निर्बल होने पर अशुभ फलकारक ही माना जाएगा।

श्लोकोक्त केन्द्रादि बल को जानने के लिए यह ध्यातव्य है कि केन्द्र, पणफर व आपोक्लिम भावों के ये तीन प्रकार से विभाग किए गए हैं। अर्थात् केन्द्र स्थान चार हैं (१, ४, ७, १०)। पणफर स्थान केन्द्र स्थानों से अगले अर्थात् (२, ५, ८, ११) होते हैं। पणफर से अगले-भाव आपोक्लिम (३, ६, ९, १२) होते हैं। यदि कोई ग्रह केन्द्र में स्थित हो तो उसका केन्द्रादि बल ६० कला अर्थात् १ अंश होता है। पणफर स्थानों में स्थित ग्रहों का केन्द्रादि बल ३० कला होता है। इसी अनुपात से आपोक्लिम स्थानों में स्थित ग्रहों का १५ कला बल होता है।

**ये प्रान्त्यषष्ठाष्टमभावसंस्थिता**
**व्योमाटना ये रिपुनीचभांशगाः।**
**युक्ता यदा चेदधिकैः फलाभिधै-**
**स्ते स्युः समस्ताः सततं शुभप्रदाः॥२३॥**

अथेदानीं दुष्टस्थानगानामधिकरेखायुक्तानां ग्रहाणां फलमिन्द्रवंशयाह—

य इति। ये व्योमाटना ग्रहाः प्रान्त्ये द्वादशे, षष्ठे, अष्टमे संस्थिता आश्रिताः। ये ग्रहाः शत्रुराशौ, शत्रुनवांशे, नीचराशौ, नीचनवांशे वा संस्थिताः सन्तः चेद्यदि अधिकैर्बहुभिर्फलैः रेखाभिर्युक्ताः ते समस्ताः सर्वे, सततं नित्यं शुभप्रदाः शुभफलदायकाः स्युः।

जो ग्रह जन्म समय में दुष्ट स्थानों (६, ८, १२) में स्थित हों तथा नीच राशि, शत्रु राशि, शुभ या नवांश भी क्यों न हों किन्तु अधिक रेखाओं से युक्त राशियों में हों तो सदा शुभ फलदायक होते हैं।

आशय यह है कि जो ग्रह अष्टक वर्ग से शुभ हो तथा अन्य प्रकार से अशुभ भी क्यों न हो तो अष्टक वर्ग जनित शुभत्व उसके सारे अशुभ-फलदातृत्व का नाश करेगा। यही प्रकार अशुभफल के संदर्भ में भी अपनाया जाएगा।

**बली ग्रह की अधिक बलवत्ता—**

**स्वर्क्षतुङ्गचितिभावगतस्य**
**पण्डितैः समुदितं फलमेतत्।**

**वर्त्मनैव हि पुरा कथितेन**
**शोभनो यदि निजाष्टकवर्गः ॥२४॥**
**द्विगुणानि फलानि खेचर**
**इह दद्यात्परथा तदा न चेत्।**
**इति मूर्त्तिमुखे भगप्रमे**
**भवने स्वस्वपदे दशाफलम् ॥२५॥**

अथेदानीं स्वोच्चादिगानां ग्रहाणां रेखावशेन द्विगुणफलप्रदत्वं स्वागतया वियोगिन्या चाह—

स्वर्क्षेति । द्विगुणानीति च । यो ग्रहः स्वराशिगतः स्वोच्चराशिगः चिति-भावगतः, अर्थादुपचयस्थानस्थितो वा तस्य गतस्फलं, पश्चार्धे समुदितं कथितम्। पुरा प्राक् कथितेन मार्गेण, यो खेचरो निजाष्टवर्गे शोभनः शुभः, अर्थात् पञ्चप्रभृतिरेखाभिर्युक्तः तदा द्विगुणानि फलानि दद्यात् । चेद्यदि परथा अन्यथा, तदा द्विगुणफलानि नयच्छेत् । इत्येवं मूर्तिमुखे लग्नादौ, भगप्रमे भवने द्वादशस्थाने, स्वस्वपदे स्वस्वस्थाने, दशायाः विंशोत्तरीमुखायाः फलं ज्ञेयम् । तदुक्तं ब्रह्मयामले—

फलानि द्विगुणान्यत्र दद्युः खेटा न चान्यथा।
एवं लग्नमूर्त्यादि स्वे स्वे स्थाने दशाफलम् ॥' इति
अत्र स्वागता वियोगिनी च वृत्तद्वयम् ।

यदि ग्रह स्वराशि, स्वोच्च राशि अथवा उपचय स्थानों में स्थित हो और साथ ही पांच से अधिक रेखायें उसे अपने अष्टक वर्ग में मिली हों तो दुगुना फल देता है।

यदि ग्रह उक्त प्रकार से स्थित न हो तो शुभ फलदायक नहीं होगा। इसी प्रकार लग्नादि बारह भागों में से स्वोच्चादिगत व अधिक रेखायुक्त ग्रह का जो स्थान होता है, उस स्थान की वृद्धि ग्रह की विंशोत्तरी आदि दशा में होगी।

**रेखारहित शनि का फल :**

**भगादिखेटाष्टगणेषु भास्करि-**
**र्यदा प्रयातोऽमरवर्त्ममन्दिरम् ।**
**करोत्यतावामयवैरिसाध्वसा-**
**कुलानि तातादिकभावजन्मनाम् ॥२६॥**

अथेदानीं रेखोनराशिगतशनिफलं वंशस्थेनाह्—

भगादीति। यदा भास्करस्य सूर्यस्य गोत्रापत्यं भास्करिः शनिः, भगादि-खेटाष्टगणेषु सूर्याद्यष्टकवर्गेषु, अमरवर्त्ममन्दिरं रेखारहितगृहं, प्रयातः प्राप्तस्तदा पित्रादिकभावसम्भवानां प्राणिनामामयाः रोगाः, वैरिणः शत्रवः, तेभ्यः साध्वसानि भयानि, आकुलानि व्यस्तानि, करोति इति।

सूर्यादि ग्रहों के अष्टक वर्गों में जिस राशि को एक रेखा भी न मिली हो, उस राशि में गोचर से जब शनि का संक्रमण हो तो उस भाव से विचारणीय सम्बन्धियों तथा पदार्थों को रोग, शोक, भय या व्याकुलता होती है।

**सूर्य की एकादि रेखाओं का फल :**

**रेखास्थोऽरुणकिरणः कुलीनयुक्त-**
**माद्यस्थस्तुरगमतङ्गजैरुपेतम् ।**
**कान्ताढ्यं सखिसहितं प्रगल्भभावं**
**रोगाख्यैर्विरहितमङ्गिनं प्रकुर्यात् ॥२७॥**

अथाधुनैकरेखायुक्तरविफलं प्रहर्षिण्याह'—

रेखास्थ इति। यदि अरुणकिरणः सूर्यः आद्यस्थो रेखास्थः अर्थादेक-रेखया युक्त इत्यर्थः। तदा कुलीनैः सज्जनैर्युक्तं सहितं, तुरगैरश्वैः, मतगंजैर्हस्तिभिः, उपेतं युक्तं, कान्तया स्त्रिया, आढ्यं युक्तं, सखिभिः मित्रैः सहितं, प्रगल्भः प्रतिभायुक्तं भावः शीलं यस्य तथा तम् रोगाख्यैः रोगैः विरहितं अंगिनं प्राणिनं प्रकुर्यात्। प्रहर्षिणी वृत्तम्। तथा च वृद्धयवनः—

'रेखास्थितस्तीक्ष्णकरप्रगल्भं करोति मर्त्यं गजवाजियुक्तम्।
मित्रांगना साधुजनप्रयुक्तं स्थानाद्यके रोगविवर्जितं च॥' इति

यदि जन्म के समय सूर्य एक रेखा से युक्त हो तो मनुष्य हाथी, घोड़े, मित्र, स्त्री आदि से युक्त होता है। उक्त स्थिति में प्राणी सज्जनों की संगति में रहकर समस्त रोगों से रहित रहेगा।

उक्त अर्थ की पुष्टि वृद्धयवन द्वारा की गई है।

**प्रद्योतनो भूमिपतेरभीष्टं**
**यातो द्वितीये जितवैरिपक्षम्।**
**विद्यारतं शान्तहृदं प्रभूत-**
**वित्तं प्रतापं विपुलं प्रकुर्यात् ॥२८॥**

अथ साम्प्रतं रेखाद्वययुक्तसूर्यफलमिन्द्रवज्रयाह'—

प्रद्योतन इति। यदि प्रद्योतनः सूर्यः द्वितीये रेखाद्वये यातः प्राप्तः, तदा भूमिपते राज्ञोऽभीष्टं प्रियं, जितो वैरिणां शत्रूणां पक्षो येन तथा तम्। विद्यासु निरतं लीनं, शान्तहृदं शान्तचित्तं, प्रभूतवित्तं बहुधनं, विपुलं विशालं, प्रतापं प्रभावं प्रकुर्यात्। अत्र वृद्धयवनः—

द्वितीयसंस्थः प्रचुरप्रतापं प्रभूतवित्तं जितशत्रुपक्षम्।
विद्यानुरक्तं नृपतेरभीष्टं प्रशान्तचित्तं कुरुते सदैव॥ इति

जन्म के समय यदि सूर्य दो रेखाओं वाला हो तो मनुष्य राजा का प्रिय होता है। तब मनुष्य शत्रुओं को जीतने वाला, विद्या का खूब अभ्यास करने वाला, शान्त हृदय, खूब धन सम्पदा से युक्त तथा प्रतापी होता है।

**छायापतिः प्रकुरुते पुरुषं प्रसूतं**
**भृत्या व्ययेन च युतं सुजनैः सुयुज्यम्।**
**शीलान्वितं रिपुपदं सततं विविक्त-**
**युक्तं हिरण्यसुतवित्तयुतं तृतीये॥२९॥**

अथ सम्प्रति रेखात्रययुक्तसूर्यफलमाह—

छायापतिरिति। यदा तृतीये त्रिभी रेखाभिः सहितः छायापतिः सूर्यः प्रसूतं जातं, पुरुषं नरं, भृत्या ऐश्वर्येण, व्ययेन विगमेन च युक्तं, सुजनैः सुन्दर-लोकैः सुयुज्यं युक्तं शीलेन सुन्दरस्वभावेन अन्वितं युक्तं, रिपूणां पदं स्थानं सततं नित्यं, विविक्तेन रहसा, युक्तं, हिरण्येन सुवर्णेन, सुतेन पुत्रेण, वित्तेन धनेन च युतं प्रकुरुते। अत्राह वृद्धयवनः—

'तृतीयगः शत्रुपदं विभूतिं व्ययेनयुक्तं सुजनैः सुयुज्यम्।
हिरण्यपुत्रार्थविविक्तयुक्तं नरं प्रसूतं सततं सुशीलम्॥' इति

यदि सूर्य तीन रेखाओं से युक्त हो तो जातक ऐश्वर्यशाली, धन की प्राप्ति व व्यय दोनों से युक्त तथा अच्छी संगति वाला होता है। तब मनुष्य अच्छे चरित्र से युक्त, शत्रुओं का (ईर्ष्या) स्थान, एकान्त में वास करने वाला एवं सोना, पुत्र, धनादि से युक्त होता है।

**चतुर्थगश्चण्डकरः सुशीलं**
**पूज्यं नृपाणां च नृणां समेषाम्।**

**पुण्येन युक्तं प्रमदापरं च**
**नित्यं प्रसूतं मनुजं विधत्ते ॥३०॥**

अथाधुना रेखाचतुष्टययुक्तसूर्यफलमुपजात्याह—

चतुर्थग इति। चतुर्थगश्चतुर्भी रेखाभिर्युक्तः सूर्यः प्रसूतं जातं मनुजं मनुष्यं, सुशीलं सुन्दरस्वभावं नृपाणां समेषां सर्वेषां नृणां च पूज्यमर्च्यं, पुण्येन धर्मेण युक्तं, नित्यं सर्वदा प्रमदापरं स्त्रीपरायणं विधत्ते कुरुत इति। तथा च वृद्धयवनः—

चतुर्थगः सर्वजनस्य पूज्यं करोति मर्त्यं सततं सुशीलम्।
नरेन्द्रपूज्यं सुभगं मनुष्यं धर्मान्वितं दारपरं प्रसूतम्॥ इति

यदि सूर्य चार रेखाओं से युक्त हो तो मनुष्य सुशील, सुन्दर-स्वभाव वाला सब मनुष्यों और राजाओं द्वारा सम्मानित, धर्म से युक्त होता है। किन्तु चार रेखाओं वाला सूर्य मनुष्य को स्त्री परायण बनाता है। अर्थात् ऐसा व्यक्ति स्त्रियों से पराजित होता है या अत्यन्त स्त्री प्रेमी होता है।

**गोकासरोष्ट्रैः सहितं प्रधानं**
**वंशेऽमृतान्धः क्षितिदेवभक्तम्।**
**कुर्य्यादभीष्टं सुजनैः समेतं**
**चेत्पिङ्गलः पञ्चमगः पुमांसम्॥३१॥**

अथेदानीं पञ्चरेखायुक्तसूर्यफलमिन्द्रवज्रयाह—

गवेति। चेद्यदि पिङ्गलः सूर्यः पञ्चमगः पञ्चभी रेखाभिः सहितस्तदा पुमांसं पुरुषं गावः कासराः महिषाः उष्ट्रास्तैः सहितं युक्तं, वंशे कुले, प्रधानं मुख्यं देवतानां ब्राह्मणानां च भक्तं, अभीष्टं प्रियं, सुजनैः सुन्दरलोकैः समेतं युक्तं कुर्यादिति शेषः। अत्र वृद्धयवनः—

'करोति पुरुषं खलु पंचमस्थः शान्तंरविर्गोमहिषोष्ट्रयुक्तम्।
कुलप्रधानं कुरुते त्वभीष्टं सुसंयुतं ब्राह्मणदेवभक्तम्'॥ इति

यदि सूर्य पांच रेखाओं से युक्त हो तो मनुष्य गाय, भैंस, ऊंट आदि उपयोगी पशुओं से सम्पन्न, अपने कुल में ऊंचा, देवताओं व ब्राह्मणों का भक्त तथा उत्तम पुरुषों की संगति में रहने वाला होता है।

**षष्ठाश्रितश्चेद्धि विपक्षपक्ष-**
**हर्त्तारमर्कः कुरुतेऽधिकं च।**
**मानामभीष्टं बहुलान्नपानं**
**देवस्य भक्तं च गुरोः सुवित्तम् ।।३२।।**

अथाधुना षड्रेखायुक्तसूर्यफलमिन्द्रवज्रयाह—

षष्ठेति। चद्यदि सूर्यः षष्ठाश्रितः षड्रेखाभिर्युक्तस्तदा विपक्षाणां शत्रूणां पक्षः समूहस्तस्यहर्ता नाशको यस्तं, अधिकं श्रेष्ठं नराणामिति शेषः। मानां श्रीणामभीष्टं प्रियं, बहुलान्नपानं प्रचुरान्नपानं, देवस्य गुरोश्च भक्तं सुवित्तं प्रभूतधनं कुरुत इति। यथाह वृद्धयवनः—

'हर्ताऽरिपक्षं प्रकरोति षष्ठे स्थितो विवस्वानधिकं नराणाम्।
श्रीणामभीष्टं गुरुदेवभक्तं प्रभूतवित्तं प्रचुरान्नमानम् ।।' इति

जन्म के समय यदि सूर्य छह रेखाओं से युक्त हो तो व्यक्ति शत्रुओं का नाश करने वाला, लक्ष्मी से सम्पन्न, मनुष्यों में श्रेष्ठ, अत्यन्त धान्यादिक से युक्त गृह वाला, देवताओं और गुरुजनों का भक्त तथा उत्तम धन-सम्पत्ति से युक्त होता है।

वृद्धयवन के कथनानुसार ग्रन्थकार ने माना है कि छह रेखाओं से युक्त सूर्य हो तो मनुष्य सब प्रकार के ऐश्वर्यो से युक्त होता है। लक्ष्मी अर्थात् श्री अर्थात् शोभा का अभीष्ट होने का आशय यह है कि व्यक्ति के पास अच्छे स्रोतों से सम्मानपूर्वक कमाया गया धन खूब होगा तथा लोगों में उसका आदरणीय स्थान होगा। समाज में ऐसा व्यक्ति अग्रगण्य होता है। स्पष्ट ही है कि धन-सम्पत्ति होने के साथ-साथ वह अपनी सम्पदाओं का प्रयोग उत्तम धार्मिक परोपकारादि कार्यों में करेगा। धन की दो उत्तम गतियां दान और भोग उसे अवश्य प्राप्त होगीं।

**चेत्सप्तमस्थः किल सप्तसप्तिः**
**पद्माप्तियुक्तं विबुधप्रचण्डम्।**
**विज्ञानशीलं विभुताप्रयुक्तं**
**मर्त्यं विधत्ते समुदारचित्तम् ।।३३।।**

अथाधुना सप्तरेखायुक्तसूर्यफलमिन्द्रवज्रयाह'—

चेदिति। चेद्यदि सप्तसप्तयोऽश्वा यस्य तथा सप्तसप्तिः सूर्यः सप्तमस्थः सप्तभी रेखाभिर्युक्तस्तदा पद्मायाः लक्ष्म्याः आप्तिर्लब्धिस्तया युक्तं, विबुधो

देवः प्रचण्ड उग्रः यस्य तथातम्। विज्ञानशीलं शिल्पशास्त्रविदं, विभुतया प्रभुतया सहितं, समुदारचित्तं सम्यक् सरलहृदयं मर्त्यं मनुष्यं विधत्ते। यथा च वृद्धयवनः—

'श्री लाभयुक्तं खलुसप्तमस्थो नरं विधत्ते किल तीक्ष्णरश्मिः।
उदारचित्तं प्रभुतासमेतं विज्ञानशीलं ह्यमरप्रचण्डम्।।' इति

यदि सूर्य सात रेखाओं से युक्त हो तो उसकी आय उत्तम होगी। ऐसा व्यक्ति तीक्ष्ण स्वभाव व स्वरूप वाले देवताओं (शंकर, भैरव, हनुमान आदि) का भक्त होता है। वह शिल्प व विज्ञान का विशेषज्ञ प्रभुता युक्त और उदार हृदय वाला होता है।

'प्रचण्ड देवताओं की आराधना करने वाला' ऐसा कह कर कदाचित् व्यक्ति के दुष्प्रधर्ष्य व्यक्तित्व, स्वाभिमानता, प्रच्छन्न-वीरत्व एवं धीरोदात्तत्व गुणों को रेखांकित किया जा रहा है। **वृद्धयवन** ने भी ऐसा ही फल माना है। प्रभुता सम्पन्न होने के कारण उस व्यक्ति का स्थान समाज में आदरणीय व प्रभावी होना चाहिए। उग्र देवताओं का भक्त होकर भी वह संसार के कल्याणार्थ ही प्रयत्न करेगा, ऐसा अर्थ उसके उदार हृदय विशेषण से प्रतिभासित हो रहा है।

**अर्कोऽष्टमस्थः परिपन्थिपक्ष-**
**हन्तारमर्थात्मजसंयुतं च।**
**दान्ताप्रमेयं कुरुते सुरक्त-**
**मैत्रेयमेवं यशसा प्रसिद्धम्।।३४।।**

अथाधुनाऽष्टरेखायुक्तसूर्यफलमिन्द्रवज्रयाह'—

अर्क इति। अर्कः सूर्योऽष्टमस्थोऽष्टभी रेखाभिर्युक्तस्तदापरिपन्थिनां शत्रूणां पक्षः समूहस्तस्य हन्ता नाशको यस्तम्। अर्थेन धनेन आत्मजेन पुत्रेण संयुतं सहितं, दान्तं तपःक्लेशसहं, प्रमातुं योग्यः प्रमेयः न प्रमेयोऽप्रमेयस्तम्। अर्थाद् यथार्थज्ञानवन्तमिति। मैत्रेये बुद्धदेवे सुरक्तं लीनं रतम्, एवं यशसा कीर्त्या प्रसिद्धं कुरुत इति। तथा च वृद्धयवनः—

स्थानेऽष्टमेपुत्रधनैः समेतं सुरक्तमैत्रेयकमप्रमेयम्।
विख्यातकीर्तिं सततं सुदान्तं हन्ता रिपक्षं प्रकरोति भानुरिति।

यदि सूर्य आठ रेखाओं से युक्त हो तो व्यक्ति अपने विपक्षियों व शत्रुओं का समूल नाश करने की शक्ति रखता है। वह धन व

पुत्रादिक से युक्त होता है। ऐसा व्यक्ति तपस्या (त्याग, परोपकार) से होने वाले क्लेश को सहन करने वाला और अप्रमेय होता है। वह बुद्ध भगवान् का भक्त और विख्यात होता है।

अप्रमेय गुण से तात्पर्य है कि उसकी महानता व सद्गुणों का अनुमान नहीं लगाया जा सकता। वह विशाल व्यक्तित्व का स्वामी तथा तदनुरूप ही ऊंचे गुणों से युक्त होगा। 'बुद्धदेव का भक्त' यह पद कदाचित् लाक्षणिक है। इसका अर्थ यही समझना चाहिए कि वह व्यक्ति मित्रता, सद्भाव, शत्रु को भी क्षमा करने वाला महान् स्वभाव, उत्तम क्षमा, उत्तम आर्जव अर्थात् सरल स्वभाव तथा उत्तम चरित्र एवं अहिंसा जैसे परम गुणों से युक्त होगा।

**सूर्य के बिन्दुओं का फल :**

**दायोपगो दिनकरः परदाररक्तं**
**स्थानाद्यके जनिमतं च विवेकशून्यम्।**
**नित्यं कृतघ्नमिह दुर्जनमुग्रमान्द्यं**
**पापं कृशं प्रकुरुते जनसाहसं च ॥२५॥**

अथेदानीमेकबिन्दुयुक्तसूर्यफलं वसन्ततिलकेनाह—

दायोपग इति। दायोपगो बिन्दुयुक्तः, दिनकरः यदि स्थानादिके प्रथम स्थाने तदा जनिमन्तं प्राणिनं, परदारेषु परस्त्रीषु रक्तमासक्तं, विवेको विचारस्तेन शून्यं वर्जितं, नित्यं सदैव कृतघ्नमुपकारिजनापकारकारिणं, दुर्जनं खलं, उग्रमान्द्यमुग्ररोगं, पापं पापात्मानं, कृशं दुर्बलशरीरं, जनेषु लोकेषु, साहसं प्रकुरुत इति। अत्र च वृद्धयवनः—

बिन्दुस्थितोऽर्कः प्रकरोति पापं स्थानादिमे दुर्जनमुग्ररोगम्।
कृशं कृतघ्नं परदाररक्तं विवेकशून्यं जनसाहसं च ॥ इति

यदि सूर्य एक बिन्दु से युक्त हो तो व्यक्ति पराई स्त्री में रति रखने वाला, विवेक से रहित अर्थात् अच्छे बुरे में भेद न समझने वाला, कृतघ्न अर्थात् किए हुए उपकार को भूल जाने वाला अहसान फरामोश, दुष्ट स्वभाव वाला, भयंकर रोग से युक्त, पापी, दुर्बल और दुःसाहसी अर्थात् लोगों को अपने बल व पदवी से आतंकित करने वाला होता है।

**इनो द्वितीये गतधान्यवित्तं**
**कृतघ्नमज्ञं कुवयस्यरक्तम् ।**
**शिरोऽर्त्तिवक्त्रामयपित्तदीर्घ-**
**ज्वरैः प्रकुर्य्यात्परिपीडितं च ॥३६॥**

अथेदानीं विन्दुद्वययुक्तसूर्यफलमुपेन्द्रवज्रयाह'—

इन इति । इनः सूर्यः द्वितीये विन्दुद्वययुक्ते राशौ वर्तते चेत्तदा गतधान्य-वित्तं धनधान्यरहितं, कृतघ्नमुपकृतिमान्यताहीनमज्ञंमूर्खं, कुवयस्येन कुमित्रेण रक्तं युक्तं शिरस्युत्तमांगे आर्तिः पीडा, वक्त्रस्य मुखस्य आमयो रोगस्तेन पित्तेन दीर्घज्वरेण च परिपीडितं दुःखितं प्रकुर्यात् । यथाह वृद्धयवनः—

'मूर्खं कृतघ्नं तु तथा द्वितीये कुमित्ररक्तं धनधान्यहीनम् ।
शिरोऽर्तिदीर्घज्वरपित्तमुख्यैः प्रपीडितं वक्त्रगतैश्च रोगैः ।' इति

यदि सूर्य दो बिन्दुओं से युक्त हो तो व्यक्ति धन-धान्य से रहित, कृतघ्न, मूर्ख, बुरी संगति में रहने वाला, सिर व मुंह के रोगों से पीड़ित, पित्त एवं लम्बी अवधि तक रहने वाले बुखार से पीड़ित होता है।

**तृतीयगो व्योममणिः स्वधान्य-**
**सुतैर्विहीनं रहितं नयेन ।**
**क्रियोज्झितं प्राज्यसपत्नपक्षं**
**सदाऽऽत्तगर्वं पुरुषं प्रसूतम् ॥३७॥**

अथेदानीं बिन्दुत्रययुक्तसूर्यफलमुपेन्द्रवज्रयाह—

तृतीयग इति । व्योममणिः सूर्यस्तृतीयगो रेखात्रययुक्ते राशौ स्थित स्तदा स्वधान्यसुतैर्धनधान्यसुतैर्विहीनं रहितं नयेन नीत्या रहितं, क्रियया सत्कृत्येन उज्झितं रहितं, प्राज्यसपत्नपक्षं, वहुशत्रुपक्षं सदा आत्तगर्वमभिभूतम्, प्रसूतं जातं पुरुषं कुर्यादिति शेषः । तथा च वृद्धयवनः—

'नयेन हीनं पुरुषं तृतीये सुतार्थधान्यैः परिवर्जितं च ।
सदाभिभूतं वहुशत्रुपक्षं क्रियाविहीनं तु सदा प्रसूतम् ।।' इति

जन्म समय यदि सूर्य तीन बिन्दुओं से युक्त हो तो धन-धान्य व पुत्रादिकों से रहित, अन्यायी, बुरे काम करने वाला, बहुत से शत्रुओं से युक्त तथा सदा घबराया हुआ, दबा हुआ किन्तु घमण्डी होता है।

**ब्रध्नश्चतुर्थोपगतः पराजितं**
**लोकैः समस्तैः परकामिनीयुतम् ।**
**स्वार्थे विदध्यान्निरतं विवर्जित-**
**मिष्टैः पुमांसं पुरवेशसेवकम् ॥३८॥**

अथेदानीं बिन्दुचतुष्टययुक्तसूर्यफलमिन्द्रवंशयाह—

ब्रध्न इति । ब्रध्नः सूर्यश्चतुर्थोपगतो रेखाचतुष्टययुक्तै राशौ स्थितः चेत्तदा, पुमांसं समस्तैः लोकैर्जनैः पराजितं पराभूतं, परकामिनीयुतं, अन्यस्त्रिया सहितं, स्वार्थे निजार्थे, निरतमासक्तमिष्टैः प्रियजनैर्विवर्जितं रहितं, पुरं नगरं वेशो गणिकाश्रयः, तयोः सेवकं भक्तं विदध्यात् कुर्यात् ।

जन्म के समय सूर्य यदि चार बिन्दुओं से युक्त हो तो मनुष्यों से पराजित अर्थात् सबसे अपमानित, पराई स्त्रियों में अनुरक्त, स्वार्थ साधन में लगा हुआ, प्रियजनों व मित्रों से रहित, नगर में निवास करने वाला तथा वेश्यागामी होता है ।

**धाम्नान्निधिः पञ्चमगः प्रपीडितं**
**वित्तेनदैन्येन सुखेन मानवम् ।**
**दौर्भाग्यभाजं च दरिद्रभाषिणं**
**कुर्यादलं निष्ठुरकं नपुंसकम् ॥३९॥**

अथाधुना पञ्चबिन्दुयुक्तसूर्यफलमिन्द्रवंशयाह—

धाम्नां निधिरिति । धाम्नां तेजसां निधिराश्रय एवं भूतः सूर्यः, पंचमगः पंचविन्दुयुक्तस्तदा मानवं मनुष्यं वित्तेन धनेन, दैन्येन दरिद्रतया, सुखेन, प्रपीडितं दुःखितं दुष्टभाग्यवन्तं, दरिद्रभाषिणं दीनवचनमलं परिपूर्णं निष्ठुरकं क्रूरं नपुंसकं वीर्यरहितं कुर्यात् । यथाह वृद्धयवनः—

'करोति भानुः खलु पंचमस्थः सुखेन दारिद्र्यधनेन पीडितम् ।
दौर्भाग्यवन्तं परिदीनभाषितं नरं तथा क्लीबमलं च निष्ठुरम् ॥' इति

यदि सूर्य पांच बिन्दुओं से युक्त हो तो मनुष्य अपनी दरिद्रता से अथवा धन से अथवा सुख से सदा पीड़ित रहता है ।

वह व्यक्ति अभागा, दीनतापूर्ण वचन बोलने वाला, निष्ठुर स्वभाव वाला एवं नपुसंक होता है ।

सुख, धन व दरिद्रता से पीड़ित होना, इसका आशय यही होना चाहिए कि व्यक्ति गरीब होगा । गरीब व्यक्ति धन की चिन्ता से युक्त

होकर एवं सुख की कामना करते रहने पर भी सुख न पाने का दु:ख भोगेगा ही, अत: ऐसा व्यक्ति भाग्यहीन, धनहीन व सुखहीन होता है।

**षष्ठोभगोऽरातिचयैः पराजितं**
**सत्यात्स्वधर्म्मान्निगमाच्च मानतः।**
**मुक्तं प्रसूतं मलिनं मलिम्लुचं**
**मायाविनं नो वृषसेवितं नरम् ॥४०॥**

अथेदानीं षड्बिन्दुयुक्तसूर्यफलमिन्द्रवंशयाह'—

षष्ठ इति। भगः सूर्यः षष्ठो षड्बिन्दुयुतराशिगतश्चेत्तदा प्रसूतं जातं नरं अराति चयैः शत्रुसमूहैः पराजितं, सत्यात् सत्यवचनात् स्वधर्मात् स्वकुल-धर्माद् वेदान्निगमात्, मानं प्रसिद्धं तस्मात् च मुक्तं वर्जितं, कपटेन माययायुतं मायाविनं, मलिनं मलिम्लुचं चौरं, नो वृषसेवितं न धर्मसेवितमर्थादधर्मिणामिति भावः। कुरुत इति शेषः।

यदि सूर्य छह बिन्दुओं से युक्त हो तो मनुष्य अपने विरोधियों से पराजित होता है। वह व्यक्ति सच्चाई का त्याग करने वाला, वेदादि धर्म से रहित, अपने कुल की मान-मर्यादा को मिटाने वाला, मलिन, चोर, कपटी और धोखेबाज होता है।

**प्रपञ्चभावं विकृतं परान्न-**
**कलेवरोत्थार्थसमीहितं च।**
**सुनिष्ठुरं चञ्चलमिन्दिरोनं**
**गतत्रपं सप्तमगः पतङ्गः ॥४१॥**

अथाधुना सप्तबिन्दुयुक्तसूर्यफलमुपेन्द्रवज्रयाह—

प्रपञ्चेति। पतंगः सूर्यः सप्तमगः सप्तभिर्बिन्दुभियुक्ते राशौ स्थितश्चेत्तदा प्रचञ्चभावं प्रपंचस्वभावं, विकृतं रोगिणं परान्नकलेवरोत्थार्थसमीहितं परेषां धनान्नपुत्राभिभूषितं, सुनिष्ठुरं परुषं, चंचलं चपलमिन्दिरोनमिन्दिरया लक्ष्म्या ऊनं वर्जितं गतत्रयं निर्लज्जं करोतीति शेषः। यथा वृद्धयवनः—

'श्रियाविहीनं विकृतं गतत्रपं परान्नपुत्रार्थसमीहितं सदा।
करोति भानुः खलु पंचमस्थः प्रपंचशीलं चपलं सुनिष्ठुरम् ॥' इति

जन्म समय यदि सूर्य सात बिन्दुओं से युक्त हो तो मनुष्य छल-प्रपंच करने वाला, रोगों से घिरा हुआ, दूसरों के स्त्री व पुत्रादि का

लालच करने वाला, पर धन का लोभी, निष्ठुर स्वभाव वाला, चंचल, धन से हीन तथा निर्लज्ज होता है।

**स्थानेऽष्टमे बिन्दुगतो विभाकरो**
**मर्त्यं प्रसूतं बहुलाघचेष्टितम्।**
**पङ्कात्मकं स्वेष्टजनैर्विवर्जित-**
**माभीलयुक्तं परभामिनीरतम् ॥४२॥**

अथाधुनाऽष्टबिन्दुयुक्तसूर्यफलमिन्द्रवंशयाह—

स्थान इति। विभाकरः सूर्योऽष्टमे स्थाने बिन्दुगतोऽष्टभिर्बिन्दुभिः युक्ते राशौ स्थितश्चेत्तदा मर्त्यं मनुष्यं बहुलाघचेष्टितं बहुपापचेष्टितं, पंकात्मकं पापात्मकं, स्वेष्ट जनैर्निजप्रियलोकैर्विवर्जितं रहितं, आभीलेन दुःखेन युक्तं सहित-मर्थाद् दुःखितम्। परभामिनीनिरतं परस्त्रीलम्पटं कुर्यादिति शेषः। यथा च वृद्धयवनः—

'स्थानेऽष्टमे तीक्ष्णमयूखमाली, नरं विधत्ते बहुपापचेष्टितम्।
इष्टैर्विमुक्तं परदाररक्तं पापात्मकं दुःखयुतं सदैव॥' इति

जन्म समय सूर्य यदि आठ बिन्दुओं से युक्त हो तो बहुत अधिक पाप कर्म करने वाला, दुष्ट स्वभाव वाला, प्रिय जनों व मित्रों से रहित, सदा दुःखी रहने वाला, पराई स्त्री में आसक्त अर्थात् निकृष्ट होता है।

**चन्द्रमा की रेखाओं का फल :**

**रेखास्थितः कुमुदिनीदयितो यदाऽऽद्ये**
**तीर्थाश्रयं हि सकलव्रतकोपसेव्यम्।**
**भक्तं गुरोः क्षितिसुरस्य करोति जातं**
**मर्त्यं प्रियं क्षितिभुजां सुभगं सदैव ॥४३॥**

अथ साम्प्रतमेकरेखायुक्तचन्द्रफलं वसन्ततिलकेनाह—

रेखास्थित इति। यदा कुमुदिनीदयितश्चन्द्रमाः आद्ये रेखास्थितः एक-रेखासहिते राशौ गतः जातं मनुष्यं तीर्थाश्रयं तीर्थेषु गंगासागरादि पुण्यक्षेत्रेषु आश्रयं विषयं वासमित्यर्थः। सकल व्रतकोपसेव्यं सम्पूर्णव्रतोपसेव्यं, गुरोराचार्यस्य क्षितिसुरस्य ब्राह्मणस्य च भक्तं सेवकं क्षितिभुजां राज्ञां प्रियमभीष्टं सदैव नित्यमेव सुभगं सज्जनं कुर्यादिति शेषः। तथा च वृद्धयवनः—

'रेखास्थितो हि हिमरश्मिमाली आद्ये विधत्ते सुभगं मनुष्यम्।
प्रियं नृपाणां गुरुविप्रभक्तं तीर्थाश्रयं सर्वव्रतोपसेव्यम्॥' इति

जन्म समय यदि चन्द्रमा एक रेखा से युक्त हो, अर्थात् एक रेखा से युक्त राशि में स्थित हो तो मनुष्य तीर्थों में निवास करने वाला सब व्रतों को मानने वाला, गुरुओं व ब्राह्मणों का भक्त, राजाओं का प्रिय और स्वभाव से सज्जन होता है।

**राजा सदा प्रकुरुते गजवाजिदानै-**
**र्युक्तं सुसौख्यसहितं द्वितये प्रगल्भम्।**
**वैदूर्य्यकेण सहितं मणिमौक्तिकैश्च**
**प्रेम्णा युतं मनुभवं हृदयं प्रशान्तम् ॥४४॥**

अथेदानीं रेखाद्वययुक्तचन्द्रफलं वसन्ततिलकेनाह—

राजेति। राजाचन्द्रः द्वितीये रेखाद्वययुक्तर्क्षे स्थितश्चेत्तदा मनुभवं मनुष्यं सदा गजो हस्ती, वाजी घोटकः दानं त्यागः, तैर्युक्तं सहितमित्यर्थः, सुसौख्यं सहितं सुतरां सुखसंयुक्तं, प्रगल्भं प्रतिभान्वितं विदूरे भवो वैदूर्य मणि-विशेषः तेन मणयो मौक्तिकानि मुक्ताफलानि तैश्च युतं सहितं, प्रेम्णा स्नेहेन युतं प्रशान्तं प्रशमितं हृदयं चित्तं प्रकुरुते। यथा वृद्धयवनः—

'हस्त्यश्वदानैः सहितं द्वितीये वैदूर्य्यमुक्तामणिभिस्तथैव।
नरं सुसौख्यैः सहितं प्रगल्भं प्रशान्तचित्तं प्रणयान्वितं च॥' इति

जन्म के समय यदि चन्द्रमा दो रेखाओं से युक्त हो तो मनुष्य हाथी, घोड़े जैसे मूल्यवान् वाहनों से युक्त तथा दान करने वाला होता है। इसी प्रकार वह अत्यन्त सुखी, भय से रहित, वैदूर्यमणि आदि मूल्यवान् रत्नों तथा मोतियों से युक्त, स्नेहपूर्ण स्वभाव वाला तथा शान्त चित्त होता है।

**तृतीयसंस्थो हिमभा भयान्वितं**
**गुणैः समस्तैः सहितं च मायया।**
**विनीतकं बान्धववृन्दवन्दितं**
**भवं विधत्ते बहुपुण्यभाजनम् ॥४५॥**

अथ सम्प्रति रेखात्रययुक्तचन्द्रफलं वंशस्थेनाह'—

तृतीयसंस्थ इति। हिमभाश्चन्द्रः तृतीयसंस्थो रेखात्रययुक्तः भवं जातं भया लक्ष्म्या अन्वितं सहितम्। समस्तैः गुणैः सत्वादिभिः सहितं युक्तं मायया कपटेनेति यावत्। सहितं विनीतकं विनययुक्तं बान्धवानां सगोत्राणां वृन्दानि

समूहाः तैर्वन्दितं पूजितं बहूनि पुण्यानि धर्मकृत्यानि तेषां भाजनं पात्रं विधत्ते कुरुते । इति

यथाऽऽह वृद्धयवनः—

'चन्द्रस्तृतीये कुरुते सपापं नरं विनीतं बहुधर्मभाजनम् ।
श्रियान्वितं सर्वगुणोपन्नं धत्ते सदा बन्धुजनस्य पूजाम् ॥' इति

यदि चन्द्रमा तीन रेखाओं से युक्त हो तो मनुष्य उत्तम लक्ष्मी से युक्त, समस्त गुणों से युक्त, विनीत, बन्धु-बांधवों द्वारा मान्य, बहुत पुण्य वाला, किन्तु जादू टोना, माया आदि को जानने वाला होता है ।

**दाक्षायणीरमण आत्मजसौख्यमान-**
**युक्तं महामनुभवं कुरुते चतुर्थे ।**
**ख्यातं नरं विविधवित्तसमन्वितं च**
**पद्माकरप्रहिमुखाश्रयरक्तचित्तम् ॥४६॥**

अथाधुना रेखाचतुष्टययुक्तचन्द्रफलं वसन्ततिलकेनाहः—

दाक्षायणीति दाक्षायण्योऽश्विनीप्रभृतिनक्षत्राणि तेषां रमणः स्वामी चन्द्रः रेखाचतुष्टययुतराशौ स्थितश्चेत् नरमात्मजानां पुत्राणां सौख्यं तेन मानेन च युक्तं महामनुभवं महान्तं मनुष्यं, ख्यातं प्रसिद्धं, विविधवित्तसमन्वितमनेकधनसहितं पद्माकर प्रहिमुखाश्रयरक्तचित्तं तडागकूपाश्रयासक्तहृदयं कुरुते इति । तथा च वृद्धयवनः—

'सोमश्चतुर्थे प्रकरोति मानं नरं प्रसिद्धं विविधार्थयुक्तम् ।
तडागकूपाश्रयरक्तचित्तं महामनुष्यं सुतसौख्ययुक्तम् ॥' इति

यदि चन्द्रमा चार रेखाओं से युक्त हो तो मनुष्य पुत्रों के सुख से युक्त, मान करने वाला, प्रधान पुरुष, प्रसिद्ध, अनेक प्रकार की सम्पदाओं से युक्त, तालाब, कूएं आदि बनवाने में रुचि लेने वाला होता है ।

**पञ्चमगो हिमगुर्गतविघ्नं**
**सर्वसहं बहुभोगसमेतम् ।**
**सञ्जनयेत्सविवेकमतिज्ञं**
**देहभृतं दयितातिथिमित्र ॥४७॥**

अथाधुना पञ्चरेखायुक्तचन्द्रफलं दोधकेनाह'—

पंचमग इति। हिमगुश्चन्द्रः पंचमगः रेखापंचके राशौ विद्यमानः देहभृतं शरीरिणं गतविद्यं गता समाप्ता विद्या यस्य तथा तम्। विद्याहीनमित्यर्थः। सर्वं सहते सर्वंसहस्तम्। बहुभिर्धनधान्यभोगैः सहितं सहविवेकेन विचारेण वर्तमानः सविवेकस्तम्। अतिज्ञं सुविज्ञं दयितातिथिमतिथिप्रियं सन्तजनयेदिति। यथात्र वृद्धयवनः—

'विद्याविहीनं सुविवेकयुक्तं नरं प्रसूतं बहुभोगभाजनम्।
क्षपाधिनाथः खलु पंचमस्थः प्रियातिथिं सर्वंसहं सुविज्ञम्॥' इति

जन्म समय यदि चन्द्रमा पांच रेखाओं से युक्त हो तो मनुष्य विद्या से रहित, खूब सहन शक्ति वाला, वहुत भोग विलास से युक्त होता है। विवेक बुद्धि से सम्पन्न, अति चतुर, अतिथियों का सत्कार करने वाली सन्तान से ऐसा व्यक्ति युक्त होगा। अर्थात् उसकी सन्तान सम्पन्न, चतुर एवं गुणी होगी।

**उत्पादयत्यमृतदीधितिरर्थयुक्तं**
**षष्ठस्थितस्तनयदारयुतं विनीतम्।**
**कान्तं षडङ्गसहितं सुभगं नरेन्द्र-**
**पूज्यं च शान्तिसहितं बहुमानभाजम्॥४८॥**

अथ साम्प्रतं षड्रेखायुक्तचन्द्रफलं वसन्ततिलकेनाह—

उत्पादयतीति। अमृतदीधितिश्चन्द्रः षष्ठस्थितः षष्ठरेखाभिर्युक्ते राशौ स्थितोऽर्थयुक्तं, तनयैः पुत्रैः दारैः स्त्रीभिर्युतं, विनीतं विनययुक्तं, कान्तं मनोहरं, वेदानां षडंगैः शिक्षाकल्पादिभिः सहितमर्थात्साङ्गवेदविदमित्यर्थः। सुभगं सुजनं नरेन्द्राणां राज्ञां, पूज्यं मान्यं शान्तिसहितं कामक्रोधादिरहितं बहुमानभाजमधिक-सम्मानसहितमुत्पादयति जनयति जनमिति शेषः। यथा वृद्धयवनः—

षडंगयुक्तं सुभगं मनोज्ञं करोति चन्द्रः सुतदारयुक्तम्।
धनाश्रयं शान्तियुतं विनीतं नरेन्द्रपूज्यं बहुमानभाजनम्॥' इति

यदि चन्द्रमा छह रेखाओं से युक्त हो तो धन, पुत्र तथा स्त्री से युक्त, विनय से सम्पन्न, मनोहर शरीर वाला, छह अंगों सहित वेदों का जानकार, राजाओं द्वारा सम्मानित, शान्ति से युक्त, काम व क्रोधादि विकारों को नियन्त्रण में रखने वाले तथा सम्मानित पुत्रों का पिता होता है।

**सुधाकरः सप्तमगो मनोरमा-**
**ङ्गनं सुशीलं प्रणतं प्रभान्वितम् ।**
**तथोपवासव्रतयोर्विधेर्विदं**
**करोति नित्यं सुमुखं शरीरिणम् ॥४९॥**

अथाधुना सप्तरेखायुतचन्द्रफलं वंशस्थेनाह—

सुधाकर इति । सुधाकरश्चन्द्रः सप्तमगः सप्तरेखायुतः शरीरिणं मनुष्यं मनोरमांगनं सुन्दरस्त्रीयुतं सुशीलं सुन्दरस्वभावं, प्रणतं विनम्रं प्रभया दीप्त्या अन्वितं युक्तं, उपवासोऽनाहारः व्रतं नियमं तयोर्विधेर्विधानस्य विदं वेत्तारं नित्यं सुमुखं सुन्दरमुखं करोति विद्धातीति ।

यदि चन्द्रमा सात रेखाओं से युक्त हो तो मनुष्य की स्त्री बहुत सुन्दर होती है। वह स्वयं भी सुन्दर स्वभाव वाला, विनम्र, तेजस्वी, व्रतोपवासादि की विधि जानने वाला तथा स्वयं सुन्दर मुख वाला होता है।

**स्थानेऽष्टमे शशधरो दयितातिथिं च**
**विद्यासमेतमवनीसुरवल्लभं च ।**
**सत्यान्वितं च सुखिनं प्रभया समेतं**
**गाङ्गेयसौख्यसहितं मनुजं प्रगल्भम् ॥५०॥**

अथ साम्प्रतमष्टरेखायुक्तचन्द्रफलं वसन्ततिलकेनाह—

स्थान इति । शशधरश्चन्द्रोऽष्टमे स्थानेऽष्टभिरेखाभिर्युक्तो राशौ स्थितश्चेत्तदा मनुजं मनुष्यं दयितातिथिमतिथिप्रियं विद्यायुक्तम् । अवनीसुरो ब्राह्मणस्तस्य वल्लभं प्रियं सत्यान्वितं सत्यवाचं, सुखिनं सुखभाजं, प्रभया दीप्त्या समेतं युक्तं गांगेयं सुवर्णं तस्य सौख्यं तेन सहितं प्रगल्भं प्रतिभायुतं कुर्यादिति शेषः ।

यथाऽत्र वृद्धयवनः—

स्थानेऽष्टमे सौख्यहिरण्ययुक्तं विद्यान्वितं सत्यपरं प्रगल्भम् ।
करोति चन्द्रः सुखिनं मनुष्यं प्रियातिथिब्राह्मणवल्लभं च ॥ इति

यदि चन्द्रमा आठ रेखाओं से युक्त हो तो मनुष्य अतिथियों का खूब सत्कार करने वाला, विद्या से सम्पन्न, ब्राह्मणों का प्रिय, सत्य बोलने वाला, सुखों को भोगने वाला, तेजस्वी, सोने से युक्त व प्रतिभा से सम्पन्न होता है।

**चन्द्रमा के बिन्दुओं का फल :**

**आद्ये स्थाने दाययुक्तः कलावान्**
**जातं जन्तुं सत्यहीनं च दीनम् ।**
**अंहोरक्तं स्वीयलोकैर्विमुक्तं**
**दभ्रं कुर्यात्सोपतापाङ्गमत्र ॥५१॥**

'अथ सम्प्रति एकबिन्दुयुक्तचन्द्रफलं शालिन्याह'—

आद्यइति । कलावांश्चन्द्रः, आद्ये स्थाने प्रथमे स्थाने, दाययुक्तो दायेन बिन्दुना युक्तः सहितस्तदा जातमुत्पन्नं जन्तुं शरीरिणं मनुष्यमिति यावत् । सत्येन हीनं रहितं, अर्थादसत्यभाषिणम् । दीनं दरिद्रं अंहोरक्तं पापासक्तं स्वीयलोकैर्निजजनैर्विमुक्तं त्यक्तं, दभ्रंकृशं, सोपतापाङ्गं रोगिणं कुर्यात् । शालिनीति तथा च वृद्धयवनः—

स्थानाद्यके बिन्दुगतः शशांकः सरोगदेहं कुरुते मनुष्यम् ।
पापानुरक्तं स्वजनैर्विमुक्तं दीनं कृशं सत्यविहीनमेव ॥ इति

यदि चन्द्रमा एक विन्दु से युक्त राशि में स्थित हो तो मनुष्य झूठ बोलने वाला, दरिद्र, पाप कर्मों में लगने वाला, परिवार जनों द्वारा तिरस्कृत, दुर्बल एवं रोगों से युक्त होता है ।

**कलाधरो बान्धवलोकवर्जितं**
**कलत्रहीनं जननात्ययतान्वितम् ।**
**यदा द्वितीये नियतं सुदुर्विधं**
**भवं प्रकुर्य्याद्बहुशत्रुमङ्गिनम् ॥५२॥**

'अथाधुना बिन्दुद्वययुक्तचन्द्रफलं वंशस्थेनाह'—

कलाधर इति । कला बिम्बस्य षोडशांशस्तं धरति यस्तथा सः 'काले शिल्पे वित्तवृद्धौ चन्द्रांशे कलने कला' इति वैजयन्ती । कलाधरश्चन्द्रः द्वितीये बिन्दुद्वययुक्त इत्यर्थः । चेत्तदा भवं जातं, अंगिनं प्राणिनं मनुजमिति यावत् । कलत्रेण स्त्रिया रहितं, जननं जन्म अत्ययोमरणं ताभ्यामन्वितं युक्तमर्थादल्प जीवितं नियतं निश्चयेन, सुदुर्विधं सुतरां दुर्विधं दरिद्रं वहुशत्रुं प्रभूतशत्रुं कुर्यादिति वंशस्थच्छन्दः । तथा च वृद्धयवनः—

करोति चन्द्रो नियतं द्वितीये नरं सुदीनं मृतजन्मयुक्तम् ।
प्रभूतशत्रुं प्रमदा विहीनं विवर्जितं बन्धुजनेन नित्यम् ॥ इति

जन्म के समय यदि चन्द्रमा दो विन्दुओं से युक्त हो तो मनुष्य बन्धुओं से रहित, स्त्री के सुख से वंचित, बहुत अल्प आयु वाला, अति दरिद्र तथा बहुत से शत्रुओं से युक्त होता है।

**कुरङ्गलक्ष्मा कफवातपीडितं**
**तृतीयसंस्थः कुरुते महाभयैः।**
**समन्वितं भूविभुनाऽतिपीडित**
**मजस्रमुग्रेण गदेन संयुतम् ॥५३॥**

'अथाधुना विन्दुत्रययुक्तचन्द्रफलं वंशस्थेनाह'—

कुरंगेति। कुरंगलक्ष्मा चन्द्रः, तृतीयसंस्थो बिन्दुत्रययुक्तश्चेत्तदा, कफः वातो वायुस्ताभ्यां पीडितं, महाभयैः समन्वितं, अजस्रं नित्यं, विभुविभुना राज्ञा, अतिपीडितं अतिदुःखितमुग्रेणोत्कटेन, गदेन रोगेण संयुतं कुरुते। जातमिति शेषः। यथाहवृद्धयवनः—

'सुपीडितं भूपतिना सदैव महाभयैः संयुतमुग्ररोगम्।
कफानिलाभ्यां परिपीडितं च चन्द्रस्तृतीये कुरुते मनुष्यम् ॥' इति

यदि चन्द्रमा तीन विन्दुओं से युक्त हो तो कफ और वायु से सम्बन्धित रोगों को उत्पन्न करता है। ऐसा व्यक्ति भय से युक्त होता है। राजा से दुःखी और उग्र रोगों से पीड़ित होता है।

**चतुर्थगः कैरविणीवनेश**
**ऋतेन सौख्येन विवर्जितं च।**
**सुदुर्भगं कुत्सितसङ्गतं स-**
**बहूपतापं कुरुतेऽतिदुष्टम् ॥५४॥**

'अथेदानीं बिन्दुचतुष्टययुक्तचन्द्रफलमुपेन्द्रवज्रयाह—

चतुर्थग इति। कैरविणीवनेशश्चन्द्रः चतुर्थगो बिन्दुचतुष्टय युक्तः, तदा ऋतेन सत्येन, सौख्यं तेन च विवर्जितं रहितं, सुदुर्भगं सुतरां दुष्टं भगं भाग्यं यस्य तथा तम्। अर्थादल्प भाग्यमित्यर्थः। कुत्सिताः निन्दितास्तेषां संगतं सम्बद्धं, सह बहुना प्रभूतेन उपतापेन रोगेण, वर्तमानो यस्तमतिदुर्जनं कुरुते विधत्ते। यथा वृद्धयवनः—

'कुसंगतं सत्यविहीनमेव सौख्येन हीनं बहुरोगयुक्तम्।
सुदुर्भगं दुष्टतरं सदैव चन्द्रश्चतुर्थे कुरुते मनुष्यम् ॥' इति

जन्म समय यदि चन्द्रमा चार बिन्दुओं से युक्त राशि में स्थित हो तो मनुष्य सुखों से वंचित, सत्य का विरोधी, दुर्भाग्य शाली, दुष्ट पुरुषों के साथ सम्बन्ध रखने वाला, बहुत से रोगों से युक्त और दुर्जन स्वभाव वाला होता है।

चार रेखाओं के साथ चार बिन्दु होते हैं, अत: शुभ व अशुभ फल समान हो जाने से उक्त अशुभ फल को ही प्रधान मानना चाहिए।

**चेत्पञ्चमस्थः कुमुदात्मबन्धुः**
**सर्वंसहानायकमानमुक्तम् ।**
**निःस्वं विधत्ते व्यसनैरुपेतं**
**प्राज्यारिपक्षं च विनष्टशीलम् ॥५५॥**

'अथेदानीं पञ्चबिन्दुयुक्तचन्द्रफलमिन्द्रवज्रयाह'—

चेत्पंचमस्थ इति । चेद्यदि, कुमुदात्मबन्धुश्चन्द्र: पंचमस्थोबिन्दुपंचकयुक्तस्तदा, सर्वंसहा पृथ्वी तस्य नायकः स्वामी राजेत्यर्थः । तेन दत्तं यन्मानं सम्मानं तेन मुक्तं वर्जितं, निःस्वं दरिद्रं, व्यसनैर्विपद्भिरुपेतं युक्तं । प्राज्यारिपक्षं बहुशत्रुयुतं, विनष्टशीलं दुष्टस्वभावं विधत्ते कुरुते । तथा च वृद्धयवनः—

'प्रणष्टशीलं प्रचुरारिपक्षं निशाधिनाथः खलु पंचमस्थः ।
करोति दीनं व्यसनैः समेतं विवर्जितं भूपतिमानपूर्वैः ॥'' इति

जन्म के समय यदि चन्द्रमा पांच बिन्दुओं से युक्त राशि में स्थित हो तो व्यक्ति राज सम्मान से वर्जित, गरीब, मुसीबतों का मारा हुआ, बहुत से शत्रुओं से पराभूत तथा दुष्ट स्वभाव वाला होता है।

मूल ग्रन्थ में चन्द्रमा के छह् बिन्दुओं का फल उपलब्ध नहीं है। हम यहां उसका फल ग्रन्थान्तर से दे रहे हैं—

''विदेशसेवाविरतं कृतघ्नं षष्ठेऽरिवर्गैर्विजितं वृतांजग् ।
भवेन्मनुष्यं नृपपीडितं च कलत्रयानादिभिविप्रमुक्तम् ॥''

'छह् बिन्दुओं से युक्त राशि में यदि चन्द्रमा स्थित हो तो व्यक्ति विदेश में रोजगार करने वाला, कृतघ्न, शत्रुओं से पराजित, सम्मान से रहित, राजा से पीड़ित तथा स्त्री-पुत्र वाह्नादि के सुख से वर्जित होता है।'

**बहूपतापं जठरे सुतीव्रं**
**दरान्वितं सप्तमगः सितांशुः ।**

**उग्रं विरोधं बहुलं विधत्ते**
**पाटच्चरोग्रं च नतं प्रभूतम् ॥५६॥**

'अथसाम्प्रतं सप्तबिन्दुयुक्तंचन्द्रफलमुपजात्याह'—

बहूपतापमिति। सितांशुश्चन्द्रः सप्तमगः सप्तबिन्दुयुक्तश्चेत्तदा, जठरे उदरे, बहूपतापं बहुरोगं सुतीव्रमतिदृढं दरान्वितं भययुक्तमुग्रं कोपिनं, बहुलं प्रभूतं, विरोधं वैरं,पाटच्चरेषु चौरेपूग्रं निर्दयं प्रभूतं बहु नतं नीचं विधत्ते। यथा च वृद्धयवनः—

भयान्वितं तीव्रतरं विधत्ते, स्यात्सप्तमे वैरमनल्पमुग्रम्।
चन्द्रो नतं भूरि मलिम्लुचोग्रं रोगं नराणां जठरे प्रभूतम्॥' इति

यदि चन्द्रमा सात बिन्दुओं से युक्त राशि में स्थित हो तो मनुष्य पेट के बहुत से रोगों से पीड़ित, अत्यन्त डरपोक स्वभाव वाला, बहुत क्रोधी, बहुत वैर-भाव रखने वाला, निर्दयी, चोर एवं निन्दित कार्य करने वाला होता है।

**चण्डीशचूडामणिरष्टमस्थो-**
**ऽरिष्टं फलं वल्लभविप्रयोगम्।**
**स्वार्त्ति दरिद्रं सुभयं स्वनाशं**
**सानर्थकं शोकमनेकदुःखम् ॥५७॥**

'अथाधुनाष्टबिन्दुयुक्तफलमिन्द्रवज्रयाह'—

चण्डीति। चण्डीशचूडामणिश्चन्द्रोऽष्टमस्थोऽष्टबिन्दुयुक्तोऽरिष्टं फलं कष्टं, बल्लभः प्रियस्तस्य विप्रयोगो वियोगस्तम् स्वार्त्ति धनपीडां दरिद्रं दीनं सुभयं सुतरां भयं दरं स्वनाशं धननाशं सहानर्थेनानिष्टेन वर्तमानः सानर्थकस्तम् शोक-दुःखं विविध दुःखं करोति शेष। तथा च वृद्धयवनः—

धनस्य नाशं प्रियविप्रयोगं चन्द्रोऽष्टमे रिष्टफलं विधत्ते।
शोकं धनार्ति विविधं च दुःखं महाभयं दैन्यमनर्थयुक्तम्॥' इति

जन्म समय में चन्द्रमा आठ बिन्दुओं से युक्त हो तो अत्यन्त अरिष्ट फल करने वाला होता है। ऐसा मनुष्य प्रियजनों से वियुक्त, धन की पीड़ा वाला, दरिद्र, बहुत डरपोक, धन गंवाने वाला, अनिष्ट फल वाला व शोकादि से पीड़ित होता है।

**मंगल की रेखाओं का फल :**

**रेखास्थितस्तीव्रविलोचनश्चेद्**
**वृद्धि पशूनां सततं सुखानि।**
**आद्ये धरार्थाप्तिमनेकभोगं**
**सौख्यं प्रपूर्णं स्वमहाजनोत्थम् ॥५८॥**

रेखास्थित इति। तीव्रविलोचनो भौमः आद्ये प्रथम स्थाने रेखास्थितो रेखायुक्तोऽर्थादिकरेखायुक्तस्तदा पशूनां चतुष्पदानां वृद्धि सततं नित्यम् सुखानि धराभूमिरर्थं धनं तयोराप्तिर्लब्धिस्तासाम्, अनेकभोगं विविधभोगं स्वमहाजनोत्थं स्वमहाजनेभ्यो निजपूर्वजेभ्य उत्थमुत्पन्नं पूर्णं समस्तं सौख्यं करोतीति शेषः। यथाह वृद्धयवनः—

रेखास्थितो हि क्षितिवित्तलाभं करोति भौमः पशुवृद्धिमाद्ये।
सौख्यं च भोगं विविधं च पूर्णं महाजनोत्थं सततं सुखानि ॥' इति

यदि जन्म के समय मंगल एक रेखा से युक्त हो अर्थात् एक रेखा युक्त राशि में स्थित हो तो मनुष्य के यहां पशुधन की वृद्धि होती है। सुखपूर्वक जीवन व्यतीत करते हुए उसे धन व भूमि आदि का सुख प्राप्त होता है। वह अनेक प्रकार के अन्नपानादि से युक्त भोगों का तथा अपने पूर्वजों से प्राप्त किए गए सुख-साधनों का पूर्ण भोग प्राप्त करता है।

**द्वितीययातो नियतं महीजः**
**करोति लोके प्रियतां विकाशम्।**
**मतेर्विपक्षक्षयमात्मजस्त्री-**
**चितिं विमान्द्यं च समुन्नतं च ॥५९॥**

द्वितीयेति। मह्यां पृथिव्यां जायते इति महीजोभौमो द्वितीययातो रेखाद्वयां-युक्तश्चेत्तदा, नियतं निश्चयेन, लोकेजने, प्रियतां सौहार्दं मते बुद्धेः विकाशं प्रकाशं, विपक्षाः शात्रवस्तेषां क्षयं नाशं आत्मजः पुत्रः स्त्रीकलत्रं तयोश्चितिवृद्धिस्ताम्, विमान्द्यमारोग्यतां समुन्नतंमहान्तं करोति इति। तथा च वृद्धयवनः—

आरोग्यतां पुत्रकलत्रवृद्धि मतेर्विकाशं प्रियतां च लोके।
समुन्नतं शत्रु विनाशनं च करोति भौमो नियतं द्वितीये ॥' इति

जन्म समय यदि मंगल दो रेखाओं से युक्त राशि में हो तो

मनुष्य बहुत लोकप्रिय होता है। उसकी बुद्धि तीव्र एवं शत्रु पराजित होते हैं। उसके स्त्री पुत्रों की वृद्धि होती है। ऐसा मनुष्य निरोग शरीर वाला व महान् होता है।

तृतीय उर्वीतनयो विभूतिं
सौख्यानि बालेयमहाङ्गजानि।
अभ्युन्नतं सन्ततमिष्टलाभं
करोति भूयो विविधं प्रतापम् ॥६०॥

तृतीय इति। उर्वीतनयो भौमस्तृतीये रेखात्रययुक्तश्चेत्तदा, बालेया गर्दभाः महांगा उष्ट्रास्तेभ्यो जायन्ते सौख्यानि, अभ्युन्नतं सर्वतः समुन्नतं सन्ततं नित्यं, इष्टलाभमभीप्सितवस्तुप्राप्तिं, भूयो बहु, विविधमनेकं प्रतापं प्रभावं करोति विदधाति। तथा च वृद्धयवनः—

खरोष्ट्रजातानि सुसौख्यकानि नृणां विधत्ते क्षितिजस्तृतीये।
विभूतिमभ्युन्नतमिष्टलाभं भूरिप्रतापं विविधं च नित्यम् ॥' इति

यदि मंगल तीन रेखाओं से युक्त हो तो ऐसे व्यक्ति को गधों व ऊंटों से लाभ होता है। उसे सब तरफ से उन्नति मिलती है। उसे सदा मनवांछित फल मिलते रहते हैं और वह बहुत प्रतापी अर्थात् प्रभावशाली होता है।

अनेकलाभं नरनाथमानं
चतुर्थगोऽस्रो दयितं विधिज्ञम्।
भक्तं द्विजव्योमसदां च सौख्य-
सौभाग्यवृद्धिं कुरुते प्रतापम् ॥६१॥

अनेकेति। अस्रोभौमश्चतुर्थगो रेखाचतुष्टययुक्तश्चेत्तदा, अनेकानां विविध प्रकाराणां लाभं प्राप्तिं नरनाथैः राजभिर्मानं सम्मानं दयितं प्रियं विधिज्ञं विधिवेत्तारं द्विजा ब्राह्मणा व्योमसदो देवास्तेषां भक्तं सेवकं, सौख्यं च सौभाग्यं, च तयोर्वृद्धिमुपचयं, प्रतापं प्रभावं कुरुते। तथा च वृद्धयवनः—

भौमश्चतुर्थे कुरुते प्रतापं, सौभाग्यसौख्याभ्युदयं नितान्तम्।
प्रियं विधिज्ञं सुरविप्रभक्तं नरेन्द्रमानं विविधं च लाभम् ॥' इति

यदि मंगल चार रेखाओं से युक्त हो तो व्यक्ति को अनेक प्रकार का लाभ होता है। वह राजाओं से सम्मानित तथा राजप्रिय एवं विधिज्ञ

(भाग्य अथवा कानून को जानने वाला) होता है। वह ब्राह्मणों और देवताओं का भक्त, सुखी, धनी एवं सौभाग्यशाली होता है।

**लाभं सुवर्णस्य रुजाविनाशं**
**तनूजवित्ताप्तिमिलातनूजः ।**
**दद्यान्नराणां प्रचुरांशुसौख्यं**
**विवर्द्धनं पञ्चमसंस्थितश्चेत् ॥६२॥**

इलातनूजो भौमः पंचमसंस्थितः पंचरेखायुक्तश्चेत्तदा, नराणां मनुष्याणां, सुवर्णं प्रसिद्धं तस्य लाभं प्राप्तिं, रुजा रोगस्तस्य विनाशं क्षयं तनूजः पुत्रः वित्तं धनं तयोराप्ति लाभं प्रचुरांशुसौख्यं बहुवस्त्रसौख्यं विवर्धनं वृद्धि दद्यात् यच्छेदिति। तथा च वृद्धयवनः—

सुतार्थलाभं खलुपंचमस्थः क्षोणीसुतो यच्छति मानवानाम्।
हिरण्यलाभं बहुलांशुसौख्यं व्याधेर्विनाशं खलु वर्धनं च ॥' इति

जन्म समय यदि मंगल पांच रेखाओं से युक्त राशि में हो तो मनुष्य को सोने का लाभ होता है। उसके समस्त रोगों का नाश होता है। धन व पुत्रों का लाभ होता है। उसे बहुत से वस्त्र व प्रभूत सुख प्राप्त होता है।

**षष्ठाश्रितो वसुमतीतनयाभिधानो**
**नित्यं करोति किल बान्धवसङ्गमं च।**
**नृणां सदेह निखिलोत्तमभोजनानि**
**नाशं द्विषोऽनवरतं सुकृतार्थसिद्धिम् ॥६३॥**

षष्ठाश्रित इति। वसुमतीतनयाभिधानो भौमः षष्ठाश्रितः षड्रेखायुक्त-स्तदा नृणां मनुष्याणां नित्यं किल निश्चयेन बान्धवानां सगोत्राणां संगमं सम्बन्धं, इहास्मिन्, योगेसदा नित्यं निखिलोत्तमभोजनानि सर्वोत्तमभोजनानि, द्विषः शत्रोर्नाशं क्षयमनवरतं नित्यं सुकृतार्थसिद्धि धर्मार्थसिद्धि करोति विदधात्यिर्थः। तथा च वृद्धयवनः—

'षष्ठेऽरिनाशं कुरुते महीजः समागमं बन्धु जनेन नित्यम्।
नित्यं च सर्वोत्तमभोजनानि धर्मार्थसिद्धि सततं नराणाम् ॥' इति

यदि मंगल छह रेखाओं से युक्त राशि में स्थित हो तो उसके बन्धुओं से उसका सदा मेल रहता है। उसे सर्वोत्तम भोजन प्राप्त होता है। उसके शत्रुओं का नाश और धन व धर्म की खूब वृद्धि होती है।

**भौमो विज्ञानविद्याप्तिं सप्तमे चेन्नृपागमम् ।**
**रतोपलब्धिमिष्टाप्ति सदाच्छादनभोजनम् ।।६४।।**

भौम इति । भौमो मंगल: सप्तमे सप्तरेखायुक्तश्चेनदा, विज्ञानं शिल्प-विद्या, अष्टादशविद्याश्चतासां प्राप्ति लाभं नृपागमं नृपो राजा तस्मादागमं लाभं, रतं मैथुनं तस्योपलब्धि प्राप्ति इष्टाप्तिमभीष्टवस्तुप्राप्ति सदाच्छादनभोजनं उत्तमवस्त्रभोजनं कुरुत इति शेष: । तथा च वृद्धवयन:—

'क्षोणीसुतो यच्छति सप्तमस्थो विज्ञानविद्यागममिष्टलाभम् ।
सदासनाच्छादनभोजनानि रतोपलब्धि जगतीशलाभम् ।।' इति

यदि मंगल सात रेखाओं से युक्त राशि में स्थित हो तो मनुष्य शिल्प शास्त्र का ज्ञाता, विद्यावान् और राजाओं के द्वारा सम्मानित व लाभान्वित होता है । उसे सुन्दर स्त्रियों का उत्तम सुख, मनवांछित वस्तुओं की प्राप्ति तथा उत्तम वस्त्र भोजनादि मिलते हैं ।

**अङ्गारक: प्रकुरुते कृषिकर्म्मसिद्धि**
**वाणिज्यलाभमिह विश्वसुखप्रपुष्टम् ।**
**भूर्ति विशां ननु समुन्नतमुन्नति च**
**चेदष्टमेऽनवरतं निजकर्म्मसिद्धिम् ।।६५।।**

अंगारक इति । अंगारको मंगलोऽष्टमेऽष्टरेखायुक्तस्तदा विशां नराणां कृषिस्तस्या: कर्म क्रिया: हलप्रवहणमित्यादि तस्यसिद्धि सफलतां प्राप्ति, वाणिज्यं व्यापारस्तस्माल्लाभं, विश्वानि सर्वाणि सुखानि तै: प्रपुष्टं विवर्धनं, भूतिमैश्वर्य, समुन्नतं महान्तं उन्नतिं वृद्धि अनवरतं नित्यं निजकर्मणां सिद्धि प्रकुरुते विदधते । यथात्र वृद्धयवन:—

'भौमोऽष्टमेभूमिमथोन्नतिं च नृणां विधत्ते खलु कर्मसिद्धिम् ।
वाणिज्यलाभं कृषिकर्मसिद्धि समुन्नतं सर्वसुखै: प्रपुष्टम् ।।' इति

यदि मंगल आठ रेखाओं से युक्त राशि में स्थित हो तो मनुष्य को कृषि कर्म से खूब लाभ होता है । वह व्यापार में भी वृद्धि को प्राप्त करता है । उसे सम्पूर्ण सुखों की प्राप्ति, ऐश्वर्य, ऊंचाई अर्थात् ऊंची पदवी और उन्नति मिलती है । साथ ही वह व्यक्ति सदा सफलता प्राप्त करता है ।

**मंगल के बिन्दुओं का फल :**

**स्थाने यदाऽऽद्येऽक्षसमाश्रितो बला-**
**जातो दयां यच्छति जन्मिनां ततः।**
**हानिं धनानां गुरुलोचनामयं**
**सौख्यं न कुर्य्याद् धिषणापरिक्षयम् ॥६६॥**

स्थान इतीन्द्रवंशयाऽऽह। बला पृथ्वी तस्यां जातः उत्पन्नो बला जातो भौमो यदा आद्ये प्रथमस्थानेऽक्षसमाश्रितो बिन्दुसमाश्रितोऽर्थादेकबिन्दुयुक्त इत्यर्थः। चेत्तदा, जन्मिनां प्राणिनां मनुजानामिति यावत् दयां कृपां यच्छति ददाति कुरुत इत्यर्थः। ततस्तस्मात् कारणाद् धनानां द्रव्याणां हानिं क्षतिं, गुरु बलवद् लोचनाभयं नेत्ररोगं कुर्यात्। सौख्यं न, धिषणाबुद्धिस्तस्याः परिक्षयं नाशं कुर्याद् विद्ध्यात्। तथा च वृद्धयवनः—

'विन्दुस्थितो भूतनयो यदाऽऽद्ये स्थाने दयां यच्छति मानवानाम्।
तदर्थहानिं गुरुदृष्टिरोगं मतेर्विनाशं कुरुते न सौख्यम्॥' इति

जन्म समय यदि मंगल की स्थिति एक बिन्दु वाली राशि में हो तो मनुष्य दूसरों की दया पर जीता है। अतः उसे सदा धन की हानि होती है। उसकी आंखों में बड़ा रोग होता है। सदा सुख का अभाव और बुद्धि का नाश होता है।

**कुर्याद् द्वितीये वसुधातनूजनि-**
**र्दाहं मनीषासुहृदां विनाशनम्।**
**शीर्षार्त्तिकां चौरकृतं प्रमोषण-**
**मुग्रं ज्वरं पित्तकमङ्गनाशुचम् ॥६७॥**

कुर्यादिति। वसुधातनूजनिर्भौमो, द्वितीये बिन्दुद्वययुक्तश्चेत्तदा, दाहं तपनं, मनीषा बुद्धिस्तस्याः सुहृदो मित्राणि तेषां च विनाशनं क्षयं शीर्षं शिरस्त-स्मिन्नर्तिकां पीडा चौरैः क्रियते चौरकृतं प्रमोषणं हरणमर्थाच्चौरतो धनहानि-रित्यर्थः। उग्रमुत्कटं ज्वरं जूर्तिं पित्तं मायुमंगनायाः स्त्रियाः शुचं शोकं कुर्यात्। यथात्र वृद्धयवनः—

शिरोऽर्त्तिदाहं ज्वरपित्तमुग्रं प्रमोषणं चौरकृतं सदैव।
प्रियावियोगं मतिमित्रनाशं भौमो द्वितीये कुरुते नराणाम्॥' इति

यदि मंगल दो बिन्दुओं वाली राशि में अवस्थित हो तो शरीर में संताप, बुद्धि का नाश व मित्रों की हानि होती है। उसके धन को चोर

चुरा लेते हैं। उसे तीव्र ज्वर सताता है। वह व्यक्ति पित्त विकार व स्त्री शोक से पीड़ित होता है।

**विश्वम्भरादेहभवस्तृतीयगो**
**लौल्यापमानं विषमार्त्तिमङ्गिनाम्।**
**उग्रं विरोधं सततं पराजितं**
**लोकैस्तथा कुत्सितबुद्धिसङ्गमम् ॥६८॥**

विश्वम्भरेति। विश्वंभरादेहभवो भौमस्तृतीयगोबिन्दुत्रययुक्तस्तदाऽङ्गिनां प्राणिनां मानवानामिति यावत् लौल्यं चपलतामपमानमवज्ञां निरादरमिति यावत्। विषमां दारुणामार्तिं पीडां सततं नित्यमुग्रंमहद्विरोधं वैरं, लोकैर्जनैः पराजितं पराभूतं, कुत्सिता निन्दिता बुद्धिर्मतिर्येषां तैः संगमः संगस्तम् कुर्यादिति शेषः। यथा वृद्धयवनभणितिरियम्—

'भौमस्तृतीये विषमार्त्तिलौल्यं धत्ते नराणां च तथापमानम्।
कुबुद्धिभिः संगममुग्रवैरं पराजितं प्राणभृता मदैव ॥' इति

जन्म समय यदि मंगल तीन बिन्दुओं से युक्त राशि में स्थित हो तो मनुष्य के स्वभाव में चंचलता आती है। उसे जीवन में अपमान व भयंकर पीड़ा सहनी पड़ती है। उसे शत्रुओं की अधिकता, उत्कट वैर, लोगों से पराजय आदि फल मिलते हैं और वह दुष्ट जनों की संगति में रहने वाला होता है।

**पृथग्विधान्वैरविवादसञ्ज्ञान्**
**महीसुतः साध्वसमातनोति।**
**हानिं महार्त्तं व्यसनं च वार-**
**वध्वाः पणं प्राणभृतां चतुर्थे ॥६९॥**

पृथगिति। महीसुतो भौमश्चतुर्थे बिन्दुचतुष्टययुक्तश्चेत्तदा प्राणिनां नराणां पृथग् विधान् अनेकरूपाणि, वैराणि विद्वेषा विवादाः कलहास्तान्, हानिं क्षतिं, महार्त्तमतिदुःखं, वारवध्वा वेश्याया व्यसनं सम्भोगमद्यपानादि जनितदोषम्। पणं द्यूतमातनोति विदधाति। यथा वृद्धयवनः—

'विवादवैराणि पृथग्विधानि भौमश्चतुर्थे कुरुते नराणाम्।
द्यूतं च वेश्याव्यसनं महार्त्तं पराजयं साध्वसमेव हानिः ॥' इति

जन्म समय मंगल यदि चार बिन्दुओं से युक्त राशि में हो तो

मनुष्यों के साथ अनेक प्रकार की शत्रुता व कलह व होती है। इसी कारण उसे सदा बहुत कष्ट और हानि सहनी पड़ती है। उस व्यक्ति के अन्दर वेश्याओं व जुए के प्रति आकर्षण होता है।

**पृथ्वीसुतः पञ्चमसंस्थितो यदा**
**कुर्याद्वियोगं सुतरामसौख्यकम् ।**
**औपक्षयं सन्ततमिष्टनाशनं**
**वित्तप्रतापात्मजहानिमङ्गिनाम् ॥७०॥**

पृथ्वीसुत इति। पृथ्वीसुतो भौमः पंचमसंस्थितः पंचविन्दुसंयुक्तश्चेत्तदा अंगिनां शरीरिणां मर्त्यानामिति यावत्। सुतरामतिशयं वियोगं विच्छेदमसौख्यकं सौख्याभावं, औपक्षयं क्षयासन्नरोगं, सन्ततं नित्यमिष्टनाशनमभीप्सितनाशं वित्तं धनं प्रतापः प्रभावः आत्मजः पुत्रस्तेषां हानिः क्षतिस्ताम् कुर्यात्। यथा वृद्धयवनः—

असौख्यमौपक्षयमिष्टनाशं पुत्रार्थहानिं सुतरां वियोगम्।
करोति भौमः खलु पंचमस्थः प्रतापहानिं सततं नराणाम् ॥' इति

यदि मंगल की स्थिति पांच बिन्दुओं वाली राशि में हो तो मनुष्य को बहुत वियोग सहना पड़ता है। उसके जीवन में सुख की कमी और टी० बी० (क्षय) जैसे रोगों की उत्पत्ति होती है। उसे प्रिय वस्तुओं की हानि उठानी पड़ती है तथा साथ ही धन, पुत्र व प्रभाव की भी हानि होती है।

**गोत्राकुमारो यदि षष्ठसंस्थितो**
**लोकैः सदा श्रेष्ठतरैर्विवर्जितम्।**
**युक्तं विषादेन धनाननस्य न**
**सौख्यं नरं दुःखितमुग्रदुर्विधम् ॥७१॥**

गोत्रेति। गोत्राकुमारोभौमः, षष्ठसंस्थितः षड्बिन्दुयुक्तश्चेत्तदा सदा नित्यं श्रेष्ठतरैरत्युत्तमजनैर्विवर्जितं रहितं धनाननस्य धनप्रभृतेर्विषादेनावसादेन नाशेनेति यावत्। दुःखितं पीडितमुग्रदुर्विधं महद् दरिद्रं सौख्यं न कुर्यादिति शेषः। तथा च वृद्धयवनः—

'षष्ठेस्थितो दुःखितदीनमुग्रं सदैव वित्तादिविषादयुक्तम्।
करोति भौमः पुरुषं विहीनं नित्यं जनैः श्रेष्ठतरैर्न सौख्यम् ॥' इति

यदि मंगल छह बिन्दुओं से युक्त राशि में स्थित हो तो मनुष्य

को उत्तम लोगों की सहायता व संगति नहीं मिलती। वह व्यक्ति धनादि के नाश से सदा दुःखी रहता है। उसे सुखों की कमी और कष्ट होते रहते हैं। अतः वह सदा दरिद्र ही रहता है।

**विधत्त आरो जनने सरीसृप-**
**भीतिं प्रलौल्यं विषये जनुर्भृताम्।**
**चक्षूरसज्ञाप्रभवं प्रसूतिजं**
**वित्तस्य हानिं प्रतिरोधिलोकतः ॥७२॥**

विधत्त इति। आरोभौमः सप्तम इति शेषः। अर्थात् सप्तविन्दुयुक्त इत्यर्थः। चेत्तदा जनुर्भृताः जन्मिनां नराणामितियावत्। सरीसृपाः सर्पास्तेभ्यो भीतिर्भयं तत्। विषये रूपरसगन्धशब्दस्पर्शे प्रलौल्यं चाचल्यं, चक्षुर्नेत्रं रसज्ञा जिह्वा तयोः प्रभवो जनितं तत्। प्रसूतिजं दुःखं प्रतिरोधिलोकतश्चौरजनतः वित्तस्य क्षतिं नाशं विधत्ते। तथा च वृद्धयवनः—

'चौरार्थहानिं ससरीसृपोत्थं भयं विधत्ते कुजसप्तमस्थः।
जिह्वाक्षिरोगोद्भवमेव दुःखं सदा नराणां विषये प्रलौल्यम्॥' इति

यदि मंगल सात विन्दुओं से युक्त राशि में हो तो मनुष्य को ऐसे जीव-जन्तुओं से भय होता है, जो विलों में निवास करते हैं। वह विषय वासना में आसक्त, नेत्र व जीभ के रोगों से पीड़ित होता है। वह चोरों से हानि प्राप्त करता है अथवा शत्रुओं के कारण अपनी सम्पत्ति गंवा देता है।

**विशां विधत्ते विपुलातनूजो**
**हानिं गृहिण्या मृतितुल्यरोगान्।**
**विघातमस्त्रैः परतः सुखं चा-**
**वज्ञां परैर्वञ्चनमष्टमस्थः ॥७३॥**

विशामिति। विपुलातनूजो भौमोऽष्टमस्थोऽष्ट विन्दुयुक्तश्चेत्तदा विशां मनुष्याणां, गृहिण्याः स्त्रिया हानिं क्षतिं मृति तुल्यरोगान् मृत्युसदृशरोगान्, अस्त्रैर्मोहनादिभिर्विघातं प्रहारमवज्ञामनादरं परैः शत्रुभिर्वञ्चनं प्रतारणं परत उत्तरवयसि सुखं विधत्ते। यथा वृद्धयवनः—

'पराभवं मृत्युसमानरोगान् कलत्रहानिं परवञ्चनानि।
भौमोऽष्टमस्थः कुरुते नराणां शस्त्राभिघातं परतः सुखं च॥' इति

यदि मंगल आठ विन्दुओं वाली राशि में स्थित हो तो मनुष्य को स्त्री की हानि होती है और मृत्यु तुल्य कष्ट देने वाले रोग से पीड़ा होती है। उसके शरीर पर अस्त्रादिकों का प्रहार होता है। वह सर्वत्र अपमान को प्राप्त करता है। शत्रु उसे धोखा देते हैं किन्तु उसे अपनी वृद्धावस्था में कुछ सुख शान्ति प्राप्त हो जाती है।

**बुध की रेखाओं का फल :**

**स्थानस्थितश्चान्द्रमसायनो गत-**
**प्रत्यर्थिपक्षं कुरुते यदाऽऽदिमे।**
**स्थाने सविद्यं च विवेकसंयुतं**
**शीलार्थकं स्फारहितं च निर्भरम् ॥७४॥**

स्थानस्थित इति। चान्द्रमसायनो बुधो यदा आदिमे स्थाने स्थानस्थितः, एकरेखयायुक्तस्तदा गतप्रत्यर्थिपक्षं विगतशत्रुपक्षं शत्रुरहितमित्यर्थः। सविद्यं विद्यासम्पन्नं, विवेकसंयुतं पृथगात्मतया युक्तं शीलमेवार्थो धनं यस्य तम् निर्भरं नितान्तं स्फारहितं बहुमित्रं कुरुत इति। यथा वृद्धयवनः—

'रेखास्थितः सोमसुनो यदाद्ये, स्थाने तदा शीलधनं विनीतम्।
विद्याविवेकादियुतं नितान्तं प्रभूतमित्रं विगतारिपक्षम्॥' इति

यदि बुध जन्म के समय, एक रेखा से युक्त राशि में स्थित हो तो मनुष्य शत्रुओं से रहित होता है। उसके पास विद्या व विवेक प्रभूत मात्रा में होता है। वह बहुत से मित्रों से युक्त और शील सम्पन्न होता है।

**रेखास्थितस्त्रिदिवनाथसमं द्वितीये**
**स्थाने सितांशुतनयः सुभगं सुरम्यम्।**
**विज्ञं सुशीलमथ देहभृतं सुरूपं**
**जातं करोति सततं बहुमानपानम् ॥७५॥**

रेखास्थित इति। सितांशुतनयो बुधो द्वितीये स्थाने रेखाद्वययुक्तस्तदा जातं मनुष्यं त्रिदिवनाथसमं देवतासदृशं सुभगं सज्जनं सुरम्यमतिमनोहरं विज्ञं निपुणं, सुशीलं सुन्दरस्वभावं, सुरूपं सुतरां सौन्दर्यं सततं नित्यं बहुमानपानं प्रभूतसम्मान-पानं करोति। यथाऽऽहवृद्धयवनः—

'स्थानस्थितो देवसमं प्रसूतं विज्ञं सुशीलं बहुमानपानम् ।
स्थाने द्वितीये शशिजो विधत्ते नरं सुरूपं सुभगं सुकान्तम् ।।' इति

यदि बुध दो रेखाओं से युक्त राशि में स्थित हो तो मनुष्य देवताओं के समान निर्मल, सज्जन व अति सुन्दर होता है। वह व्यक्ति स्वभाव से निपुण और मृदु, सुरूपवान् तथा बहुत मान-सम्मान पाने वाला होता है।

**स्थाने तृतीयक इलापतिलोकपूज्यं**
**कुर्यात्सुधाकरसुतः सुभगं विधिज्ञम् ।**
**वाक्यं सदा गतमलं बहुपुण्यराज्यं**
**कान्तं भवं मनुभवं हतवैरिपक्षम् ।।७६।।**

स्थान इति। सुधाकरसुतो बुधस्तृतीयके स्थानेऽर्थात्रिरेखात्मकयुक्तो चेत् भवं जातं मनुभवं मनुष्यं इलापतयो राजानो लोका जनाः, तेषां पूज्योऽर्च्यस्तम्, सुभगं सज्जनं विधिज्ञं विधानविदं सदा गतमलं निर्मलं वाक्यं वचनं बहुपुण्यराज्यं प्रभूतपुण्यराज्यं, कान्तं सुन्दरं वैरिणां शत्रूणां पक्षः समूहो हन्यते येन तथा तम् कुर्यात् । यथा च वृद्धयवनः—

'तृतीयके सोमसुतः करोति, प्रसन्नवाक्यं नृप लोकपूज्यम् ।
नरविधिज्ञं सुभगं मनोज्ञं हतारिपक्षं बहुधर्मराज्यम् ।।' इति

यदि बुध की स्थिति तीन रेखाओं वाली राशि में हो तो मनुष्य राजसी ठाठ-बाट वाला, राजा व जनता से परम सम्मानित, सज्जन व विधान अर्थात् कानून का ज्ञाता होता है।

ऐसा व्यक्ति निष्कपट वचन बोलने वाला, बहुत पुण्य कार्य करने वाला और बड़े राज्य वाला, मनोहर शरीर वाला और शत्रुहन्ता होता है।

**सौम्यः सदा विधिविदं दयितातिथिं च**
**सास्त्रेरतं यदि करोति चतुर्थसंस्थः ।**
**मान्यं स्वबान्धवजनेषु भवं सुरूपं**
**मेधाविनं च निरतं नियमोपवासे ।।७७।।**

सौम्य इति। सौम्यो बुधश्चतुर्थसंस्थो रेखाचतुष्टययुक्तश्चेत्सदा भवं जातं विधिविदं विधानज्ञं दयितातिथिमतिथिप्रियं, शास्त्रे षड्शास्त्रे वेदाङ्गे इति यावत् ।

रतं निरतं, स्वबान्धवजनेषु निजसगोत्रलोकेषु मान्यं पूज्यं सुतरां रूपं सौन्दर्यं मेधाविनं धारणाबुद्धिभाजं नियमोपवासे व्रतोपवासे निरतमासक्तं करोति। तथा च यवनपरिवृद:—

'बुधश्चतुर्थे कुरुते सुरूपं प्रियातिथिं बन्धुजनेषु मान्यम्।
मेधाविनं शास्त्ररतं विधिज्ञं व्रतोपवासादिरतं सदैव॥' इति

यदि बुध चार रेखाओं से युक्त किसी राशि में स्थित हो तो मनुष्य विधिशास्त्र का जानकार, अतिथि सत्कार करने वाला, खूब शास्त्रों का अध्ययन करने वाला, बन्धुजनों द्वारा सम्मानित, सुन्दर रूप वाला, मेधावी व व्रतोपवासादि करने वाला होता है।

**दाक्षायणीपतिजनिर्यदि पञ्चमस्थो**
**देशाधिपत्यमथ देहभृतां प्रतापम्।**
**कीर्त्ति करोति विजयं बहुलान्नपानं**
**ग्रामाधिपं पुरपतिं च बलाधिनाथम्॥७८॥**

दाक्षायणीति। दाक्षायणीयतिजनिर्बुधो यदि पंचमस्थः पंचरेखायुक्तः, तदा देहभृतां शरीरिणां देशो जनपदस्तस्याधिपत्यं स्वामित्वं, प्रतापं प्रभावं, कीर्ति यशः विजयं जयं बहुलान्नपानं, प्रभूतान्नपानं ग्रामाधिपं ग्रामस्वामिनं, पुरपतिं नगरस्वामिनं, बलाधिनाथं भूमिपतिं सेनापतिं वा करोति। तथा च वृद्धयवनः—

'करोति सौम्यः खलु पंचमस्थो नृणां पुरग्रामपतिं बलानाम्।
देशाधिपत्यं प्रचुरान्नपानयशः प्रतापं विजयं सदैव॥' इति

यदि बुध जन्म के समय पांच रेखाओं से युक्त राशि में स्थित हो तो मनुष्य देशाधिप अर्थात् छोटे प्रदेश जनपदादि का अधिपति, प्रतापी एवं यशस्वी होता है। वह सदा विजयी व अन्नादि की समृद्धि से युक्त होता है। ऐसा व्यक्ति कई ग्रामों, नगरों व भूमि का मालिक होता है। अर्थात् ऐसा व्यक्ति राजतुल्य सम्पत्ति व पदवी वाला होता है।

**सद्धर्म्मविद्याविनयैः समन्वितं**
**कुर्यात्कृतज्ञं निजलोकसंयुतम्।**
**जातं नरं नीतिपरायणं जित-**
**प्रत्यर्थिपक्षं यदि षष्ठगो बुधः॥७९॥**

सद्धर्मेति। बुधः षड्गः षड्रेखायुक्तश्चेत्तदा जातमुत्पन्नं नरं सत्यमनृतं धर्मः पुण्यं विद्यां विद्याऽनुनयस्तैः समन्वितं युक्तं कृतज्ञमुपकारविदं निजलोकैः स्वीय जनैः संयुतं नीत्यां नये परायणं तत्परं जितप्रत्यर्थिपक्षं जित शत्रुपक्षं कुर्याद् विदधीत। तथा च वृद्धयवनः—

'करोति सौम्यः खलु षष्ठ संस्थो जितारिपक्षं स्वजनैः समेतम्।
विद्यान्वितं नीतिपरं कृतज्ञं सद्धर्मयुक्तं विनयान्वितं च॥' इति

जन्म के समय यदि बुध छह रेखाओं से युक्त हो तो मनुष्य सत्य, धर्म, विद्या और विनय से युक्त होता है। वह किए गए उपकार को मानने वाला, नीतिशास्त्र का जानकार और समस्त शत्रुओं को जीतने वाला होता है।

**ज्ञः सप्तमस्थः सुसमृद्धिसौख्य-**
**समन्वितं तीर्थपरायणं च।**
**स्त्र्याप्ति सुशीलं कुरुते रतेश्च**
**भोगस्य सौख्यं विमलं शरीरम्॥८०॥**

ज्ञइति। ज्ञो बुधः सप्तमस्थः सप्तरेखायुक्तस्तदा सुसमृद्धिसौख्यसमन्वित-मतीव संपत्सौख्यंसंयुक्तं तीर्थपरायणं तीर्थेषु गंगद्वारः प्रभृतिक्षेत्रेषु परायणं तत्परं स्त्र्याप्ति कलत्रलाभं सुशीलं सुन्दरस्वभावं रतेः सुरतस्य सम्भोगस्य परिमलस्य सौख्यं, शरीरं देहं विमलं मलरहितं स्वच्छमित्यर्थः। कुरुते विधत्त इति। तथा च वृद्धयवनः—

'कलत्रलाभं रतिभोगसौख्यं कलत्रसंस्थः प्रकरोति सौम्यः।
तीर्थाश्रयं सौख्यसमृद्धियुक्तं प्रसन्नमूर्ति मनुजं सुशीलम्॥' इति

यदि बुध सात रेखाओं से युक्त हो तो मनुष्य ज्ञानी, अत्यन्त सम्पत्तिशाली, सुख से युक्त तथा तीर्थ स्थानों का आश्रय लेने वाला होता है। उसे अच्छी स्त्री की प्राप्ति होती है। ऐसे व्यक्ति का स्वभाव सुन्दर होता है तथा उसे स्त्री सुख एवं चन्दनादि सुगन्धित द्रव्यों की प्राप्ति होती है। उसका शरीर सुन्दर व स्वच्छ होता है।

**यद्यष्टमस्थोऽमृतरश्मिसम्भवः**
**साच्छादनं वित्तचतुष्पदान्वितम्।**
**पूज्यं च सर्वत्र सुताङ्गनोद्भव-**
**सौख्यप्रयुक्तं महिमाभिधान्वितम्॥८१॥**

यदीति। यदि चेदमृतरश्मिसम्भवो बुधोऽष्टमोऽष्टभी रेखाभिर्युक्तो भवेत्तदा सहाच्छादनैः वर्तमानस्तम् सुन्दरवस्त्रयुक्तं, वित्तेन धनैः चतुष्पदैः पशुभिरन्वितं युक्तं, सर्वत्र सर्वस्मिन् स्थाने पूज्यं मान्यं सुतः पुत्रोऽगना स्त्री ताभ्यामुद्भवमुत्पन्नं सौख्यं तेन युक्तं महिम्ना महता भावेनान्वितं युक्तं कुरुत इति शेषः। तथा च वृद्धयवनः—

'चतुष्पदाच्छादनवित्तयुक्तं नरं प्रसूतं शशिजोऽष्टमस्थः।
कलत्रपुत्रोद्भवसौख्ययुक्तं सर्वपूज्यं महिमासमेतम् ॥' इति

जन्म समय यदि बुध आठ रेखाओं से युक्त हो तो मनुष्य वस्त्रों से सुसज्जित, धन-धान्य से युक्त तथा चतुष्पदों से युक्त होता है। वह सर्वत्र सम्मान पाने वाला, पुत्रों व स्त्रियों के सुख से युक्त और गौरव वाला होता है।

**बुध के बिन्दुओं का फल :**

**शीतांशुजातः प्रथमे सदायो**
**मायाप्रयुक्तं विनयोज्झितं च।**
**कुर्य्यात्कुशीलं रहितं धनेन**
**दानेन नित्यं पिशुनं सुपापम् ॥८२॥**

शीतांशुजात इति। शीतांशुजातो बुधः प्रथमे आद्यस्थाने सह दायेन बिन्दुना वर्तमानस्तदा मायया कपटेन प्रयुक्तं सहितं विनयेनानुनयेनोज्झितं वर्जितं कुशीलं कुत्सितं शीलं स्वभावं नित्यं सदा धनेन द्रव्येण दानेन त्यागेन रहितं वर्जितं पिशुनं खलं सुपापमतिपापं कुर्याद् विदध्यात्। यथा च वृद्धयवनः—

'बिन्दुस्थितः सोमसुतोऽतिपापं करोति मर्त्यं प्रथमे खलं च।
मायान्वितं दानधनैर्वियुक्तं सदा कुशीलं विनयेन हीनम् ॥' इति

यदि बुध एक बिन्दु से युक्त राशि में स्थित हो तो मनुष्य कपटी, शिक्षा से रहित तथा दुष्ट स्वभाव वाला होता है। वह धन व दान से रहित, दुर्जन तथा अति पापी होता है। वृद्ध यवन के मतानुसार ऐसा व्यक्ति उक्त दुर्गुणों के अतिरिक्त दुश्चरित्र एवं ढोंगी होता है।

**वैरं स्वलोकैः सह भूरिदुःखं**
**रोगैरनेकैः सहितं कृतघ्नम्।**

**सूते मनुष्यं कठिनं पराभि-**
**भूतं द्वितीये शिशिरांशुसूनुः ॥८३॥**

वैरमिति। शिशिरांशुसूनुर्बुधो द्वितीये रेखाद्वययुक्तश्चेत्तदा मनुष्यं मनुजं स्वलोकैर्निजजनैः सह समं वैरं विरोधं, भूरिदुःखं बहुदुःखमनेकैर्विविधै रोगैः सहितं कृतघ्नमुपकारिजनापकारिणं कठिनं क्रूरं परैः शत्रुभिरभिभूतं किं कर्त्तव्य-मर्थात्किर्त्तव्याकर्त्तव्य ज्ञानशून्यमित्यर्थः। सूते जनयतीति। तथा च वृद्धयवनः—

'प्रभूतदुःखं स्वजनैर्विरोधं पराभिभूतं कठिनं कृतघ्नम्।
द्वितीयसस्थो हिमरश्मिपुत्रो नरं प्रसूते बहुरोगयुक्तम् ॥' इति

यदि बुध दो विन्दुओं से युक्त राशि में स्थित हो तो मनुष्य अपने लोगों से वैर भाव रखने वाला, अत्यन्त दुःखी तथा कई प्रकार के रोगों से पीड़ित होता है। वह कृतघ्न, क्रूर स्वभाव वाला तथा अपने शत्रुओं से सदा भयभीत रहने वाला होता है।

**कुर्य्यान्नराणां मलदिग्धविग्रहं**
**तेजोविहीनं नरपालपीडितम्।**
**नाशं युवत्यङ्गभुवां कुचीवरं**
**नित्यं तुषारांशुसुतस्तृतीयगः ॥८४॥**

कुर्यादिति। तुषारांशुसुतो बुधस्तृतीयगो बिन्दुत्रययुक्तस्तदा नराणां मलं पापं तेन दिग्धो लिप्तो विग्रहः शरीरं यस्य तथोक्तं तम्। तेजसा वीर्येण विहीनं रहितं नरपालेन राज्ञा पीडितं दुःखितं युवतिः स्त्री अंगभुवः पुत्रास्तेषां नाशं क्षयं नित्यं सदा कुचीवरं कुत्सितवस्त्रं कुर्याद् विदध्यात्। तथा च वृद्धयवनः—

'तृतीयगः पुत्रकलत्रनाशं करोति सौम्यः सततं कुचैलम्।
तेजोविहीनं मलदिग्धदेहं सम्पीडितं भूपतिना सदैव ॥' इति

जन्म समय यदि बुध तीन विन्दुओं से युक्त हो तो मनुष्य मैला-कुचैला रहने वाला, तेज से रहित तथा राजा से पीड़ित होने वाला होता है।

उसके स्त्री पुत्रादिकों का नाश हो जाता है तथा वह सदा गन्दे वस्त्र पहनने वाला होता है।

**चतुर्थयातो यदि रौहिणेयः**
**प्रसूतिजं भूरि करोति सस्यम्।**

**सेवासमेतं गतिशीलसौख्यं**
**जातं विमुक्तं विनयेन नित्यम् ।।८५।।**

चतुर्थेति। यदि रौहिणेयो बुधश्चतुर्थयातो बिन्दुचतुष्टययुक्तस्तदा जातमुत्पन्नं मर्त्यं मनुष्यं भूरि बहु प्रसूतिजं दुःखं सेवासमेतं सेवावृत्यायुक्तं गत-शीलसौख्यं शुद्धचरितेन सौख्येन च रहितं नित्यं सर्वदा विनयेन शिक्षया, विमुक्तं वर्जितं करोति विदधाति। यथाऽस्मिन् वृद्धयवनः—

'चतुर्थगः शीतकरस्य पुत्रः प्रभूतदुःखं कुरुते मनुष्यम्।
शीलेन मुक्तं विनयेन हीनं सेवात्मकं सौख्यविवर्जितं च ।।' इति

यदि बुध चार बिन्दुओं से युक्त हो तो मनुष्य बहुत दुःखी रहने वाला, दूसरों के अधीन रहकर सदा सेवा करने वाला तथा दुश्चरित्र होता है। ऐसा व्यक्ति सुख से रहित जीवन बिताने वाला तथा दुर्विनीत होता है।

**सौम्यः पञ्चम आमयाभिभूतं**
**नष्टार्थं च परैर्जितं कुशीलम्।**
**सौख्योनं गुरुदेवताविमुक्तं**
**पुत्रोनं परतर्ककं करोति ।।८६।।**

सौम्य इति त्रिष्टुभजात्याह। सौम्यो बुधः पंचमे पंचबिन्दुयुक्तश्चेत्तदा, आमयो रोगस्तेनाभिभूतं पीडितो यस्तम्। नष्टार्थं विनष्टधनं, परैः शत्रुभिर्जितं कुशीलं दुष्टस्वभावं सौख्येनोनं रहितं गुरुराचार्यः देवतादेवास्तैर्विमुक्तं रहितं पुत्रोनं पुत्ररहितं परतर्ककं परेभ्योऽन्येभ्यो याचनाकृतम् करोति विदधाति। तथा च वृद्धयवनः—

'नष्टात्मजं नष्टधनं कुशीलं रोगाभिभूतं परतर्ककं च।
परैर्जितं शत्रुगुरुप्रमुक्तं करोत्यसौख्यं खलु पंचमस्थः ।।' इति

यदि बुध पांच बिन्दुओं से युक्त हो तो मनुष्य रोग से पीड़ित रहने वाला तथा धन गंवाने वाला होता है। वह सदा शत्रुओं से पराजित होता है। उसका स्वभाव दुष्ट होता है और वह सुख से रहित जीवन व्यतीत करता है। वह गुरुओं व देवताओं से विमुख रहने वाला पुत्रों से रहित तथा सदा दूसरों से याचना करने वाला होता है।

षष्ठस्थोऽरिजनैः पराजितं च
विद्योनं विनयाभिधेन हीनम्।
शीतांशोस्तनुसम्भवो विहीनं
द्रव्येणाङ्गभृतं करोति नित्यम् ॥८७॥

षष्ठस्थ इति। शीतांशुश्चन्द्रस्तस्य तनुसम्भवोऽंगजो बुध इत्यर्थः। षष्ठस्थो षड्बिन्दुयुक्तश्चेत्तदाऽंगभृतं देहिनं मनुष्यमिति यावत्। अरिजनैः शत्रुभिः पराजितं पराभूतं विद्योनं विद्यावर्जितं मूर्खमित्यर्थः। विनयेनानुनयेन हीनं रहितं द्रव्येण धनेन विहीनं रहितं करोति विदधाति च वृद्धयवनः—

'षष्ठे स्थितः शीतकरस्य पुत्रो नरं प्रभूतं धनवर्जितं च।
पराजितं शत्रुजनेन नित्यं विद्याविहीनं विनयेन मुक्तम्॥' इति

यदि बुध छह बिन्दुओं से युक्त हो तो मनुष्य शत्रुजनों से पराजित होने वाला, मूर्ख तथा दुराग्रही (अविनीत) होता है। ऐसा व्यक्ति सदा धन से रहित तथा विद्या से रहित होता है।

तारायास्तनुजस्तु सप्तमस्थो
भोगोनं परसुन्दरीसुरक्तम्।
नित्यं दीनतरं कुबुद्धिभाजं
कुर्याच्चेत्सजनापवादमत्र ॥८८॥

ताराया इति। ताराया रोहिण्यास्तनुजः पुत्रोऽर्थाद् बुधश्चेद्यदि सप्तमस्थः सप्तबिन्दुयुक्तस्तदा भोगेन सुखेनोनं वर्जितं, परस्यान्यस्य सुन्दरी नारी तस्यां सुरक्तमासक्तं नित्यं सर्वदा दीनतरमतिशयदरिद्रं कुबुद्धिभाजं निन्दितबुद्धिमन्तं सजनापवादं लोकापवादसहितं कुर्यात्। तथा च वृद्धयवनः—

कलत्रगः भौमसुतो विधत्ते भोगेन हीनं परदाररक्तम्।
जनापवादेन युतं सुदीनं कुबुद्धिभाजं सततं मनुष्यम्॥' इति

यदि बुध सात बिन्दुओं से युक्त हो तो सब सुखों से रहित, दूसरे की स्त्री में आसक्त तथा अत्यन्त दरिद्र होता है। उसकी बुद्धि दुष्ट विचारों से युक्त होती है और वह संसार में सदा बदनाम होता है।

कुर्यादष्टमगो रजःप्रपुष्टं
क्रूरंचेद् गणिकाजनानुरक्तम्।
निर्मुक्तं प्रभया पणेन सक्तं
हीनं सत्यधनेन सोमजातः ॥८९॥

कुर्यादिति । चेद्यदि सोमजातो बुधोऽष्टमगोऽष्टबिन्दुयुक्तस्तदा रजः प्रपुष्टमधिकरजोयुक्तं क्रूरं कठोरस्वभावं गणिकाजनानुरक्तं वेश्यासक्तं प्रभया दीप्त्या निर्मुक्तं हीनं पणेन द्यूतेन सक्तं लीनं सत्येनर्तेन धनेन द्रव्येण हीनं रहितं कुर्यात् । यथाऽऽह वृद्धयवनः—

'द्यूतप्रसक्तं गणिकानुरक्तं रजोऽधिकं सत्यधनेन हीनम् ।
सौम्योऽष्टमस्थः प्रभया विहीनं करोति मर्त्यं सततं नृशंसम् ।।' इति

यदि बुध आठ बिन्दुओं से युक्त हो तो मनुष्य अधिक रजोगुणी अर्थात् काम क्रोधादि से युक्त तथा कठोर स्वभाव वाला होता है। ऐसे व्यक्ति वेश्याओं में सदा अनुरक्त रहने वाले, शान्ति से रहित तथा जुए में आसक्त होते हैं। इसी कारण ये लोग सत्य और धन से वर्जित होते हैं।

**बृहस्पति की रेखाओं का फल :**

**रेखास्थः प्रथमे गुरुर्विधत्ते**
**वित्ताढ्यं सुकृतप्रियं प्रधानम् ।**
**संयुक्तं विनयेन विप्रधर्म्मा-**
**भीष्टं सञ्जनयेत्सुबुद्धिभाजम् ।।९०।।**

रेखास्थ इति । गुरुर्बृहस्पतिः प्रथमे आद्यस्थाने रेखास्थो रेखायुक्तोऽर्थादेक-रेखायुक्त इत्यर्थः । चेत्तदा नरमिति शेषः । वित्तेन धनेनाढ्यं युक्तं सुकृतप्रियं, धर्मप्रियं प्रधानं मुख्यं, विनयेनसंयुक्तं, विप्रधर्माभीष्टं ब्राह्मणधर्मप्रियं सुबुद्धिभाजं सुतरां मतिमन्तं सञ्जनयेदुत्पादयेत् । यथाऽऽह वृद्धयवनः—

'रेखागतो देवगुरुप्रधानं नरं विधत्ते विनयेन युक्तम् ।
आद्ये महाबुद्धिधनान्वितं च धर्मप्रियं ब्राह्मणवल्लभं च ।।' इति

यदि बृहस्पति एक रेखा से युक्त हो तो मनुष्य धनवान् और धर्मप्रिय होता है। वह अपने समाज में प्रधान और विनीत होता है। उसकी धर्म और ब्राह्मणों में प्रीति होती है और उसकी बुद्धि उत्तम होती है।

**वागीशः सुभगं नरेशपूज्यं**
**शेमुष्या सहितं धनात्मजाभ्याम् ।**

**सौख्याढ्यं प्रथितं जने द्वितीये**
**कुर्य्यान्मानवमुद्भवं मनोज्ञम् ॥९१॥**

वागीश इति। वागीशोगुरुर्यदि द्वितीये रेखाद्वययुक्तश्चेत्तदोद्भवमुत्पन्नं मानवं मनुष्यं सुभगं सज्जनं, नरेशानां राज्ञां पूज्यं माननीयं, शेमुष्या बुद्ध्या सहित, धनेनात्मजेन पुत्रेण च युक्तं, सौख्येन च युक्तं जने लोके प्रसिद्धं, मनोज्ञं सुन्दरं कुर्यात्। यथा वृद्धयवनमतम्—

द्वितीयगः सौख्यसुतं प्रसूतं नरं सुरेज्यः सुभगं मनोज्ञम्।
वित्तेन पुत्रेण धिया समेतं नरेन्द्रपूज्यं प्रथितं च लोके ॥' इति

यदि बृहस्पति दो रेखाओं से युक्त हो तो मनुष्य सज्जन, राजाओं द्वारा सम्मानित होने वाला, बुद्धिमान्, धनी एवं सुखी होता है। ऐसा व्यक्ति लोगों में प्रसिद्ध और सुन्दर शरीर वाला होता है।

**सद्रव्यं प्रमुखं तृतीयसंस्थो**
**भाषेशो बहुपुत्रपौत्रभाजम्।**
**मुख्यं स्वीयकुले पदेन युक्तं**
**मर्त्यं प्राणिहितेषु संयुतं च ॥९२॥**

सद्रव्यमिति। भाषेशो गुरुस्तृतीयसंस्थो रेखात्रययुक्तस्तदा मर्त्यं मनुष्यं सद्रव्यं सह द्रव्येण धनेन प्रमुखं प्रधानं, बहुपौत्रभाजं प्रभूतपुत्रपौत्रयुक्तं स्वीयकुले निजवंशे, मुख्यं प्रधानं पदेन चिन्हेन युक्तं प्राणिहितेषु जीवहितेषु संयुक्तं कुर्यादिति। तथा च वृद्धयवनः—

'तृतीयसंस्थः कुरुते प्रधानं सुरेशमंत्री बहुपुत्रपौत्रम्।
पदान्वितं जन्तुहितेषु युक्तं कुलप्रधानं सततं धनाढ्यम् ॥' इति

यदि बृहस्पति तीन रेखाओं से युक्त हो तो मनुष्य खूब धन वाला, अपने समुदाय में प्रधान तथा बहुत से पुत्र-पौत्रादिकों से युक्त होता है। वह अपने कुल में प्रधान, उच्च पद पर आसीन होने वाला तथा जीव मात्र के हित में तत्पर होता है।

**प्राज्यद्रव्ययुतं चतुर्थयातो**
**जीवो बोधवतां सुसम्मतं च।**
**कुर्यात्प्राणभृतं विवेकिनं चेत्**
**सुश्रेयोद्रविणादि चित्रप्रयुक्तम् ॥९३॥**

प्राज्येति। जीवो गुरुश्चतुर्थयातो रेखाचतुष्टययुक्तश्चेत्तदा प्राणभृतं शरीरिणं मनुष्यमिति यावत्। प्राज्येन वहुना धनेन युक्तं, बोधवतां ज्ञानिनां सुसम्मतं मतिमान्यं विवेकः पृथगात्मता यस्यास्तीति तथोक्तं तम् सुश्रेयसातिपुण्येन द्रविणादिना धनादिना चिता बुद्ध्या च प्रयुक्तं सहितं कुर्यात्। तथा च वृद्धयवनः—

'सुपुण्यवित्तादि सुबुद्धि युक्तं करोति मर्त्यं त्रिदिवेशमंत्री।
चतुर्थसंस्थः प्रचुरं धनान्वितं विवेकिनं बोधवतां च सम्मतम्॥' इति

यदि बृहस्पति चार रेखाओं से युक्त हो तो मनुष्य अत्यन्त धन-सम्पति से युक्त, ज्ञानी लोगों के मध्य सम्मान पाने वाला, अत्यन्त विवेकी, धार्मिक, उत्तम धन एवं उत्तम बुद्धि से युक्त होता है।

**नित्यं प्रीतिकरं मनूद्भवानां**
**युक्तं देहभवेन पञ्चमस्थः।**
**वाणीशः सुमतेरभीप्सितं च**
**सच्छीलं बहुना वृषेण युक्तम्॥६४॥**

नित्यमिति। वाणीशो गुरुः पंचमस्थः पंचभी रेखाभिर्युक्तस्तदा मनूद्भवानां मनुष्याणां नित्यं प्रीतिकरं स्नेहकरं देहभवने पुत्रेण युक्तं सुमतेः सुन्दर-बुद्ध्याभीष्टं प्रियं सच्छीलं प्रशस्तस्वभावं बहुना वृषेण धर्मेण युक्तं कुर्यादिति शेषः। तथा च वृद्धयवनः—

'करोति जीवः खलु पंचमस्थो नरं नितान्तं सुमतेरभीष्टम्।
पुत्रान्वितं प्रीतिकरं नराणां सदा सुशीलं बहुधर्मयुक्तम्॥' इति

यदि बृहस्पति पांच रेखाओं से युक्त हो तो व्यक्ति स्नेहिल स्वभाव वाला, पुत्रों से युक्त तथा सुबुद्धि होता है। उसका स्वभाव उत्तम और धर्म में रति रखने वाला होता है।

**षष्ठस्थः प्रथितं प्रशान्तवैरं**
**हृद्यं देवगुरुर्हतारिपक्षम्।**
**जातञ्चेन्नियतं करोति पूज्यं**
**शिष्टं सुप्रणतं सदा गुरूणाम्॥६५॥**

षष्ठस्थ इति। देवगुरुर्बृहस्पतिः षष्ठस्थः षड्रेखायुक्तस्तदा जातमुत्पन्नं नरमिति यावत् कठिनं प्रशान्तवैरं विरोधरहितं हृद्यं प्रियं नित्यं हतारिपक्षं हतशत्रु

समूहं, पूज्यं मान्यं शिष्टं धीरं, शान्तं वा सदा गुरूणामाचार्याणां सुप्रणतं विनम्रं च करोति। तथा च वृद्धयवनः—

'हतारिपक्षं नियतं प्रसूतेः नरं सुरेज्य खलुषट्कसंस्थः।
शिष्टं सुपूज्यं प्रणतं गुरूणां, प्रशान्तवैरं प्रथितं प्रियं च॥' इति

यदि बृहस्पति छह रेखाओं से युक्त हो तो मनुष्य लोगों में खूब प्रसिद्ध अर्थात् लोकप्रिय, वैर भावना से रहित, सब के साथ मित्रतापूर्ण व्यवहार रखने वाला होता है। वह देवताओं और गुरुजनों का प्रीति पात्र तथा अपने शत्रुओं का नाश करने वाला होता है। ऐसा व्यक्ति सम्मानित जीवन व्यतीत करने वाला, शान्त स्वभाव वाला तथा गुरुजनों का समादर करने वाला विनीत होता है।

**पूज्यः सप्तमगः करोत्यभीष्ट-**
**नारीणां रतिसंप्रहृष्टमत्र।**
**हृद्याढ्यं गुरुदानवारिभक्तं**
**युक्तं स्वीयजनैः सुभाषकं च॥९६॥**

पूज्य इति। पूज्यो गुरुः सप्तमस्यः सप्तरेखायुक्तस्तदाऽभीष्टनारीणां प्रियस्त्रीणां रतौ सुरते संप्रहृष्टं सम्यक् प्रमुदितं हृद्याढ्यं प्रियजनयुक्तं गुरुराचार्यो दानवारयो देवास्तेषां भक्तं सेवकं स्वीयजनैः निजलोकैर्युक्तं सुभाषकं सुन्दरवचनभाषिणं करोति विदधाति जातमिति शेषः। यथा च वृद्धयवनः—

'अभीष्टनारीरतिसंप्रहृष्टं करोति मर्त्यं सततं सुरेज्यः।
प्रियान्वितं देवगुरुप्रभक्तं सुभाषकं च स्वजनैः समेतम्॥' इति

यदि बृहस्पति सात रेखाओं से युक्त हो तो मनुष्य सदा प्रिय स्त्रियों के सम्पर्क में रहने वाला अतः अत्यन्त प्रसन्न, प्रियजनों से युक्त गुरुओं व देवताओं का भक्त, अपने लोगों से युक्त अर्थात् परिजनों से युक्त और सुन्दर वाक्शक्ति से परिपूर्ण होता है।

**वाङ्नाथोऽष्टमगः प्रियातिथिं च**
**भूपेन्द्रं बहुशास्त्रलब्धमेव।**
**दक्षं सर्वकलासु चेद्विदग्धं**
**संयुक्तं किल वीर्य्यविक्रमाभ्याम्॥९७॥**

वागिति। वाङ्नाथो गुरुरष्टमस्थोऽष्टरेखायुक्तस्तदा मनुष्यमिति शेषः। प्रियातिथिमतिथिजनप्रियं भूपानां नरेशानामिन्द्रो राजा तथोक्तं तम्। सम्राजमित्यर्थः। बहूनि प्रभूतानि शास्त्राणि शिक्षादीनि लब्धं येन तं तथोक्तम्। समस्तासु कलासु पक्षं चतुरं विदग्धं पण्डितं वीर्येण बलेन विक्रमेणातिपराक्रमेण च संयुक्तं कुर्यात्। तथा च वृद्धयवनः—

'जीवोऽष्टमस्थः कुरुते विदग्धं प्रियातिथिं सर्वकलासुदक्षम्।
नरं नृपेन्द्रं बहुशास्त्रलब्धं पराक्रमं प्राणसमन्वितं च॥' इति

यदि बृहस्पति आठ रेखाओं से युक्त हो तो मनुष्य अतीथि सेवा करने वाला, पृथ्वी का शासक अर्थात् सम्राट, बहुत से शास्त्रों का अध्ययन करने वाला तथा उनमें पारंगत होता है। वह अनेक कलाओं का ज्ञाता, पण्डित अर्थात् विद्वान् और बल पराक्रम से युक्त होता है।

**बृहस्पति के बिन्दुओं का फल :**

**अक्षस्थः प्रचुरप्रसूतिजाढ्य-**
**माद्ये वीतकृपं भवं कृतघ्नम्।**
**सत्योनं मलिनं सदा स्वभावा-**
**ल्लुब्धं घातुकमङ्गिरःकुमारः॥९८॥**

अक्षस्थ इति। अंगिरः कुमारो बृहस्पतिः प्रथमस्थाने आद्यस्थानेऽक्षस्थो बिन्दुयुक्तोऽधिकबिन्दुयुक्तश्चेत्तदा भवमुत्पन्नं नरं प्रचुरं बहु प्रसूतिजं रोगस्तेनाढ्यं युक्तं, वीतकृपं निर्दयं, कृतघ्नमुपकारिजनापकारकं, सत्योनं सत्यवचनविहीनं करोतीत्यभिप्रायः। मलिनं मलदूषितं, स्वभावान्निसर्गाद् लुब्धमभिलाषुकं घातुकं नृशंसं करोतीति शेषः। यथात्र वृद्धयवनः—

'बिन्दुस्थितो देवगुरुः प्रसूते नरं नृशंसं बहुदुःखयुक्तम्।
लुब्धं कृतघ्नं मलिनं स्वभावाद्विहीनसत्यं कृपया विहीनम्॥ इति

यदि बृहस्पति एक बिन्दु से युक्त राशि में हो तो मनुष्य कई प्रकार के रोगों से पीड़ित, निर्दय तथा अकृतज्ञ होता है। वह सदा झूठ बोलने वाला, गन्दा रहने वाला, स्वभाव से लोभी, तथा अत्यन्त नृशंस स्वभाव वाला होता है। अर्थात् दुःखों से युक्त और दया रहित कुकृत्य करने वाला होता है।

**आभीलं बधिरोद्भवं प्रभूतं**
**त्रासं तस्करभूमिनायकाभ्याम्।**

**अङ्गेऽरिष्टकमामयं नृसञ्ज्ञा-**
**न्मर्त्यानां धिषणो द्वितीयसंस्थः ॥९९॥**

आभीलमिति। धिषणो गुरुर्द्वितीयसंस्थो बिन्दुद्वययुक्तश्चेत्तदा मर्त्यानां मनुष्याणां प्रभूतं बहु बधिरोद्भवं बधिरजन्यं, आभीलं रोगम्, तस्करश्चौरो भूमि-नायको राजा ताभ्यां त्रासं भयं नृसंज्ञात्पुरुषादंगे शरीरेऽरिष्टमामयं रोगं कुर्यादिति शेषः। यथाऽऽह वृद्धयवनः—

'द्वितीयगो भूमिपतस्करस्य भयं सुरेज्यः कुरुते नराणाम्।
नृसंज्ञतो रोगमरिष्टमंगे प्रभूतदुःखं बधिरोद्भवं च ॥' इति

यदि बृहस्पति दो बिन्दुओं से युक्त हो तो मनुष्य बहरा होता है तथा साथ ही बहरेपन से उत्पन्न होने वाले अनेक दोषों से युक्त होता है। उसका स्वभाव चोरी करने वाला अतः सदा राजपक्ष से भयभीत रहने वाला होता है। पुरुषों द्वारा उसके शरीर को कष्ट पहुंचाया जाता है तथा दूसरे पुरुषों के कारण उसके शरीर में कई रोगों का संक्रमण हो जाया करता है।

**गीर्वाणेशगुरुस्तृतीयसंस्थो**
**दौर्भाग्यप्रयुतं जनं प्रजातम्।**
**संरक्तं परकान्तया कृतघ्न-**
**मश्रान्तं कुरुते धनेन हीनम् ॥१००॥**

गीर्वाणेति। गीर्वाणाः देवास्तेषामीशः स्वामीन्द्रस्तस्य गुरुर्बृहस्पतिः तृतीय-संस्थो बिन्दुत्रययुक्तश्चेत्तदा, प्रजातं जनं मनुष्यं दौर्भाग्यप्रयुतं भाग्यहीनं दुष्टभाग्यं वा, परकान्तया परस्त्रिया संरक्तमासक्तं कृतघ्नमुपकारिजनापकारकरमश्रान्तं नित्यं धनेन द्रव्येण हीनं रहितं कुर्यादिति शेषः। यथाऽऽह वृद्धयवनः—

'तृतीयसंस्थस्त्रिदशेशपूज्यो विहीनवित्तं सततं मनुष्यम्।
भवेत्कुमित्रं परदाररक्तं दौर्भाग्ययुक्तं त्वलसं कृतघ्नम् ॥' इति

यदि बृहस्पति तीन बिन्दुओं से युक्त हो तो मनुष्य अत्यन्त भाग्यहीन होता है। उसका मन सदा पराई स्त्री में अनुरक्त होता है और वह कृतघ्न एवं निर्धन होता है।

**वृद्धयवन** के मतानुसार वह आलसी तथा मित्रता के अयोग्य अर्थात् कुमित्र भी होता है।

**वाचामधीशे जनने चतुर्थगे**
**प्राज्यारिगम्यः स विखिन्नमानसः।**
**जन्तोः समाधिः कुटिलोविचर्चिका-**
**सम्पीड्यमानो विभवैर्विवर्जितः ॥१०१॥**

वाचामिति। यस्य जन्तोः शरीरिणो मनुष्यस्येति यावत्। जनने जन्मनि, वाचामधीशे गुरौ, चतुर्थगे बिन्दुचतुष्टययुक्ते तदा स प्राज्यारिगम्यो बहुशत्रुप्राप्यो बहुशत्रुपक्षइत्यर्थः। विखिन्नमानसः विशेषेण खेदयुक्तं मानसं हृदयं यस्य तथोक्तः सः। समाधिरतिशयमनोव्यथा, कुटिलो वक्रस्वभावो विचर्चिक्या पाम्ना दद्रु-प्रभृतिना रोगेण सम्पीड्यमानोऽतिदुःखितो विभवैर्धनैर्विवर्जितो रहितः, स्यादिति शेषः। यथा भणति वृद्धयवनः—

चतुर्थगे देवगुरौ प्रसूतौ विखिन्नचित्तो बहुशत्रुगम्यः।
विचर्चिकाद्यैः परिपीडितश्च नरः समाधिः कुटिलोऽधनश्च ॥' इति

यदि बृहस्पति चार बिन्दुओं से युक्त हो तो उसके बहुत से शत्रु होते हैं। उसका मन सदा उद्विग्न रहता है तथा वह मानसिक रोगी होता है। उसका स्वभाव कुटिल और शरीर खुजली जैसे रोगों से पीड़ित रहता है। ऐसे व्यक्ति के पास धनादि वैभवों का अभाव बना रहता है।

**चौर्य्यं सञ्जनयेत्प्रभूतशोक-**
**संयुक्तं परकामिनीसुरक्तम्।**
**पाम्ना जूर्त्तिरुजा प्रपीडितं चे-**
**त्सूरिः पञ्चमगः सुकष्टयुक्तम्॥१०२॥**

चौर्यमिति। सूरिर्गुरुः पंचमगः पंचबिन्दुयुक्तश्चेत्तदा, चौर्यं चौरस्य भावस्तथोक्तं, प्रभूतेन बहुना, शोकेन संयुक्तं, परकामिनीसुरक्तं परदारारक्तं पाम्ना कण्डूदद्रुप्रभृति त्वग्रोगेण, जूर्तिरुजा ज्वरेण च प्रपीडितं दुःखितं, सुकष्टयुक्त-मतिकष्टेनसहितं सञ्जनयेदुत्पादयेत्। यथाऽत्र वृद्धयवनः—

'पामाज्वरार्तं परदाररक्तं नरं प्रसूते सुरराजपूज्यः।
प्रभूतशोकेन युतं सुपापं चौर्यं महाकष्टसमन्वितं च ॥' इति

यदि बृहस्पति पांच बिन्दुओं से युक्त हो तो चोरी करने वाला तथा अनेक प्रकार के शोकों से संतप्त रहने वाला होता है। वह पराई

स्त्री में अनुरक्त और खुजली से पीड़ित होता है। वह कष्टपूर्ण जीवन बिताता है तथा बार-बार बुखार से पीड़ित होता है।

**कुर्य्यात्क्षुद्रसमानरूपमार्य्यो**
**षष्ठेऽनन्तशुचं वृषक्रियोनम्।**
**पुत्रस्त्रीरहितं प्रवासशीलं**
**चक्षूरोगनिपीडितं सदैव ॥१०३॥**

कुर्यादिति। आर्यो गुरुः षष्ठे षड्बिन्दुयुक्तश्चेत्तदा क्षुद्रोदरिद्र इव रूपं यस्य तथोक्तं तम्। अनन्तशुचमधिकशोकयुक्तं, वृषक्रिया धर्मक्रिया तयोनं रहितं, पुत्रा: स्त्री गृहिणी आभीरहितं विहीनं प्रवासशीलं विदेशवासस्वभावं, सदैव नित्यमेव, चक्षूरोगनिपीडितं नेत्ररोगिणं कुर्यात्। तथा च वृद्धयवनः—

'षष्ठे सुरेज्यः कुरुतेऽक्षिरोगसम्पीडितं क्षुद्रसमानरूपम्।
प्रवासशीलं सुतदारहीनं धर्मक्रियाहीनमनन्तशोकम्॥' इति

यदि बृहस्पति छह बिन्दुओं से युक्त हो तो वह आकृति से बहुत दीन हीन दिखने वाला, अत्यन्त शोक से युक्त, धर्म क्रियाओं से रहित, पुत्र व स्त्री से रहित तथा विदेश में जीवन बिताने वाला होता है। अर्थात् वह निश्चिन्त जीवन नहीं बिताता। बार-बार घर से बाहर रहता है तथा चक्षु रोगी होता है।

**गीर्वाणनायकगुरुर्यदि सप्तमस्थो**
**व्यापादगुल्मसहितं जनितं मनुष्यम्।**
**हिक्काज्वरार्त्तियुतमीश्वरमानमुक्तं**
**जन्तोर्जनौ कफमुखं प्रचुरं करोति ॥१०४॥**

गीर्वाणेति। जन्तोर्जन्मिनो, जनौ जन्मसमये गीर्वाणनायकः गुरुः बृहस्पतिः, सप्तमस्थः सप्तबिन्दुयुक्तश्चेत्तदा, जनितं मनुष्यं व्यापादो द्रोहचिन्तनं गुल्मः प्लीहरोगः आभ्यां सहितं युक्तं, हिक्काज्वरं जूर्तिः आर्त्तिः पीडा, आभिर्युक्तं, ईश्वरेण प्रभुणा स्वामिनेति भावः। दत्तं यन्मानं सम्मानं, तेन मुक्तं रहितं, प्रचुरं बहुकफमुखं श्लेष्मादि करोति विदधाति। यथाऽस्मिन् वृद्धयवनः—

'करोति जीवः खलु पंचमस्थो नरं कफादि प्रचुरं सदैव।
हिक्काज्वरार्तिः प्रभुमानहीनं व्यापादगुल्मस्य परं च कष्टम्॥' इति

यदि बृहस्पति सात बिन्दुओं से युक्त हो तो मनुष्य सदा द्रोह के विषय में विचार करता रहता है। उसे प्लीहा, बुखार तथा हिचकी आदि रोग होते रहते हैं। वह अपने स्वामी से सदा अपमानित होने वाला, कफ की वृद्धि और तज्जनित रोगों से पीड़ित रहता है।

**शक्राचार्यः कुटिलं सदातिगर्वात्**
**पृथ्वीनाथभयं गतप्रतापम्।**
**मध्ये स्वीयकुलस्य चाष्टमस्थो**
**मर्त्यानां विकृतं करोत्यजस्रम् ॥१०५॥**

शक्राचार्य इति। शक्राचार्यो गुरुरष्टमस्थोऽष्टविन्दुयुक्तस्तदा, मर्त्यानां मनुष्याणां सदा नित्यमतिगर्वाभिमानात् कुटिलं वक्रं, पृथ्वीनाथो राजा तस्माद् भयं दरं, स्वीयकुलस्य निजवंशस्य, मध्ये गतप्रतापं प्रतापरहितं, अजस्रं नित्यं विकृतं रोगिणं करोति विदधाति। तथा च वृद्धयवनः—

'स्थानेऽष्टमे देवगुरुः प्रसूते सदातिगर्वात्कुटिलं मनुष्यम्।
भयं नृपाणां स्वकुलस्य मध्ये गतप्रतापं विकृतं सदैव ॥' इति

यदि बृहस्पति आठ बिन्दुओं से युक्त हो तो वह अत्यन्त अभिमान के कारण सदा कुटिलगामी होता है। उसे राजपक्ष से भय होता है तथा वह अपने कुल में अत्यन्त निःसत्त्व होता है। उसे सदा रोग सताते रहते हैं। अतः शरीर व मन दोनों से विकृत होता है।

**शुक्र की रेखाओं का फल :**

**रेखागः सुभगं, जितेन्द्रियं च**
**सौम्यं दानपरं जनं कृतज्ञम्।**
**आद्यै दैत्यगुरुर्वृषानुरक्तं**
**सच्छीलं बहुलान्नपानभाजम् ॥१०६॥**

रेखाग इति। दैत्यगुरुः शुक्रः रेखागोऽर्थादिकरेखायुक्तस्तदा सुभगं सुष्ठु-भगं भाग्यं माहात्म्यादि यस्य तं तथोक्तं जितेन्द्रियं, सौम्यं मनोहरं, दानपरं दान-परायणं, कृतज्ञं कृतोपकारं जानाति यस्तथोक्तस्तम्। वृषानुरक्तं धर्मानुरक्तं, सच्छीलं प्रशस्तस्वभावं, बहुलान्नपानभाजमत्यधिकान्नपानादिभिः समेतं करोतीति भावः। तथा च वृद्धयवनः—

'रेखास्थितो दैत्यगुरुः प्रसूते नरं मनोज्ञं सुभगं सुशीलम्।
जितेन्द्रियं दानपरं कृतज्ञं धर्मानुरक्तं प्रचुरान्नपानम्॥' इति

यदि शुक्र एक रेखा से युक्त हो तो मनुष्य ऐश्वर्यों से युक्त, अपनी इन्द्रियों को वश में रखने वाला, सुन्दर शरीर शोभायुक्त तथा दानी होता है। वह स्वभाव से कृतज्ञ, धर्मात्मा, सुशील होता है। साथ ही उसके पास अन्नादिक खाद्य पदार्थों की कभी कमी नहीं होती।

**दैत्यर्त्विग् धनधान्यसंयुतं चेद्**
**लोकानां दयितं सुधर्म्मशीलम्।**
**दीप्ताढ्यं विनयान्वितं विधिज्ञं**
**कुर्य्याज्जन्मभृतं द्वितीययायी॥१०७॥**

दैत्येति। दैत्यर्त्विक् शुक्रो द्वितीययायी रेखाद्वययुक्तस्तदा जन्मभृतं प्राणिनं मनुष्यमिति यावत्। धनैर्धान्यैश्च संयुतं सहितं, लोकानां जनानां दयितं प्रियं सुधर्मशीलमतिपुण्यस्वभावं, दीप्त्या कान्त्याढ्यं युक्तं, विनयेनानुनयेनान्वितं युक्तं, विधिज्ञं विधानविदं कुर्याद् विदध्यात्। तथा च वृद्धयवनः---

'द्वितीयगः काव्यसुतः प्रसूते नरं विधिज्ञं धनधान्ययुक्तम्।
सुधर्मशीलं विनयेन युक्तं प्रभासमेतं जनवल्लभं च॥' इति

यदि शुक्र दो रेखाओं से युक्त हो तो मनुष्य खूब धन धान्य समृद्ध होता है। वह लोकप्रिय, पुण्यात्मा और सुन्दर कान्ति वाला होता है। स्वभाव से विनीत और विधि शास्त्र का जानकार अथवा तर्कपूर्ण दृष्टि वाला होता है।

**मेधासंयुतमास्फुजित्तृतीय-**
**संस्थोऽदभ्रविभूषणैरुपेतम्।**
**मर्त्यं धर्म्मपरं सदा प्रगल्भं**
**भूदेवादितिजातिवल्लभं चेत्॥१०८॥**

मेधा संयुतमिति। आस्फुजिच्छुक्रस्तृतीयसंस्थो रेखात्रययुक्तश्चेत्तदा मर्त्यं मनुष्यं मेधया बुद्ध्या संयुतं सहितमदभ्रैर्बहुभिर्विभूषणैराभूषणैर्युक्तं, सदा धर्मपरं धर्मपरायणं प्रगल्भं प्रतिभायुतं भूदेवा ब्राह्मणा अदितिजा देवास्तेषामतिवल्लभमतिप्रियं कुर्यादिति शेषः। यथात्र वृद्धयवनः---

'तृतीयसंस्थो बहुभूषणाढ्यं नरं प्रसूते सतत प्रगल्भम्।
मेधाविनं धर्मपरं नितान्तं देवद्विजानामतिवल्लभं च ।।' इति

यदि शुक्र तीन रेखाओं से युक्त हो तो मनुष्य बहुत मेधावी अर्थात् ग्रहणशक्ति वाला, अनेक आभूषणों से युक्त, धर्म में रति रखने वाला, भ्रमरहित जीवन बिताने वाला, ब्राह्मणों एवं देवताओं का भक्त होता है।

**मर्त्यं करोति सुखिनं भृगुजश्चतुर्थे**
**वैदूर्य्यमौक्तिकफलाभिधकर्म्मलाभैः ।**
**सन्तुष्टमानसमथो धनपानयुक्तं**
**सम्बोधनेन सहितं हरिचन्दनेन ।।१०६।।**

मर्त्यमिति। भृगुजः शुक्रश्चतुर्थे रेखाचतुष्टययुक्तश्चेत्तदा मर्त्यं मानवं सुखिनं सुखमस्यास्तीति तम्। विदूरे भवानि वैदूर्याणि बालवायजानि वा मौक्तिकफलाभिधानानि तेषां कर्मणः क्रियाया लाभैः प्राप्तिभिः संतुष्टमानसं संतुष्टचित्तं धनैर्द्रव्यैः ज्ञानेन वा हरेरिन्द्रस्य प्रियं चन्दनमिति मलयगिरिजं तेन च सहितं युक्तं करोति विदधाति। यथाऽऽह वृद्धयवनः—

'शुक्रश्चतुर्थे कुरुते धनाढ्यं सम्बोधनाचन्दनपानयुक्तम्।
वैदूर्यमुक्ताफलकर्मलाभैः संतुष्टचित्तं सुखिनं मनुष्यम् ।।' इति

यदि शुक्र चार रेखाओं से युक्त हो तो मनुष्य अत्यन्त सुखी, वैदूर्य मणि केतु का रत्न अर्थात् लहसुनिया (Cats-Eye) और मोती के व्यापार से सुखी होता है। उसके धन तथा पेय पदार्थों की कमी नहीं रहती। वह अत्यन्त ज्ञानवान् और चन्दनादि पदार्थों के सुख को भोगने वाला होता है। अर्थात् विलास सामग्री से युक्त होता है।

**दैत्येज्यः परमं प्रियं त्रिलोके**
**मर्त्यं प्राग्रहरं चतुष्पदाढ्यम्।**
**सूतो पञ्चमगस्तनूजवित्त-**
**ज्ञानादिप्रमदाप्तिसंयुतं च ।।११०।।**

दैत्येज्य इति। सूतौ जन्मनि दैत्येज्यः शुक्रः, पंचमगः पंचरेखायुक्तस्तदा मनुष्यं लोकत्रये स्वर्गमर्त्यपातालेषु परमुत्कृष्टं प्रियहृद्यं प्राग्रहरं प्रधानं चतुष्पदैः पशुभिराढ्यं तनूजः पुत्रः वित्तं धनं, ज्ञानादि सामान्यविशेषरूपबुद्धिपूर्वं प्रमदा स्त्री,

आसामाप्तिर्लब्धिस्तया संयुतं सहितं कुर्यादिति शेषः। यथा वृद्धयवनवचन-मत्र—

'सुतार्थज्ञानादिकलत्रलाभैर्युक्तं नरं दैत्यगुरुर्विधत्ते।
चतुष्पदाढ्यं खलु पंचमस्थः प्रियं त्रिलोके परमं प्रधानम् ॥' इति

यदि शुक्र पांच रेखाओं से युक्त हो तो मनुष्य त्रैलोक्य में विख्यात तथा त्रिलोकप्रिय होता है। वह समाज में प्रधान, पशुओं से युक्त, पुत्र, धन व स्त्रियों से समवेत और उत्कृष्ट ज्ञान वाला होता है।

**षष्ठस्थितो दनुजराजगुरुर्मनुष्यं**
**विद्यासु निष्ठमिह भूरिवयस्यभाजम्।**
**जातं करोति निखिलासु कलासु दक्षं**
**दारार्थलाभसहितं सुधियं सुरूपम् ॥१११॥**

षष्ठस्थित इति। दनुजराजगुरुः शुक्रः षष्ठस्थितः षड्रेखायुक्तस्तदा मनुष्यं विद्यास्वष्टादशसु निष्ठं सिद्धिं, भूरिवयस्यभाजं बहुमित्रवन्तं निखिलासु सर्वासु कलासु चतुःषष्ठिकलासु द्विसप्ततिमितासु वा शिल्पादिरूपासु वा दक्षं चतुरं, दाराः स्त्रियोऽर्था धनानि तेषां लाभः प्राप्तिस्तया सहितं युक्तं सुधियं पण्डितं, सुतरां रूप-मस्येति सुरूपं करोति। तथा च वृद्धयवनः—

'शुक्रस्तु षष्ठे कुरुते मनुष्यं विद्यासु निष्ठं बहुमित्रभाजम्।
स्त्रीवित्तलाभैः सहितं सुरूपं विचक्षणं सर्वकलासु दक्षम् ॥' इति

यदि शुक्र छह रेखाओं से युक्त हो तो मनुष्य को सब विद्याओं में सिद्धि प्राप्त होती है। उसके मित्रों की संख्या विशाल होती है। वह समस्त कलाओं में निष्णात, स्त्री सुख व धन सम्पत्ति से युक्त होता है। वह पण्डित और शरीर शोभ सम्पन्न होता है।

**काव्यः सप्तमगः सुकुङ्कुमाद्यैः**
**संयुक्तं कुरुते सुसौख्यभाजम्।**
**अत्यर्थं सुरतप्रगल्भमब्जा-**
**जस्रं भूपतिपूजया समेतम् ॥११२॥**

काव्य इति। काव्यः शुक्रः सप्तमगः सप्तरेखायुक्तश्चेत्तदा सुतरां कुंकुमाद्यैः काश्मीरजन्माद्यैः संयुक्तं सहितं सुसौख्यभाजमनिमुग्धिनमत्यर्थमतिशयं सुरते

मैथुने प्रगल्भं धृष्टमजस्रं नित्यं भूपतिपूजया राजसम्मानेन समेतं युक्तं कुरुते विदधते । तथा च वृद्धयवनः—

'शुक्रो विधत्ते खलु सप्तमस्थो नरं नितान्तं सुरतप्रगल्भम् ।
सुकुङ्कुमाद्यैः सहितं सुसौख्यं नरेन्द्रपूजासहितं सदैव ॥' इति

यदि शुक्र सात रेखाओं से युक्त हो तो केशरादि मूल्यवान् द्रव्यों से युक्त, उत्तम सुखों से परिपूर्ण, स्त्री के सम्पर्क में आने पर धृष्ट होता है। वह राजा से खूब सम्मान भी प्राप्त करता है।

**कुर्य्यादष्टमगः प्रभूतकीर्त्ति-**
**भाजंदैत्यपुरोहितः सदैव ।**
**धर्माढ्यं प्रभया युतं नितान्तं**
**भूर्य्याप्त्या सहितं सुकर्म्मभाजम् ॥११३॥**

कुर्यादिति । दैत्यपुरोहितः शुक्रोऽष्टमगोऽष्टरेखायुक्तस्तदा, प्रभूत कीर्ति-भाजं बहुकीर्त्तिमन्तं, सदैव धर्माढ्यं पुण्ययुक्तं प्रभया कान्त्या च युतं, नितान्तं निरन्तरं भूर्याप्त्या बहुलब्ध्या सहितं युतं सुकर्मभाजं सत्कर्मवन्तं, कुर्यादिति शेषः । यदा च वृद्धयवनः—

'स्थानेऽष्टमे दैत्यगुरुः प्रसूते नरं नितान्तं बहुलाभयुक्तम् ।
प्रभासमेतं बहुकीर्तिभाजं सुकर्मिणं धर्मसमन्वितं च ॥ इति

यदि शुक्र आठ रेखाओं से युक्त हो तो मनुष्य बहुत कीर्ति वाला तथा धर्मात्मा होता है। उसके शरीर की कान्ति उत्तम होती है तथा वह अनेक प्रकार के लाभों से युक्त होता है। उसके क्रिया-कलाप भी सदा उत्तम होते हैं।

**शुक्र के बिन्दुओं का फल :**

**दैत्यार्च्चितः करणगः प्रथमे प्रकुर्य्याद्**
**भूर्य्यामयेन सहितं जनितं सपापम् ।**
**आत्मीयबान्धवजनैरिह सज्जनैश्च**
**हीनं सुतार्थरहितं नरपाभिभूतम् ॥१४॥**

दैत्यार्चित इति । दैत्यार्चितः शुक्रः प्रथमे आद्यस्थाने करणगो बिन्दुयुक्तो-ऽधिकबिन्दुयुक्तस्तदा जनितमुत्पन्नं भूर्यामयेन बहुरोगेण सहितं युक्तं सपापं पाप-

युक्तमात्मीयबान्धवजनैर्निजबन्धुभिः सज्जनैः सभ्यैश्च हीनं त्यक्तं नरपाभिभूतं राजपीडितं प्रकुर्याद् विदध्यादिति। तथा च वृद्धयवनः—

'बिन्दुस्थितो दैत्यगुरुः प्रसूते नरं सपापं बहुरोगयुक्तम्।
नृपाभिभूतं सुतवित्तहीनं विवर्जितं बान्धवसज्जनैश्च ॥' इति

यदि शुक्र एक बिन्दु से युक्त हो तो मनुष्य अनेक रोगों से पीड़ित, पापी स्वभाव वाला तथा सज्जनों से दूर रहने वाला कुसंगति युक्त होता है। वह पुत्रों व धन सम्पत्ति से वर्जित तथा राजा से पीड़ा प्राप्त करने वाला होता है।

**काणो यदि प्रकुरुते स्वकुटुम्बवर्गा-**
**न्नित्यं विरक्तमतिलालसमामयेन।**
**युक्तं द्वितीयग इहारिजनाभिभूतं**
**रायां व्ययं तनुभृतं तु शुचाभिभूतम् ॥११५॥**

काणइति। काणः शुक्रो द्वितीयगो बिन्दुद्वययुक्तो यदि तदा तनुभृतं शरीरिणं मनुष्यमिति यावत्। नित्यं सर्वदा, स्वकुटुम्बवर्गाद् निजपरिजनगणाद् विरक्तं विच्छिन्नमतिलालसमतिशयेच्छायुक्तमामयेन रोगेण युक्तं, अरिजनैः शत्रुजनैरभिभूतं पीडितं रायां धनानां व्ययं शुचा शोकेनाभिभूतं पीडितं प्रकुरुते विदधते। यथात्र वृद्धयवनः—

'शुक्रो द्वितीये सरुजं विधत्ते, धनव्ययं शत्रुजनाभिभूतम्।
सदा विरक्तं स्वकुटुम्बवर्गाच्छोकाभिभूतं त्वतिलालसं च ॥' इति

यदि शुक्र दो बिन्दुओं से युक्त हो तो मनुष्य अपने कुटुम्बियों से दूर रहने वाला, अधिक इच्छाओं से युक्त, रोगों व शत्रुओं से पीड़ित व शोक सन्तप्त होता है। साथ ही उसका धन खूब व्यय होता रहता है।

**धिष्ण्यश्चेत्कुरुते पराभिभूतं**
**मर्त्यं मानधनोनितं तृतीये।**
**प्रेयस्या सहितं कदर्थितं च**
**क्रूरं जूर्तिनिपीडितं कुचैलम् ॥११६॥**

धिष्ण्य इति। धिष्ण्यः शुक्रस्तृतीये बिन्दुत्रययुक्तश्चेत्तदा मर्त्यं मनुष्यं परैःशत्रुभिः पीडितं मानधनोनितं मानधनवर्जितं, प्रेयस्या स्त्रिया सहितं कदर्थितं

कुत्सितधनयुतं क्रूरं कठोरस्वभावं, जूर्त्या ज्वरेण निपीडितं परिपीडितं कुचैलं कुत्सितवस्त्रं कुरुते। यथा वृद्धयवनः—

'तृतीयसंस्थः कुरुते नृशंसं शुक्रः सदारेण कदर्थिनं (तं) च।
पराभिभूतं सततं कुचैलं ज्वरार्दितं मानधनेनहीनम्॥' इति

यदि शुक्र तीन बिन्दुओं से युक्त हो तो मनुष्य शत्रुओं से सदा पीड़ित होने वाला, मान-सम्मान और धन से रहित किन्तु स्त्री से युक्त होता है। वह सदा तिरस्कृत होने वाला, ज्वर से पीड़ित और गन्दे और निन्दित वस्त्र पहनने वाला होता है।

**दैत्याचार्य्यश्चेच्चतुर्थे महोपा-**
**ध्याढ्यं प्रेष्यं सेवने तत्परं च।**
**जातं निःस्वं तुर्य्यपादार्थहीनं**
**कुर्य्यान्मर्त्यं मन्युनाम्ना समेतम्॥११७॥**

दैत्याचार्य इति। शुक्रश्चतुर्थे बिन्दुचतुष्टययुक्तश्चेत्तदा, जातमुत्पन्नं, मर्त्यं मनुष्यं, महोपाध्याढ्यं विशालकुटुम्बव्यापृतियुक्तम्, प्रेष्यं दासं, सेवने सेवायां तत्परं परायणं, निःस्वं दरिद्रं, तुर्यपादाः पशवोऽर्थो धनं तैर्विहीनं वर्जितं, मन्युनाम्ना शोकाभिधेन समेतं युक्तं कुर्यात्। यथाह वृद्धयवनः—

चतुर्थगः शोकयुतं प्रसूते नरं महोपाधियुतं दरिद्रम्।
चतुष्पदाद्यैर्धनवर्जितं च प्रेष्यं सदा सेवनतत्परं च॥' इति

यदि शुक्र चार बिन्दुओं से युक्त हो तो मनुष्य बड़े कुटुम्ब वाला तथा उसके लालन-पालन की घबराहट से परेशान होता है। वह नौकर होकर दूसरों की सेवा करने वाला तथा दरिद्र होता है। साथ ही धनादि से रहित होने के कारण वह शोक से संतप्त होता है।

**भः पञ्चमे यदि भवेत्कुरुते परास्तं**
**जातं नरं कुहितयोगधनेन हीनम्।**
**नित्यं स्वबान्धवगणैः सह सज्जनैश्च**
**हृद्यं कलेरतिसुखेन विवर्जितं च॥११८॥**

भइति। भः शुक्रः पंचमे पंचबिन्दुयुक्तश्चेत्तदा, ज्ञातं नरं, परास्तं पराजितं कुहितयोगधनेन कुमित्रसंयोगवशतो धनेन हीनं रहितं, स्वबान्धवगणैर्निजबन्धुलोकैः सज्जनैः साधुभिश्च सहकलेः कलहस्य हृद्यं प्रियमतिसुखेन वर्जितमल्पसुखमित्यर्थः। कुरुते विदधते। तथा च वृद्धयवनः—

'शुक्रः प्रसूतेऽतिसुखेन वर्जितं नरं सदा पंचमगः परास्तम् ।
कलिप्रियं बान्धवसज्जनैश्च कुमित्रसंयोगधनेन हीनम् ॥' इति

यदि शुक्र पांच बिन्दुओं से युक्त हो तो व्यक्ति पराजित तथा दुष्टों के सम्पर्क से धन खोने वाला होता है। वह सज्जनों व बन्धु-बान्धवों से सदा कलह करता है और सुख से विवर्जित जीवन यापन करता है।

**हीनं सत्यसुखेन षष्ठयातो**
**जातं सर्वजनाभिभूतमच्छः ।**
**स्वान्तं सञ्जनयेद्विदेशरक्त-**
**मश्रान्तं परतर्ककं विहार्दम् ॥११९॥**

हीनमिति। अच्छः शुक्रः षष्ठयातः षड्बिन्दुभिर्युक्तश्चेत्तदा सत्येन सुखेन च हीनं, सर्वजनैः समस्तलोकैरभिभूतं पीडितमश्रान्तं निरन्तरं विदेशरक्तं परदेशानुरक्तं स्वान्तं चित्तं परतर्ककं परेभ्योऽन्येभ्यो याचनाकृतं, विहार्दं प्रेमरहितं, सञ्जनयेदुत्पादयेत्। तथा च वृद्धयवनः—

'षष्ठेस्थितः सर्वजनाभिभूतं नरं प्रसूते प्रणयेन हीनम् ।
विवर्जितं सत्यसुखेन चित्तं विदेशरक्तं परतर्ककं च ॥' इति

यदि शुक्र छह बिन्दुओं से युक्त हो तो मनुष्य सत्य एवं सुख से वर्जित, सब लोगों से पीड़ा पाने वाला, घर से बाहर रहने वाला होता है। वह जीवन में सदा दूसरों से मांगता रहता है तथा प्रेमभाव से रहित स्वभाव वाला होता है।

**दोषैर्वातमुखैर्युतं मनुष्यं**
**प्रज्ञोनं व्यसनानुरक्तकं चेत् ।**
**कुर्य्यात्सप्तमगो नृशंसचेष्टं**
**दैत्यानां सचिवो भवं कृतघ्नम् ॥१२०॥**

दोषैरिति। दैत्यानां सचिवः शुक्रः सप्तमगः सप्तबिन्दुयुक्तस्तदा भवं मनुष्यं वातमुखैर्वातरोगप्रभृतिभिर्दोषैः कारणैर्युक्तं सहितं प्रज्ञया बुद्ध्योनं रहितं, व्यसनानुरक्तं स्त्रीभोगमद्यपानदोषानुसक्तं नृशंसचेष्टं क्रूरचेष्टं कृतघ्नमकृतज्ञं कुर्यात्। यथा वृद्धयवनो ब्रूते—

'करोति शुक्रः खलु सप्तमस्थो वातादि दोषैः सहितं मनुष्यम् ।
नृशंसचेष्टाव्यसनानुरक्तं सदा कृतघ्नं मतिवर्जितं च ॥' इति

यदि शुक्र सात बिन्दुओं से युक्त हो तो मनुष्य वात, कफ आदि दोषों से पीड़ित, बुद्धि से रहित तथा बुरी आदतों में आसक्त होता है। वह सदा क्रूर काम व क्रूर चेष्टाएं करने वाला एवं कृतघ्न होता है।

**साध्यानं बहुकल्मषैरुपेतं**
**भोऽतिव्याधियुतं सपत्नयुक्तम्।**
**कुर्य्याद्बन्धुभिरुज्झितं कृतघ्नं**
**दुःशीलं मनुजं सदाऽष्टमस्थः ॥१२१॥**

साध्यानमिति। भः शुक्रोऽष्टमस्थोऽष्टबिन्दुयुक्तस्तदा मनुजं सहाध्यानेन चिन्तया वर्तमानः साध्यानं, बहुभिः कल्मषैः पापैरुपेतं युक्तमतिव्याधियुक्तं महारोग-युक्तं सपत्न शत्रुसमेतं बन्धुभिरुज्झितं त्यक्तं, कृतघ्नं दुःशीलं दुष्टस्वभावं कुर्यादिति शेषः। यथा च वृद्धयवनः—

'शुक्रोऽष्टमस्थः कुरुते कुशीलं नरं महाव्याधियुतं कृतघ्नम्।
ज्ञात्या विहीनं बहुपापयुक्तं चिन्तान्वितं वैरियुतं सदैव ॥' इति

यदि शुक्र आठ बिन्दुओं से युक्त हो तो मनुष्य सदा चिन्तातुर रहने वाला, बहुत से पाप करने वाला तथा बड़े-बड़े रोगों से पीड़ित होता है। वह शत्रुओं से युक्त, बन्धु बान्धवों द्वारा परित्यक्त, दुष्ट-स्वभाव वाला और कृतघ्न होता है।

**शनि की रेखाओं का फल :**

**रेखास्थः प्रथमे स्थिरस्वभावं**
**सौरिः सर्वजनप्रधानसञ्ज्ञम्।**
**अश्रान्तं सुभगं विनीतवेशा-**
**लङ्कारं दयितातिथिं प्रजातम् ॥१२२॥**

रेखास्थ इति। सूरस्य सूर्यस्य गोत्रापत्यं सौरिः शनिः प्रथमे आद्यस्थाने रेखास्थ एकरेखायुक्तं इत्यर्थः। तदा प्रजातमुत्पन्नं, स्थिरस्वभावं, कठिनस्वभावं, सर्वजनेषु प्रधानं मुख्यं सुभगं सज्जनमश्रान्तं निरन्तरं, विनीतवेशालंकारं दयिता-तिथिं प्रियातिथिं कुर्यादिति शेषः। तथा च वृद्धयवनः—

'रेखास्थितः सूर्यसुतः प्रसूते स्थिरस्वभावं सुभगं मनुष्यम्।
प्रियातिथिं सर्वजनप्रधानं विनीतवेशाभरणं सदैव ॥' इति

यदि शनि एक रेखा से युक्त हो तो मनुष्य बहुत स्थिर स्वभाव वाला, सब लोगों में सम्मानित स्थान वाला, सज्जन, अथक प्रयत्न करने

वाला, विनीत वेष व आभूषणादिक धारण करने वाला और अतिथि-जनों का सत्कार करने वाला होता है।

**सर्वत्र सौख्यमिनदेहभवो द्वितीये**
**युक्तं सुखेन सहसा सहितं प्रसूते।**
**जातं नरं विरहितं च महोपतापै-**
**र्मुक्तं जनौ यदि तदा परिपंथिरोगैः ॥१२३॥**

सर्वत्रेति। जनौ जन्मसमये शनिर्द्वितीये रेखाद्वययुक्तो यदितदा, जातमुत्पन्नं मनुष्यं सर्वत्र सुखमेव सौख्यं सहसा बलेनयुक्तं महोपतापैर्महाव्याधिभिर्विरहितं वर्जितं, परिपंथिनः शात्रवाः रोगाव्याधयस्तैर्विमुक्तं रहितं प्रसूते जनयति। यथा च वृद्धयवनः—

'द्वितीयसंस्थो रविजः प्रसूते नरं महाव्याधिविवर्जितं च।
सर्वत्रसौख्यं रिपुरोगहीनं बलेन युक्तं सुखसंयुतं च॥' इति

यदि शनि दो रेखाओं से युक्त हो तो मनुष्य को सर्वत्र सुख मिलता है। वह बलवान् और बड़े रोगों से रहित होता है तथा साथ ही उसे शत्रुजन या सामान्य रोग भी नहीं सताते। अर्थात् वह शरीर व मन से पूर्ण स्वस्थ रहता है।

**आदित्यदेहजनितो जनने तृतीये**
**स्वल्पात्मजं खरमहाङ्गयुतं सलोहम्।**
**कुर्य्याद् धनेन सहितं निजधर्म्मविद्या-**
**युक्तं भवं जनिभृतं श्रुतिशास्त्रलब्धम् ॥१२४॥**

आदित्येति। जनने जन्मसमये आदित्यदेहजनितः शनिः, तृतीये रेखात्रययुक्तस्तदा भवं जातं जनिभृतं मनुष्यं स्वल्पात्मजमल्पपुत्रं, खरमहांगयुतं गर्दभोष्ट्रयुक्तं, सलोहं लोहेन सह वर्तते यस्तम्। धनेन द्रव्येण सहितं निजधर्मविद्यायुक्तं कुलधर्मविद्यासहितं, श्रुतयो वेदाः शास्त्राणि वेदांगानि लब्धं प्राप्तं येन तथोक्तं तम् कुर्यात्। यथा च वृद्धयवनः—

'सौरस्तृतीये कुरुते धनाढ्यं स्वधर्मविद्यागमशास्त्रलब्धम्।
खरोष्ट्रलोहाढ्यमथाल्पपुत्रं नरं सदा शान्तमतिप्रभावम्॥' इति

जन्म के समय यदि शनि तीन रेखाओं से युक्त हो तो मनुष्य को पुत्र सन्तान कम होती है। वह गधे, ऊंट आदि पशुओं से युक्त अथवा

उनसे लाभ कमाने वाला होता है। उसे लोहे से भी लाभ होता है। साथ ही वह मनुष्य धन से युक्त, धर्म व विद्या से परिपूर्ण और वेद शास्त्रों को जानने वाला होता है।

**वृद्ध यवन** के मतानुसार उपर्युक्त फल के अतिरिक्त वह व्यक्ति शान्त और प्रभावशाली भी होता है।

**भोगैर्युतं सुरुचिरैर्घनसारगन्ध-**
**पूर्वैस्तनूजसहितं मृदुगश्चतुर्थे।**
**जातं करोति मनुजं पुरुभोज्यपानं**
**भूयोतृषार्थसहितं सततं सहर्षम् ॥१२५॥**

भोगैरिति। मृदुग: शनिश्चतुर्थे रेखाचतुष्टययुक्तस्तदा जातमुत्पन्नं मनुजं मनुष्यं, सुरुचिरैरतिमनोहरैर्घनसारगन्धपूर्वैः कर्पूरगन्धादिभिः भोगैः सुखदुःखाद्यनुभवरूपैः युतं सहितं तनूजसहितं पुत्रयुतं पुरुभोज्यपानं बहुभोज्यपानमधिकान्नयुतं सततं भूयो बहु वृषार्थयुतं धर्मार्थयुक्तं सह हर्षेण वर्तते यस्तम् करोति विदधाति। तथा च वृद्धयवनः—

चतुर्थगः सूर्यसुतः प्रसूते नरं सुताढ्यं बहुभोज्यपानम्।
कर्पूरगन्धादिकभोगभाजं प्रभूतधर्मार्थसमेतहर्षम् ॥' इति

यदि शनि चार रेखाओं से युक्त हो तो मनुष्य मनोहर कर्पूरादि सुगन्धित द्रव्यों का सेवन करने वाला, पुत्रों से युक्त और खूब खाने-पीने वाला होता है। साथ ही वह व्यक्ति खूब धन, धर्म व हर्ष से युक्त होता है।

**पङ्गुः पञ्चमगः श्रिया समेतं**
**कान्ताया दयितं गतारिपक्षम्।**
**मर्त्येशाश्रयमुद्भवं कुलीन-**
**मश्रान्तं सुखिनं नरं प्रसूते ॥१२६॥**

पंगुरिति। पंगुः शनिः पंचमगः पंचरेखायुक्तश्चेत्तदोद्भवमुत्पन्नं, नरं मनुष्यं श्रिया लक्ष्म्या समेतं युक्तम्। कान्तायाः स्त्रियः दयितं प्रियं गतारिपक्षं शत्रुगणरहितं, मर्त्येशाश्रयं राजाश्रयंकुलीनं सभ्यमश्रान्तं नित्यं सुखमस्यास्तीति तं प्रसूते। यथाह वृद्धयवनः—

'करोति सौरः खलु पंचमस्थो नरं कुलीनं सुखिनं च नित्यम्।
श्रियासमेतं विगतारिपक्षं नृपाश्रयं स्त्रीदयितं सदैव ॥' इति

यदि शनि पांच रेखओं से युक्त हो तो मनुष्य श्रीमान्, स्त्रियों का प्यारा और शत्रुओं से सर्वथा रहित होता है। वह राजा के आश्रय से उन्नति करने वाला, सज्जन, कुलीन, निरन्तर परिश्रमी तथा सुखी होता है।

**षष्ठे शीलधनं यथाप्रतिज्ञं**
**भास्वद्देहभवोऽर्थभूमिलब्धम् ।**
**पृथ्वीभृन्महितं महाप्रभावं**
**गाङ्गेयार्थसमन्वितं विधिज्ञम् ।।१२७।।**

षष्ठ इति। भास्वद्देहभवः शनिः षष्ठे षड्रेखायुक्तस्तदा, शीलमेवधनं यस्य तथोक्तं तम्। प्रतिज्ञामनतिक्रम्य वर्त्तमान इति यथा प्रतिज्ञम्। अर्थो धनं भूमिः पृथ्वी लब्धं प्राप्तं येन तथोक्तं तम्। पृथ्वीभृता राज्ञा, महितं पूजितं महाप्रभावमधिकप्रभावशालिनं गांगेयं सुवर्णमर्थो धनं ताभ्यां समन्वितं, विधिज्ञं विधानविदं करोतीति शेषः। यथा च वृद्धयवन वचनम्—

'षष्ठेस्थितः शीलधनं प्रसूते नरं विधिज्ञं वसुभूमिलब्धम्।
यथाप्रतिज्ञं कनकार्थयुक्तं महाप्रभावं नरनाथपूज्यम् ।।' इति

यदि शनि छह रेखाओं से युक्त हो तो मनुष्य अपने वचन का प्राणपण से पालन करने वाला, खूब भूमि व धन को पाने वाला, राजा द्वारा पूजित तथा अत्यन्त प्रभावशाली होता है। वह सोने व रुपये पैसे से पूर्ण समृद्ध और विधिशास्त्र का वेत्ता होता है।

**सौरः सप्तमगोऽङ्गनाविधानं**
**धीरं कीर्तिकरं कलाप्रवीणम्।**
**सद्द्रव्यं प्रथितं सदा त्रिलोके**
**कुर्वीताङ्गभृतं मनोरमं चेत् ।।१२८।।**

सौर इति। सौरः शनिः सप्तमगः सप्तरेखायुक्तस्तदा, देहभृतां मनुष्याणामिति यावत्। अंगनास्त्री तस्या विधानं प्रकारस्तम्, धीरं पण्डितं कीर्त्तिकरं यशस्करं, कलासु शिल्परूपासु प्रवीणं निपुणं सद्द्रव्यंधनिकं, सदा नित्यं त्रिलोके प्रथितं विख्यातं मनोरमं सुन्दरं कुर्वीत विदधीत इति। तथा च वृद्धयवनः—

'शनैश्चरः सप्तमगो विधत्ते नरं धनाढ्यं प्रमदाविधानम्।
विचक्षणं कीर्त्तिकरं मनोज्ञं कलासुदक्षं प्रथितं त्रिलोके ।।' इति

यदि शनि सात रेखाओं से युक्त हो तो मनुष्य नायिका भेद के गुप्त रहस्यों को समझने वाला, अत्यन्त धैर्यशाली तथा खूब नाम कमाने वाला होता है। वह कलाओं में निष्णात, धन से युक्त और तीनों लोकों में प्रसिद्ध होता है। साथ ही वह व्यक्ति सुन्दर शरीर का स्वामी होता है।

**जातं सञ्ज्ञाजोऽष्टमस्थो विचित्र-**
**माल्यालङ्कारैः समेतं प्रसूते।**
**नीत्या युक्तं वेदविद्यासमेतं**
**सर्वत्र स्त्रीनन्दनाद्यैरुपेतम् ॥१२६॥**

जातमिति। संज्ञायां सूर्यपत्न्यां जायते इति संज्ञाजः शनिरष्टमस्थोऽष्ट-रेखायुक्तस्तदा जातं नरं मालायै हितानि माल्यानि, विचित्राणि च तानि माल्यानि विचित्रमाल्यानि-अलंकारभूषणानि च तैः समेतं युक्तं नीत्वा नयेन युक्तं सहितं सर्वत्र वेदाश्चत्वारो विद्याऽष्टादश आभिः समेतं युक्तं, स्त्री गृहिणी, नन्दयन्तीति नन्दनाः पुत्रास्तैरुपेतं युक्तं प्रसूते। यथाह वृद्धयवनः—

'स्थानेऽष्टमे सूर्यसुतः प्रसूते विचित्रमाल्याभरणं मनुष्यम्।
सर्वत्रविद्यागमनीतियुक्तं कलत्रपुत्रादिसमन्वितं च ॥' इति

यदि शनि आठ रेखाओं से युक्त हो तो मनुष्य अनेक प्रकार के चित्र-विचित्र माल्याम्बर और अलंकारों से युक्त, नीति में निपुण तथा वेदविद्या विशारद होता है। साथ ही ऐसा व्यक्ति स्त्रीजनों व पुत्रों का सुख प्राप्त करता है।

**शनि के बिन्दुओं का फल :**

**आद्ये बिन्दुगतः करोति मर्त्यं**
**दीनं भूपतिपीडितं नृशंसम्।**
**सञ्जातं परिभूतगात्रमार्कि-**
**स्त्यक्तं बन्धुजनैरनल्पदुःखम् ॥१३०॥**

आद्य इति। आर्किः शनिः प्रथमस्थाने बिन्दुगत एकबिन्दुयुक्तस्तदा, संजात-मुत्पन्नं मर्त्यं मनुष्यं दीनं दरिद्रं भूपतिना राज्ञा पीडितं दुःखितं नृशंसं क्रूरं, परिभूतं तिरस्कृतं गात्रं शरीरं यस्य तं तथोक्तम्। बन्धुजनैः सगोत्रैस्त्यक्तमुज्झितमनल्पदुःखं बहुदुःखं करोति विदधाति। यथाऽऽहुर्वृद्धयवनाः—

'बिन्दौ स्थितः सूर्यसुतो यदाऽद्ये करोति जातं परिभूतदेहम् ।
स्वबान्धवैस्त्यक्तमनल्पदुःखं दीनं नृशंसं नृपपीडितं च ॥' इति

यदि शनि एक बिन्दु से युक्त हो तो मनुष्य दीन-हीन, राजा से पीड़ित और नृशंस होता है। ऐसे व्यक्ति को इसके सगोत्र लोग त्याग देते हैं तथा वह शरीर का कष्ट प्राप्त करता है। इसके दुःखों की कोई सीमा नहीं होती।

**भास्वद्भूः सुमहाकदर्य्यसंज्ञं**
**मर्त्यं पापमुखं चलस्वभावम् ।**
**कुक्ष्यस्थ्यामयसंनिपीडिताङ्गं**
**चेत्कुर्य्याद् दुरितात्मकं द्वितीये ॥१३१॥**

भास्वद्भूरिति। भास्वद्भूः शनिर्द्वितीये बिन्दुद्वययुक्तश्चेत्तदा मर्त्यं नरं सुमहाकदर्य्यसंज्ञं पापमेवेत्यर्थः तादृशं पापमयमेव मुखं यस्य तं तथोक्तं कटुभापिणामग्रगण्यं चलस्वभावं चंचलमतिं कुक्षिरुदरमस्थिकीकसं तयोरामयोरोगस्तेन सन्निपीडितमंगं यस्य तं तथोक्तं दुरितात्मकं पापात्मकं कुर्यात्। यथाऽऽह यवनपरिवृढः—

'द्वितीयसंस्थः कुरुतेऽर्कपुत्रः पापात्मकं पापमुखं मनुष्यम् ।
कुक्ष्यस्थिरोगैः परिपीडितांगं चलस्वभावं सुमहाकदर्य्यम् ॥' इति

यदि शनि दो बिन्दुओं से युक्त हो तो मनुष्य पक्का कजूंस, पापपूर्ण वचन वाला, कटुभाषी तथा चंचल स्वभाव वाला होता है। ऐसे व्यक्ति को पेट व हड्डियों में उत्पन्न हुई व्याधि से शारीरिक कष्ट होता है। वह अत्यन्त पापपूर्ण स्वभाव वाला (पापात्मा) भी होता है।

**संज्ञाभूरभिभूतकं समस्तै-**
**र्लोकैश्चौर्य्यबलं दयाविहीनम् ।**
**सत्योनं वितथक्रियं तृतीये**
**भूयिष्ठाशनमत्र घातुकं च ॥१३२॥**

संज्ञाभूरिति। संज्ञाभूः शनिस्तृतीये बिन्दुत्रययुक्त इत्यर्थः। तदा समस्तैः सर्वैर्लोकैर्जनैरभिभूतकं पीडितं चौरस्यभावश्चौर्यं तदेव बलं यस्य तं तथोक्तम्। दयया विहीनं वर्जितं सत्येन तथ्येनोनं रहितं वितथमसत्यं क्रिया कर्म यस्य तं तथोक्तं भूयिष्ठाशनं बहुभोजनभाजं घातुकं क्रूरं कुर्यादिति शेषः। यथाऽऽहुर्यवनप्राञ्चः—

'तृतीयसंस्थः कुरुतेऽर्कपुत्रो नरं नृशंसं वितथक्रियं च।
बह्वाशनं सत्यदयाविहीनं चौर्यं बलं सर्वजनाभिभूतम् ।।' इति

यदि शनि तीन बिन्दुओं से युक्त हो तो सब लोगों से पीड़ित होने वाला, चोरी करने की आदत वाला, दया से रहित, सत्य से रहित कर्म वाला तथा अधार्मिक होता है। वह भोजन करने में शूर अर्थात् खूब खाने वाला तथा क्रूर स्वभाव वाली सन्तान का पिता होता है।

**दुर्बुद्धिमार्किर्मलिनं स्वभावतो**
**द्वेष्यं विरक्तं पुरतो विवर्जितम्।**
**धर्म्मेण वंशस्य कुपात्रदानकं**
**सिद्ध्या चतुर्थे रहितं स्वकर्म्मणः ।।१३३।।**

दुर्बुद्धिमिति। आर्किः शनिश्चतुर्थे बिन्दुचतुष्टययुक्तश्चेत्तदा स्वभावतो मलिनं मलदूषितं द्वेष्यं विरोधिनं, पुरतो नगरतो विरक्तं विरतं वंशस्य कुलस्य, धर्मेण विवर्जितं रहितं कुपात्रदानकं निन्दितजनदानकरं स्वकर्मणो निजकर्मणः सिद्ध्या निष्पत्त्या रहितं वर्जितं कुर्यादिति। यथात्र वृद्धयवनः—

'चतुर्थगः सूर्यसुतः प्रसूते विरक्तपौरं मलिनं स्वभावात्।
द्वेष्यं कुबुद्धिं हतकर्मसिद्धिं कुपात्रदानं कुलधर्महीनम् ।।' इति

यदि शनि चार बिन्दुओं से युक्त हो तो व्यक्ति स्वभाव से अत्यन्त मलिन स्वभाव वाला, वैरभाव रखने वाला, नगर से दूर भागने वाला तथा कुलधर्म और आचार से हीन होता है। वह सदा कुपात्र को दान देने वाला तथा अपने सभी कामों में असफल होता है।

**कुर्यात्पंचमगो ज्वरामयार्त्तं**
**मित्रोन परिभूतगात्रमत्र ।**
**संसक्तं परकामिनीषु पुत्रा-**
**द्यार्त्याढ्य सततं मृदुः प्रजातम्।।१३४।।**

कुर्यादिति। मृदुः शनिः पंचमगः पंचबिन्दुयुक्तस्तदा प्रजातमुत्पन्नं नरमिति शेषः। ज्वरामयार्त्तं ज्वररोगेणपीडितं मित्रोनं मित्ररहितं परिभूतगात्रं तिरस्कृत-देहं परकामिनीषु परस्त्रीषु संसक्तमासक्तं मिलितं च, पुत्राद्यार्त्याढ्यं पुत्रादिपीडा-युक्तं कुर्याद् विदध्यात्। यथा वदति वृद्धयवनः—

'शनिर्विधत्ते परदारसक्तं पुत्रादिपीडायुतमानसं च।
ज्वरामयार्त्तं परिभूतमूर्तिं सदा नरं पंचमगो विमित्रम् ।।' इति

यदि शनि पांच बिन्दुओं से युक्त हो तो मनुष्य बुखार से पीड़ित रहने वाला, लोगों से तिरस्कार पाने वाला, कम मित्रों वाला या मित्र-रहित और पर स्त्री लोलुप होता है। साथ ही इसके पुत्र भी सदा पीड़ित रहते हैं।

**षष्ठस्थोऽघरतं प्रभूतवैरं**
**शोकाढ्यं परसुन्दरीप्रसक्तम् ।**
**मार्त्तण्डिः प्रियसाध्वसं प्रभोनं**
**रोगैश्चोपहतं दृशोर्गुदायाः ।।१३५।।**

षष्ठस्थ इति । मार्त्तण्डि: शनि: षष्ठस्थ: षड्बिन्दुयुक्तस्तदा, अघरतं पाप-परायणं प्रभूतवैरं बहुविरोधं, शोकाढ्यं शोकयुक्तं, परसुन्दरीप्रसक्तमन्यदारारक्तं, प्रियसाध्वसं भयभीतस्वभावं, प्रभयाकान्त्योनं वर्जितं दृशोर्नेत्रयोर्गुदा पायुरितीन्द्रिय-स्तस्य रोगैर्व्याधिभिरुपहतं मर्दितं कुर्यादिति शेषः । तथा च वृद्धयवनः—

'षष्ठे शनिः पापरतः प्रसूते प्रभाविहीनं परदारकं च ।
गुदाक्षिरोगोपहतं सशोकं प्रभूतवैरं प्रियसाध्वसं च ।।' इति

यदि शनि छह बिन्दुओं से युक्त हो तो मनुष्य पाप कर्म में लिप्त रहने वाला, बहुत से शत्रुओं से युक्त तथा शोक से सन्तप्त होता है। ऐसे व्यक्ति का पर स्त्री में अनुराग होता है। यह सदा भयभीत रहता है और कान्तिरहित शरीर वाला होता है। इसके गुदा स्थान व नेत्रों में रोग उत्पन्न होते हैं।

**भानूत्थो हतनन्दनं स्वबन्धु-**
**हीनं भूरिविरोधकं प्रकुर्य्यात् ।**
**मर्त्यं सप्तमगः क्रियाविहीनं**
**त्यक्तं बन्धुजनैर्गदेन युक्तम् ।।१३६।।**

भानूत्थ इति । भानूत्थः शनिः सप्तमगः सप्तबिन्दुयुतश्चेत्तदा हता विनष्टा नन्दनाः पुत्रा यस्य स तम् । स्वबन्धुभिर्निजगोत्रजैः हीनं रहितं, भूरिविरोधकं प्रभूत वैरं, क्रियया स्वकुलोचितकर्मणा रहितं वर्जितं, बन्धुजनैः सगोत्रैस्त्यक्तं गदेन रोगेण युक्तं प्रकुर्यात् । यथा च वृद्धयवनः—

'सौरो विधत्ते खलु सप्तमस्थो नरं क्रियाहीनमनल्पवैरम् ।
सदा सरोगं निजबन्धुहीनं हतात्मजं बन्धुविवर्जितं च ।।' इति

यदि शनि सात बिन्दुओं से युक्त हो तो मनुष्य को मृत सन्तान उत्पन्न होती है। वह बन्धुवर्गों से रहित तथा प्रबल वैरियों से युक्त होता है। वह अपने कुलधर्म से पतित, बन्धुओं द्वारा परित्यक्त एवं रोगों से पीड़ित होता है।

**कुर्वीताष्टमगो विदेशभाजं**
**रुग्युक्तं परतर्ककं दरिद्रम्।**
**पित्तोत्थैः परिपीडितं च रोगै-**
**रुग्रैर्भूरिविवर्णरक्तमार्किः ॥१३७॥**

कुर्वीत इति। आर्किः शनिरष्टमगोऽष्टबिन्दुयुक्तश्चेत्तदा विदेशभाजं परदेशवासिनं, रुग्युक्तं रोगसहितं, परतर्ककं परेभ्योऽन्येभ्यो याचनाकृतं दरिद्रं निर्धनं, पित्तोत्थैः पित्तजनितैरुग्रैरुत्कटैः रोगैर्व्याधिभिः परिपीडितं दुःखितं भूरिविवर्णरक्तं बहुनीचानुरक्तं, कुर्वीत। जातमिति शेषः। यथाह वृद्धयवनः—

'सौरोऽष्टमस्थो कुरुते दरिद्रं नरं सरोगं बहुनीचरक्तम्।
पित्तोद्भवैः पीडितमुग्ररोगं विदेशभाजं परतर्ककं च ॥' इति

यदि शनि आठ बिन्दुओं से युक्त हो तो मनुष्य विदेश में निवास करने वाला, रोगों से पीड़ित तथा सबसे याचना करने वाला एवं दरिद्री होता है। वह पित्तविकार से उत्पन्न भयानक रोगों से पीड़ित और अत्यन्त नीच लोगों की संगति में रहने वाला होता है।

**सूर्य का भावगत विशेष फल :**

**भानौ तनौ निम्नसपत्नभागगे**
**रामाब्धिरेखासहिते भवो गदी।**
**स्वोच्चे स्वराशौ किमिने तनौ शरा-**
**दिरथानयुक्ते बहुजीवितो नृपः ॥१३८॥**

भानाविति। भानौ रवौ, तनौ लग्ने निम्नसपत्नभागगे नीचशत्रुनवांशगे रामाब्धिरेखासहिते त्रिचतूरेखायुते, तदाभवो जनितो गदी रोगी भवेदिति। स्वोच्च इति। किमथवा इने रवौ स्वोच्चे निजतुंगे मेषङ्गत इत्यर्थः। स्वराशौ सिंहराशौ, तनौ लग्ने, पंचप्रभृति रेखासहिते तदा, बहुजीवितश्चिरायुर्नृपो राजा भवेदिति शेषः।

यदि सूर्य नीच या शत्रु राशि के नवांश में लग्न में स्थित हो तथा तीन या चार रेखाओं से युक्त हो तो मनुष्य रोगी होता है।

यदि अपनी उच्चराशि मेष में या अपनी राशि सिंह में सूर्य लग्न-गत हो और पांच या पांच से अधिक रेखाओं से युक्त हो तो मनुष्य दीर्घायु युक्त तथा राजा होता है।

अभी तक रेखा व बिन्दुओं से युक्त ग्रहों का स्वतन्त्र फल बताया गया है। यहां से ग्रहों की रेखाओं के साथ-साथ उनकी अधिष्ठित राशि व स्थान के अनुरोध से विशेष फल बताया जा रहा है। सूर्य के उपर्युक्त फल से **वैद्यनाथ** अक्षरशः सहमत हैं। इन्होंने अपने ग्रन्थ में बिन्दु को शुभफल का द्योतक माना है।अतः संस्कृत टीका में उल्लिखित सम्बन्धित उद्धरण से भ्रम में नहीं पड़ना चाहिए। ग्रन्थकार ने संस्कृत टीका में किसी अन्य ग्रन्थ के प्रसंग से सूर्य की रेखाओं का फल इस प्रकार बताया है। यहां पर त्रिकोण शोधन व एकाधिपत्य शोधन के उपरान्त बची हुई रेखाओं का ग्रहण करना चाहिए—

आठ रेखा युक्त सूर्य हो तो राजा से धनागम, सात से कान्ति, सुख व वैभव में वृद्धि, छह से प्रताप में वृद्धि, पांच से धन लाभ, चार से शुभाशुभ मिश्रित फल, तीन से मार्ग में भटकते रहने की थकावट, एक या दो से रोगों का डर तथा शून्य रेखा होने पर मृत्यु होती है।

**तर्केष्वगोरगकलासहिते त्रिकोणे**
**केन्द्रे रवौ करयमेषु शरानलेषु।**
**शून्यानलेषु रसवह्निषु वत्सरेषु**
**जातस्य मृत्युरुदितो जनितुः किमस्य ॥१३६॥**

तर्केति। रवौ सूर्ये त्रिकोणे पंचनवमयोरन्यतरे, केन्द्रे वा भवति तदा तर्केष्वगोरगकलासहिते षट्पंचसप्ताष्टरेखायुक्ते सति तदा क्रमेण करयमेषु युग्मयुग्मतुल्येषु, शरानलेषु पंचाग्निप्रमितेषु, शून्यानलेषु त्रिशन्मितेषु, रसवह्निषु षट्त्रिंशन्मितेषु वत्सरेषु वर्षेषु जातस्य नरस्य मृत्युर्मरणमुदितं कथितम्। किमथवास्य जातकस्य जनितुः पितुर्मृत्युरुदितः कथितः। बुधैरिति शेषः।

यदि सूर्य केन्द्र या त्रिकोण में स्थित होकर छह रेखाओं से युक्त हो तो बाईसवें वर्ष में, पांच रेखाएं हों तो पैंतीसवें वर्ष में, सात रेखाएं हों तो तीसवें वर्ष में और आठ रेखाएं हों तो छत्तीस वर्ष में मनुष्य की या उसके पिता की मृत्यु कहनी चाहिए। ३६

**वैद्यनाथ** ने भी उक्त कथन की पुष्टि की है। हमारे विचार से यदि जातक अन्यथा प्रकारों से अल्पायु सिद्ध होता हो तथा सूर्य की उक्त रेखाएं हों तो तदनुसार उक्त वर्ष में जातक की मृत्यु समझनी चाहिए। यदि बालक मध्यायु या दीर्घायु योग वाला हो तो कदाचित उक्त फल जातक के सम्बन्ध में घटित नहीं होगा। ऐसी स्थिति में पिता के सम्बन्ध में विचार पूर्वक कहना चाहिए। ध्यान रखिए, किसी भी निर्णय पर पहुंचने से पहले सभी ज्ञात और उपलब्ध साधक व बाधक प्रमाणों का विचार करना चाहिए। क्योंकि ज्योतिष के नियम सर्वथा असम्पृक्त होकर काम नहीं करते।

**शोध्यावशिष्टकरतुल्यकलान्वितेर्के**
**केन्द्राश्रिते शशधरैन्दवकोणयुक्ते।**
**दिग्वर्षतः परत एति पितुः समृद्धां**
**राज्यश्रियं मुनिवरा इति सङ्गिरन्ते॥१४०॥**

शोध्येति। अर्के रवौ, शशधरश्चन्द्र,, ऐन्दवो बुधः, कोणः शनिः, शोध्यावशिष्टकरतुल्यकलान्विते वक्ष्यमाणत्रिकोणैकाधिपत्यशोध्यावशिष्ट रेखाद्वययुक्ते, केन्द्राश्रिते लग्नचतुर्थसप्तमदशमानामाश्रिते गते सति, तदा दिग्वर्षतो दशाब्दात् परतः पश्चात् पितुर्जनकस्य, समृद्धां बहुसम्पदां राज्यश्रियं राजलक्ष्मीमेति प्राप्नोति। इत्येव मुनिवरा मुनीनां मध्येवराः श्रेष्ठाः सांगिरन्ते भाषन्त इति।

त्रिकोण शोधन व एकाधिपत्य शोधन के बाद यदि सूर्य दो रेखाओं से युक्त होकर, चन्द्र, बुध व शनि के साथ किसी केन्द्र स्थान में स्थित हो तो मनुष्य दस वर्ष की अवस्था के बाद बहुत-सी पैतृक सम्पत्ति तथा राज्य लक्ष्मी को प्राप्त करता है, ऐसा मुनियों का वचन है।

त्रिकोण शोधन व एकाधिपत्य शोधन के विषय में उदाहरण सहित विस्तारपूर्वक विचार प्रस्ताराष्टक वर्ग के प्रसंग में आगे किया जाएगा।

**सूर्याष्टक वर्ग से दिन का शुभाशुभ ज्ञान :**

**विरोचनाक्रान्तभतश्चतुर्भ-**
**रेखैक्यमाद्यः कथितः सभागः।**
**तथा तदाक्रान्तभतः प्रबन्धा-**
**च्चतुर्भगस्थानयुतिर्द्वितीयः ॥१४१॥**

भागस्तथा तन्नवमात्तुरीय-
निशान्तगस्थानयुतिस्तृतीयः ।
भागो दिनस्य प्रथमोऽथ मध्यो
ऽन्त्योऽशोऽशुभो यत्र कृशं फलैक्यम् ॥१४२॥

विरोचन इति । भाग इति । विरोचनः सूर्यस्तदधिष्ठितराशितः स्थान-चतुष्टयस्थानां रेखाणां, यदैक्यं स आद्यः प्रथमो भागोऽशः कथित उक्तः । तथा तेनैव प्रकारेण, तदाक्रान्तभतः सूर्याधिष्ठितराशितः, प्रबन्धात्पञ्चमस्थानात्, स्थान-चतुष्टयस्थानां रेखाणां युतिर्योगो द्वितीयभागः । तन्नवमात्सूर्याधिष्ठितराशितो यो नवमो राशिस्तस्मात्स्थानचतुष्टयस्थानां रेखाणां योगस्तृतीयो भागो ज्ञेयः । इह ते क्रमेण दिनस्य, प्रथम आद्यो, मध्यो द्वितीयोऽन्त्यस्तृतीयोऽशो भागो ज्ञेय इति शेषः । यत्र यस्मिन् भागे, कृशं स्वल्पं, फलैक्यं रेखैक्यं, भवति, तस्माद् दिनस्य स भागोऽशु-भोऽप्रशस्तो नेष्टफलप्रद इत्यर्थः ।

जन्म के समय सूर्य जिस राशि में हो उससे तीन राशि आगे तक अर्थात् सूर्याधिष्ठित राशि से चौथी राशि तक दिन का प्रथम भाग समझना चाहिए। इसी प्रकार पांचवीं राशि से आठवीं तक दिन का मध्यभाग और नौवीं राशि से बारहवीं राशि तक दिन का अन्तिम भाग कल्पित कर लेना चाहिए। ये तीनों भाग क्रमशः किसी भी दिन के प्रथम, मध्य व अन्तिम भागों का प्रतिनिधित्व करेंगे। अब सूर्याष्टक वर्ग में प्रत्येक उक्त भाग में पड़ने वाली राशियों की रेखाओं का पृथक् योग करना चाहिए। इस प्रकार तीन पृथक् रेखायोग प्राप्त होगें। इनमें जो योग अधिक है तथा वह दिन के जिस भाग का द्योतक है, उसी भाग में सब शुभकर्म होंगे। अर्थात् सफलता मिलेगी। जिस दिन भाग में कम रेखायोग हो तो वहां पर कर्म सिद्धि कष्टसाध्य होगी।

पूर्वोक्त वास्तविक उदाहरण में सूर्य कन्या राशि में स्थित है। सूर्याष्टक वर्ग में (पूर्वोक्त) कन्या की ६ रेखाएं, तुला की ४, वृश्चिक की ३ तथा धनु की ४ रेखाएं हैं। इनका योग १७ है। यह योग उस (उदाहरणोक्त) व्यक्ति के लिए दिन के प्रथम भाग का द्योतक होगा।

इसी प्रकार मध्यभाग के लिए मकर की रेखाएं ४, कुम्भ की ३, मीन की ७ व मेष की ४ रेखाएं हैं, जिनका योग १८ है।

अब दिन के अन्तिम भाग के लिए वृष की २ रेखाएं, मिथुन की ६, कर्क की ४ तथा सिंह की १ रेखा है, जिनका योग १३ है।

इनके लिए दिन का मध्य भाग सर्वाधिक रेखायोग १८ होने के कारण सब कामों में शुभ व सफलता देने वाला होगा।

पूर्व भाग भी १७ रेखायोग के कारण शुभ ही होगा, किन्तु मध्य-भाग की तुलना में कम शुभ होगा तथा अन्तिम भाग सर्वाल्प रेखायोग १३ होने के कारण अशुभ, वर्जित व असफलता देने वाला होगा।

**रविरेखा से कष्टप्रद वर्ष का ज्ञान :**

फलं विलग्नान्नलिनीप्रियान्तिम-
माकाशरत्नाद्धरिजान्तिमं तथा।
संव्वत्सरे तत्प्रमिते गदानना
वाप्तिः प्रदिष्टेति बुधैः पुरातनैः॥१४३॥

फलमिति। विलग्नात् तनुतो नलिनी कमलिनी तस्य प्रियः पतिः सूर्यः, तस्यान्तिमवसानं गणयित्वा यावत्फलमर्थाद्यावत्यो रेखा विद्यन्ते, तासां योगं, विधाय स्थानान्तरे स्थापयेत्। एवमाकाशरत्नात् सूर्यात् हरिजान्तिमं लग्नावसानं, यावत्फलं विद्यते, तदपि स्थापयदैकान्ते। तत्प्रमिते रेखायोगमिति तुल्ये संवत्सरे वर्षे, द्वयो-र्योगतुल्ये वर्षे वा, गदाननानां रोगादीनामवाप्तिः स्यादिति शेषः। इत्येवं पुरातनैः पुराणैर्बुधैः पण्डितैः प्रदिष्टा कथिता। तदुक्तं ग्रन्थान्तरे—

'तनुतो रविपर्यन्तं रवितोऽगान्तिकं फलम्।
तत्तुल्ये वत्सरे ज्ञेयो रोगादिप्राप्ति सम्भवः॥' इति

सूर्याष्टक वर्ग में लग्न से सूर्य पर्यन्त जितनी रेखाएं हों उनका योग करके एकत्र स्थापित कर लेना चाहिए। इसी प्रकार सूर्य से लग्न तक की रेखाओं का योग अलग स्थापित कर लेना चाहिए। उक्त दोनों योगों के बराबर आयु वर्षों में अथवा दोनों के योग के तुल्य आयु वर्ष में रोग शोकादि अरिष्टों का कथन कहना चाहिए।

पूर्वोक्त उदाहरण के संदर्भ में इसे समझते हैं। लग्न से सूर्य तक क्रमशः ३, ४, ४, ३, ७ रेखाएं हैं। इनका योग २१ हुआ। अतः २१वें वर्ष में रोगादि जनित कष्ट हो सकता है।

सूर्य से लग्न तक क्रमशः ४, २, ६, १, ६, ४, ४ रेखाएं हैं, जिनका योग २७ है। अतः २७वें वर्ष में भी रोगादि हो सकते हैं। अथवा २७+२१=४८वें वर्ष में भी रोग प्राप्ति हो सकती है।

चन्द्रमा का भावफल :

शून्यस्थानं सूरसोमाष्टवर्गे
मासो राशिर्यत्तदीयः समेषु।
सत्कार्य्येषु त्याज्य आहुः कुदोस्त्रि-
स्थानैर्युक्ते शीतभाःकीर्णकल्पे ॥१४४॥
यक्ष्मालस्यं द्वित्रिखेटैरुपेते
मृत्युः सप्तत्रिंशदब्दे कृशेऽब्जे।
नीचारिस्थे केन्द्रकोणायगे द्वि-
त्रिस्थानाढ्ये तस्य भावस्य हानिः ॥१४५॥

शून्यस्थानमिति। यक्ष्मालस्यमिति च। सूरः सूर्यः सोमश्चन्द्रस्तयोरष्टक-वर्गे रेखाष्टकवर्गे, यच्छून्यं स्थानं रेखारहितस्थानं, क्रमेण तदीयो मासो राशिः, समेषु सर्वेषु, सत्कार्येषु विवाहादिशुभकार्येषु त्याज्यो वर्ज्यः। आहुर्बुधा इति शेषः। शीत-भाश्चन्द्रस्तेन कीर्णं व्याप्तं कल्पं लग्नं यत्तत्तस्मिन् चन्द्राकान्तलग्न इत्यर्थः। कुदोस्त्रिस्थानैरेकद्वित्रि रेखाभिर्युक्ते सति तदा यक्ष्मा क्षय आलस्यमिति मन्दो यदि तस्मिन् द्वित्रिखेटैर्द्वाभ्यां त्रिभिर्वा खेटैर्ग्रहैरुपेते युक्ते तदा सप्तत्रिंशद्वर्षे मृत्युर्मरणं स्यादिति शेषः। तदुक्तं ग्रन्थान्तरे—

'सूर्याष्टवर्गे यः शून्योमासः संवत्सरं प्रति।
विवाहव्यवहारादि तस्मिन्मासि विवर्जयेत्।
चन्द्राष्टवर्गे शून्याक्षगते चन्द्रे परित्यजेत्।
शुभकर्मणि सर्वाणि कुर्याच्चेच्छ्रेष्ठराशिगे॥' इति

कृश इति। कृशे क्षीणेऽब्जेचन्द्रे नीचारिस्थे नीचशत्रुराशिगते, केन्द्रकोणा-यगे लग्न चतुर्थ पंचम सप्तमनवमदशम लाभानामन्यतमे गते प्राप्ते, द्वित्रिस्थानाढ्ये द्वित्रिरेखायुक्ते सति तदा तस्य भावस्य हानिः क्षतिः कथनीयेति शेषः।

चन्द्रमा व सूर्य के अष्टक वर्ग में जिस राशि में कोई रेखा न हो अर्थात् वहां पर शून्य हो तो उन राशियों में जब-जब सूर्य व चन्द्रमा का गोचर संक्रमण हो तो उस समय शुभ कार्य नहीं करना चाहिए। अर्थात् सूर्याष्टक वर्ग की शून्य रेखा वाली राशि में जब सूर्य आए तो उस मास में तथा चन्द्रमा के अष्टक वर्ग शून्य रेखा वाली राशि के नक्षत्रों में जब चन्द्रमा आए तो उन दिनों में विवाह आदि शुभ कृत्य नहीं होने चाहिएं।

यदि चन्द्रमा लग्न में स्थित होकर एक, दो या तीन रेखाओं से युक्त हो तो क्षय रोग (T. B.) तथा आलस्य करता है।

यदि लग्नगत चन्द्रमा एक, दो, तीन रेखाओं से युक्त हो तथा साथ में दो या तीन ग्रह भी हों तो ३७वें वर्ष में मृत्युप्रद होता है। यदि क्षीण चन्द्रमा नीच या शत्रुराशि में स्थित होकर दो, तीन रेखाओं से युक्त हो तथा केन्द्र, लाभ या त्रिकोण स्थान में हो तो अधिष्ठित भाव की हानि करता है।

रेखारहित राशि में सूर्य व चन्द्रमा का यथा प्रसंग संक्रमण होने पर विवाह, व्यवहार, शुभ कार्यारम्भ, रोजगार आदि प्रारम्भ नहीं करने चाहिएं। ऐसे समय में सभी कार्य विफल होते हैं। इस विषय में **जातक पारिजात** व अन्य ग्रन्थों की साक्षी दी गई है। **जातकादेश मार्ग** में तो यहां तक कहा गया है कि रेखारहित राशि में जिसके सूर्य व चन्द्रमा (अपने-अपने अष्टक वर्ग में) हों तो ऐसे व्यक्ति के साथ रहना तथा उसका प्रातः दर्शन भी मुसीबत को बुलावा देना है। इसके विपरीत पूर्णारेखा युत राशि में जिसके सूर्य व चन्द्रमा हों तो उनका प्रातःदर्शन उत्तम होता है तथा उन्हें वस्त्रादि का दान करना सम्पत्ति की वृद्धि करता है तथा उक्त परिस्थिति में उत्पन्न व्यक्ति निश्चय से समृद्ध होता है—

"पूर्णाक्षिक्षेन्दु जातानां प्रातर्दर्शनमुत्तमम्।
तेभ्यो वस्त्रादि दानं च भवेन्नूनं समृद्धये॥"

(जातकादेश० अष्टक० श्लो० १७)

**सारान्वितोऽब्ध्यादिकलायुतः कलेट्**
**केन्द्रायकोणे यदि भाववृद्धिकृत्।**
**केन्द्रे कलेशेऽष्टकलायुते यशो-**
**विद्यार्थवीर्य्यप्रबला भवा नृपाः॥१४६॥**

सारेति। यदि चेत् कलेट् चन्द्रः, सारेण बलेनान्वितो युक्तोऽब्ध्यादिकला-युतश्चतुः प्रभृति रेखासहितः सन्, केन्द्रायकोणे केन्द्रलाभपंचमनवमे, वर्त्तते तदा, भावस्याधिष्ठित स्थानस्य, वृद्धिमुपचयं करोति। यदि कलेशे चन्द्रेऽष्टकलायुतेऽष्ट-रेखासहिते, केन्द्रे कण्टके भवति तदा भवः जाताः पुरुषाः यशः कीर्त्तिः विद्या अर्थो धनं, वीर्यं बलमेभिः प्रबला बलवत्तराः नृपाः राजानः स्युरिति शेषः।

यदि बलवान् चन्द्रमा चार से अधिक रेखाओं से युक्त राशि में स्थित होकर केन्द्र, लाभ या त्रिकोण में स्थित हो तो उस भाव की वृद्धि करता है।

यदि आठ रेखाओं से युक्त चन्द्रमा केन्द्र स्थानों में स्थित हो तो मनुष्य कीर्तिमान्, धनवान्, विद्यावान् व राज पद पर आसीन होता है।

**चन्द्र रेखाओं से शुभ वर्ष का परिज्ञान :**

**विलग्नमारभ्य सुधाकरान्तं**
**सुधामयूखादुदयावसानम्**
**वर्षे फलैक्यप्रमिते सुतादि-**
**सुखोद्भवं ज्यौतिषिका वदन्ति ॥१४७॥**

विलग्नमिति। विलग्नं स्पष्टलग्नराशिमारभ्य सुधाकरान्तं चन्द्राक्रान्त राशिपर्यन्तं, यावत्फलं यावत्योरेखा विद्यन्ते तासां योगं विधाय स्थानान्तरे स्थापयेत्। एवं सुधामयूखाच्चन्द्राक्रान्तराशेः सकाशादुदयावसानं लग्नराशिपर्यन्तं गणयित्वा यावत्फलं यावत्योरेखा विद्यन्ते तासां योगं विधायैकान्ते स्थापयेत्। प्रथमागतफलैक्यप्रमिते पश्चादागतफलैक्यप्रमिते वा वर्षेऽथवा तयो रेखैक्ययोगतुल्य-वर्षे, सुतादीनां सुखस्योद्भवमुत्पत्तिर्भवेदिति शेषः। ज्यौतिषिका ज्योतिर्विदो वदन्ति। तदुक्तं ग्रन्थान्तरे—

'लग्नमारभ्य चन्द्रान्तं चन्द्राल्लग्नावसानकम्।
फलैकीकृत्य तुल्येऽब्दे तनयादिसुखोद्भवः॥' इति

अन्यत्रापि च—

'शुभग्रहाणां संयोगसमानाब्दे शुभं भवेत्।
पुत्रवित्तसुखादीनि लभते नात्र संशयः॥' इति

चन्द्राष्टक वर्ग में लग्न से चन्द्रमा तक जितनी रेखाएं हों, उनके योगफल के बराबर आयु वर्ष में धन व पुत्रादि की प्राप्ति होती है। चन्द्रराशि से लग्नराशि पर्यन्त रेखा योग के समान वर्ष में धनादि का लाभ होता है। अथवा दोनों योगफलों के योग के तुल्य वर्षों में धन व पुत्र का लाभ होता है। ऐसा ज्योतिष शास्त्र के विद्वान् कहते हैं।

उक्त नियम चन्द्र, गुरु, शुक्र व पापयुति रहित शुभ बुध के विषय में भी समझना चाहिए। उन ग्रहों की राशि से लग्न पर्यन्त व लग्न से ग्रहाधिष्ठित राशि पर्यन्त उसी ग्रह के अष्टक वर्ग में जो रेखा योग हो उसके तुल्य आयु वर्षों में पुत्र, धन व सुख की प्राप्ति होती है—

"शुभग्रहाणां संयोगसमानाब्दे शुभं भवेत्।
पुत्रवित्तसुखादीनि लभते नात्र संशयः॥"

अर्थात् शुभग्रह की रेखा संख्या के योग के समान(पूर्वोक्त प्रकार से) वर्ष में शुभ होता है। उन वर्षों में पुत्र, धन व सुख की प्राप्ति निःसन्देह होती है।

**मंगल का भावगत फलः**

**स्वोच्चे स्वर्क्षेऽस्रे ऽङ्गखाङ्काम्बुगेऽष्ट-**
**रेखायुक्ते कोटिवित्तेश आरे।**
**साब्धिस्थाने सिंहकौर्प्याजनक्र-**
**कोदण्डाङ्गे जायते मानवेशः ॥१४८॥**

स्वोच्च इति। अस्रे भौमे, स्वोच्चे निजोच्चराशौ मकर इत्यर्थः। स्वर्क्षे स्वराशौ मेषे वृश्चिके वा तिष्ठति, अंगखांकाम्बुयाते लग्नदशम नवम चतुर्थाना-मन्यतमे याते प्राप्तेऽष्टरेखायुक्तेऽष्टाभी रेखाभिः सहिते सति तदा कोटिवित्तेशः कोटिधनस्वामी भवेदिति शेषः। आर इति। आरे भौमे, सिंहः, कौर्प्यो वृश्चिकोऽजो-मेषो नक्रोमकरः कोदण्डं धनुरेतेषामन्यतमेऽंगे लग्ने, साब्धिस्थाने रेखाचतुष्टययुक्ते सति तदा मानवानां मनुष्याणामीशः स्वामी जायते जात इति शेषः।

यदि अपनी उच्च या स्वराशि में स्थित मंगल आठ रेखाओं से युक्त होकर लग्न, चतुर्थ, नवम या दशम स्थान में स्थित हो तो मनुष्य करोड़पति होता है।

यदि चार रेखाओं से युक्त मंगल मेष, सिंह, वृश्चिक, धनु व मकर राशि में लग्न गत हो तो मनुष्य राजा होता है।

**कलाष्टकाढ्ये कुटिले कुलस्थे**
**लघुक्षमेशः पुरगे धरेशः।**
**राज्ञोऽन्वयोत्थो विषयेट् प्रजात-**
**स्तुङ्गस्वभाढ्ये नृपचक्रवर्ती ॥१४९॥**

कलेति। कुटिले भौमे, कलाष्टकाढ्येऽष्टाभिः कलाभिर्युक्ते, कुलस्थे दशमस्थानगते तदा लघुक्षमेशः स्वल्पभूपतिर्भवेदिति शेषः। यदि भौमेऽष्ट-रेखायुक्ते पुरगे पुरे लग्नं तस्मिन् गते याते तदा धरायाः पृथिव्या ईशः स्वामी। स्यादिति शेषः।

राज्ञ इति। प्रजात उत्पन्नो मनुष्यो राज्ञो नृपस्य विषयेट् विषयो देश स्तस्येट् स्वामी भवेदिति शेषः। यदि तत्र गते भौमे तुंगस्वभावाढ्ये स्वोच्च स्वराशि सहिते, कलाष्टकाढ्ये तदा नृपचक्रवर्ती नृपाणां राज्ञां मध्ये चक्रवर्ती सम्राड् भवे-दिति शेषः।

यदि मंगल आठ रेखाओं से युक्त होकर, दशम स्थान में स्थित हो तो मनुष्य थोड़ी-सी भूमि का स्वामी होता है। यदि मंगल आठ रेखाओं से युक्त लग्न में स्थित हो तो भूमिपति होता है। यदि ऐसा व्यक्ति राजकुल में उत्पन्न हो तो देशाधिप होता है।

अपनी राशि या अपनी उच्च राशि में स्थित मंगल आठ रेखाओं से युक्त हो तथा लग्न या दशम स्थान में हो तो वह मनुष्य राजाओं का राजा अर्थात् चक्रवर्ती सम्राट् होता है।

इस विषय में **जातकादेशकार** ने कुछ विशेष बताया है। उनके मतानुसार मंगल के अष्टक वर्ग में जो राशि सम्पूर्ण रेखाओं से युक्त हो, उसमें जब मंगल का गोचर से संक्रमण होता है तो भूमि, सुवर्ण आदि का लाभ और समृद्धिप्रद कार्य सम्पन्न होते हैं। राजाओं व देवताओं की प्रसन्नता, मांगलिक भूमिकार्य, उस राशि की दिशा में होते हैं। इसके साथ ही पूर्णरेखा युक्त राशि की दिशा में शत्रुओं पर विजय मिलती है। इसके विपरीत कम रेखाओं वाली अथवा रेखा शून्य राशि में गोचर होने पर नेष्ट फल मिलते हैं। (देखें जातकादेशमार्ग, अष्टक० श्लो० २०)

**मंगल की रेखाओं से कष्टप्रद वर्षज्ञान :**

**कल्पात्कुजान्तं प्रथमान्तमारतः**
**स्थानैक्यतुल्येऽनिशमब्दसञ्ज्ञके**
**कष्टं भयं शस्त्रभवं समुद्भवं**
**सप्तार्चिषो वेति जगुः पुरातनाः ॥१५०॥**

कल्पादिति। कल्पाल् लग्नात् कुजान्तं भौमाक्रान्तराशिपर्यन्तं गणयित्वा यावत्फलमर्थाद्यावत्यो रेखा विद्यन्ते, तासां योगंकृत्वा, स्थानान्तरे स्थापयेत्। तत आरतो भौमात्, प्रथमान्तं लग्नराशिपर्यन्तं, गणयित्वा, यावत्फलमर्थाद्यावत्यो रेखा स्तासां योगं पृथक् स्थापयेत्। ततः स्थानैक्यतुल्ये रैखैक्यतुल्येऽब्दसंज्ञके वर्षेऽनिशं नित्यं कष्टं दुःखं, शस्त्रभवं शस्त्रादुत्पन्नं, भयं भीतिः स्यादिति शेषः। वा पक्षान्तरे सप्तार्चिषोऽग्नेः समुद्भवमुत्पन्नंभयंकथितेति शेषः। इत्येवं पुरातनाः प्राचीना जगुराहुः। तदुक्तं पाराशरहोरायाम्—

'भौमान्तं तनुतः कुजात्तनुलयं योगे फलानां तथा।
तत्तुल्ये शरदीह कष्टमनिशं शस्त्रानलोत्थं भयम् ॥' इति

मंगल के अष्टक वर्ग में लग्न से मंगल पर्यन्त जितनी रेखाएं हों, उनके योग के समान आयु वर्ष में कष्ट, शस्त्र व अग्नि से भय होता है। मंगल से लग्न तक की रेखाओं के योग तुल्य वर्षों में कष्ट होता है। अथवा दोनों योगफलों के तुल्य वर्षों में कष्टादि, शस्त्राग्नि भय होता है।

**मंगल के बिन्दु और कष्टप्रद समय :**

**एकीकृत्याक्षाणिभौमात्पुरान्तं**
**सङ्गुण्याश्वैः सप्तयुग्मैर्विभज्य।**
**लब्धं शेषं तन्मिते वत्सरे वा**
**पापे खेटे शेषतुल्योडुयाते ॥१५१॥**
**व्याधेर्मृत्योः साध्वसं हीनभागे**
**वर्षे भावं तं तदानीं त्यजेत्सन्।**
**गोष्ठं क्षेत्रं वा कृषिं पुष्टभस्थं**
**सत्क्षीणर्क्षस्थं धनं नाशमेति ॥१५२॥**

एकीकृत्येति। व्याध्येरिति च। महीजाद् भौमात् पुरान्तं लग्नान्तमक्षाणि बिन्दूनेकीकृत्य संहृत्य ततोऽश्वैः सप्तभिः संगुण्य गुणयित्वा, सप्तयुग्मैः सप्तविंशत्या विभज्यविहृत्य तदायल्लब्धं प्राप्तं शेषमवशिष्टं स्यादिति शेषः। तन्मिते तत्तुल्ये लब्धशेषतुल्य इत्यर्थः। वत्सरे वर्षे। वा पक्षान्तरे। पापेऽशुभे खेटे ग्रहे शेषतुल्योडुयाते शेषसंख्यातुल्यनक्षत्रं प्राप्ते गोचरेणेति शेषः।

तदाव्याधे रोगाद्, मृत्योर्मरणात्साध्वसं भयं वाच्यमिति शेषः। हीनभागे कुण्डल्या भागत्रये यस्मिन् भागे स्वल्परेखा विद्यन्ते, तस्मिन् भागे वर्षे वत्सरे तद्-भागसम्बन्धिनि वर्षे इति भावः। तदानीं तत्कालं तं भावं स्वल्परेखायुतं स्थानं सन् पण्डितः त्येजदुत्सृजेत्। गोष्ठं गोशालां गवां वासस्थानं वा, क्षेत्रं कृषेरुत्पत्ति-स्थानं, कृषिः कर्षकक्रिया, एतत्सर्वं पुष्टभस्थं पुष्टराशौ-अधिकराशौ स्थितं निवेशितं कृतं वा सच्छुभं स्यादिति शेषः। क्षीणर्क्षस्थ क्षीणराशौ-अल्पफलराशौ स्थितं धनं गोष्ठादिकं नाशं क्षयमेति, जातकस्येति शेषः। यथा पाराशरहोरायामपि—

'धरणितनयवर्गे बिन्दुसंजातयोगे तनुलयमिहवर्षे पापगे मृत्युभीतिः।'

भौमाष्टक वर्ग में मंगल से लग्न तक जितने बिन्दु हों उन सबको जोड़ लेना चाहिए। उस योग फल को ७ से गुणाकर २७ से भाग देना चाहिए। इस तरह लब्धि तुल्य व शेष तुल्य वर्षों में रोग तथा मृत्यु-भय होता है। अथवा शेष व लब्धि दोनों के योग तुल्य वर्षों में रोगादि

(vii) जब प्रथम खण्ड सबसे छोटा और शेष खण्ड समान हों तो **वासि योग** होता है।

समुदायाष्टक वर्ग की रेखाओं द्वारा कल्पित इन उपर्युक्त योगों का उल्लेख प्राचीन ज्योतिष ग्रन्थों के निरूपण से मेल नहीं खाता। वहां पर ग्रहों की भाव विशेष व राशि विशेष आदि में स्थिति से ही ये योग बनते हैं, ऐसा बताया गया है। उपर्युक्त, योग हमने अष्टकवर्ग नामक पुस्तक के आधार पर लिखे हैं। इनके फल की प्रामाणिकता तो उतनी विचारणीय नहीं है, किन्तु नामकरण विवादास्पद है। विज्ञ पाठक और विद्वान् स्वयं विचार करें।

**लग्न स्थान की रेखाएं और शुभ वर्ष :**

**यावत्फलं तनुगतं यदि तावदीय-**
**संख्यागतेऽब्द उपयाति नरोऽतिविद्याम् ।**
**जातस्तथा तनुर्जनि वसुधेशयानं**
**स्वं सम्पदो भवतु जन्मनि योगशाली ।।२२।।**

यावदिति। यावत्फलं स्थानं तनुगतं लग्नगतं, तावदीयसंख्यागते तावन्मित संख्यातीतेऽब्दे वर्षे जात उत्पन्नो नरो यदि चेद् जन्मनि जन्मसमये, सम्पद ऐश्वर्यस्य योगशाली भवतु, तदातिविद्यां, तनुर्जनि पुत्रं वसुधेशयानं राजवाहनं, स्वं धनं, उपयाति प्राप्नोति।

यदि किसी व्यक्ति की कुण्डली में अन्य प्रकारों से राजयोग व सम्पत्ति योग बन रहे हों तो उनका फल कब मिलेगा, इस विषय में ध्यान रखना चाहिए कि उसके जन्म लग्न स्थान में जितनी रेखाएं (समुदायाष्टक रेखा) हों, उतने वर्ष की आयु व्यतीत हो जाने पर उसे बहुत-सी विद्या, पुत्र, राजयान तथा धन आदि की प्राप्ति होगी।

**शनि रेखाएं और अशुभ वर्ष :**

**एकीकृत्य स्थानकान्युद्गमर्क्षा-**
**च्छायाजान्तं पर्वतैः संनिहत्य ।**
**संहृत्यर्क्षैराप्यते यत्तद्भगेऽघे**
**कोणे वेताब्दे गदाद्यार्त्तिवड़म् ।।२३।।**

एकीकृत्येति। समुदायाष्टकवर्गे उद्गमर्क्षाल्लग्नराशेः सकाशाच्छायाजान्तं शनिपर्यन्तं, यानि फलानि तानि सर्वाणि एकीकृत्य, लग्नशन्यन्तर्गतानां रेखाणां पिण्डं विधायेत्यर्थः। पर्वतैः सप्तभिः संनिहत्य संगुण्य तत ऋक्षैः सप्तविंशत्या संहृत्य विभज्य, यदाप्यते, तद्भगे तन्नक्षत्रगतेऽथवा कोणे त्रिकोणनक्षत्रगतेऽघे पापग्रहे गोचरवशेनागच्छति तदावा 'तत्तुल्येगतेऽब्दे गदाद्यार्तिवड्रं रोगपीडाविपुलं स्यात्। ब्रह्मयामले यथा—

लग्नात्प्रभृतिमन्दान्तमेकीकृत्य फलानि वै।
सप्तभिर्गुणयेत्पश्चात्सप्तविंशोद्धृतात्फलम् ॥
तत्समानगते पापे दुःखं वा रोगमादिशेत्।
मन्दात्प्रभृतिलग्नान्तमेवमेव प्रकल्पयेत् ॥' इति

समुदायाष्टक वर्ग में लग्न से शनि पर्यन्त जितनी रेखाएं हों, उन सबका योग कर लेना चाहिए। अब योगफल को ७ से गुणाकर गुणनफल को २७ से भाग देना चाहिए। लब्धि संख्या के तुल्य नक्षत्र में अथवा उससे त्रिकोण नक्षत्र में (उस नक्षत्र से दसवां व उन्नीसवीं नक्षत्र) जब पापग्रह अर्थात् सूर्य, मंगल शनि आदि गोचर गति से भ्रमण करें तो उस समय में मनुष्य को रोग, शोक व कष्टादि होते हैं। अथवा लब्धि तुल्य वर्ष में उक्त फल को कहें।

इस विषय में जातकादेशमार्ग की चन्द्रिका व्याख्या में पं. गोपेश कुमार ओझा लिखते हैं कि लग्न से शनि पर्यन्त तथा शनि से लग्न पर्यन्त रेखाओं को ७ से गुणाकर २७ का भाग देने पर जो शेष बचे उस संख्या के तुल्य वर्ष में रोगशोकादि फल कहना चाहिए।

इस विषय में हमारा विचार है कि यह व्याख्या भ्रामक है। देखिए जातकादेश का मूल श्लोक—

लग्नादारभ्य सूर्यात्मजगतभवनाक्षान्तमेकत्र युक्त्वा
७ २७
सुघ्ने तस्मिन् सुखाप्ते गतवति फलतुल्याब्दके रोगशोका···।
(अष्टकवर्ग प्रकरण, श्लोक ४३)

यहां पर स्पष्ट कहा गया है कि फल तुल्य वर्ष में रोग और शोक होते हैं। फल का अर्थ लब्धि है शेष नहीं। जिस संख्या को विभाजित किया जाता है वह भाज्य कहलाती है। जिस संख्या से विभाजित किया

जाता है वह **भाजक** कहलाती है और लब्धि को **भजनफल** कहा जाता है। यदि ४८ ÷ ९ = ५ लब्धि, शेष ३ को देखें तो ४८ भाज्य, ९ भाजक, ५ लब्धि और ३ शेष होगा। लब्धि के पर्याय भजनफल को ही जातकादेश में संक्षेप में फल कहा गया है। लब्धि के पर्यायवाची शब्दों का उल्लेख पं० मुकुन्द दैवज्ञ (प्रस्तुत ग्रन्थकार) ने अपने **ज्योतिषशब्दकोष** में भी किया गया है—

> लब्धिवाचकशब्दाः—लाभः (पु०) प्राप्तिः, लब्धिः·········स्त्रियाम्
> अवाप्तम्, प्रापणम्, फलम्, भजनफलम्, भागफलम्·········क्लीबे।
> (देखें ज्योतिष शब्दकोष, पृ० ९१)

अब इस विषय को अपने पूर्वप्रदत्त उदाहरण के संदर्भ में समझते हैं। मेष लग्न में जन्म है और शनि मीनराशि में है। लग्न से शनि तक की रेखाओं २६+२२+३६+३६+२९+२६+२१+२५+२६+३१+३० का योग=३०८ है। यहां शनि की रेखाएं नहीं ली गई हैं। ३०८ को ७ से गुणा किया तो २१५६ को २७ से भाग दिया। लब्धि ७९ और शेष २३ है। यहां लब्धि २७ से अधिक होने के कारण उसे भी २७ से विभाजित कर शेष २५ का ग्रहण किया। अब अश्विनी से २५वां नक्षत्र पूर्वाभाद्रपद नक्षत्र, इससे दसवां पुनर्वसु नक्षत्र और उन्नीसवां नक्षत्र विशाखा है। इनमें जब पापग्रह आएगा तो रोग शोक होंगे। अथवा लब्धि तुल्य वर्ष ७९वें में उक्त फल होगा। अथवा २५वें वर्ष में उक्त फल होगा। यही पद्धति शनि से लग्न पर्यन्त गणना करके भी अपनायी जाएगी। इसका उल्लेख अगले श्लोक में किया जा रहा है। ग्रन्थकार लब्धि तुल्य वर्ष के पक्षधर हैं। जातकादेश में भी स्पष्ट रूप से लब्धि ही कहा गया है, किन्तु हम पाठकों को बता देना चाहते हैं कि शेष तुल्य वर्ष में भी पीड़ादि फल मानने वाले लोग हैं। यह बात टीका में 'विलग्न शनिमध्यानि' इत्यादि उद्धरण में स्पष्ट है। लेकिन अभी एक शंका और शेष है। लग्न से शनि या शनि से लग्न तक गिनने में शनि व लग्न की राशि की भी रेखाओं का ग्रहण किया जाएगा या नहीं? इस विषय में तीन पक्ष हैं—

(i) शनि व लग्न दोनों की रेखाओं को भी ग्रहण किया जाय। इसके पक्षधर वैद्यनाथ, मन्त्रेश्वर, जातकादेशमार्गकार

श्री पड्डुमनाई आदि के टीकाकारों का है। इनके ग्रन्थों के प्राप्त संस्करणों में पं० गोपेश कुमार ओझा तथा प्रश्नमार्ग के टीकाकार द्वय (हिन्दी व अंग्रेजी) ने दोनों की राशियों का ग्रहण करने का स्पष्ट निर्देश दिया है। अष्टकवर्ग नामक प्राचीन प्रकाशित पुस्तक के लेखक द्वय पटेल व अय्यर महोदय ने स्पष्ट रूप से इसी पक्ष का ग्रहण किया है।

(ii) दूसरा पक्ष शनि व लग्न के मध्यवर्ती भावों की रेखाओं को ही ग्रहण किया जाय, ऐसा टीका में उद्धृत उपर्युक्त उद्धरण में स्पष्ट किया गया है।

(iii) तीसरा पक्ष स्वयं ग्रन्थकार पं० मुकुन्द दैवज्ञ का है। उन्होंने माना है कि शनि से लग्न तक गिनने में लग्न की और लग्न से शनि तक की रेखाओं को गिनने में शनि की रेखाओं का उसमें ग्रहण नहीं किया जाएगा। इसीलिए उन्होंने स्वयं प्रदत्त उदाहरण में ऐसा ही किया है।

हमें मुकुन्द दैवज्ञ का पक्ष अधिक तर्क सम्मत लगता है। इसके कारण निम्नलिखित हैं—

(i) भिन्नाष्टक वर्ग प्रकरण (प्रस्तुत ग्रन्थ) में ग्रन्थकार नेजहां-जहां किसी भाव विशेष से ग्रह विशेष तक रेखाएं गिनकर फलादेश करने के लिए सिद्धान्तों का प्रतिपादन किया है, वहीं-वहीं उन्होंने अन्तिम शब्द का अर्थ 'उपान्त्य' अर्थात् पहले वाला भाव लिया है। जैसे श्लोक १४६, १४६, १६६ तथा अन्य बहुत सेश्लोकों की टीका में प्रदत्त उदाहरण में यही परिपाटी अपनाई है। श्लोक १६६ की टीका में वे स्पष्ट लिखते हैं—

'इह सर्वत्रान्त्यशब्देनोपान्त्यं ग्राह्यम्।'

(ii) अत्र जातकादेश आदि ग्रन्थों के वचनों की सूक्ष्म परीक्षा करें। जातकादेश मार्ग में कहा गया है—

'लग्नादारभ्यसूर्यात्मजगतभवनाक्षान्तम्···।'

इसके टीकाकार ने लग्न सेशनि पर्यन्त का तात्पर्य शनि सहित लिया है। किन्तु इसका अर्थ शनि भवन से पूर्ववर्ती भवन भी

लिया जा सकता है। यही स्थिति अन्य ग्रन्थों के उद्धरणों में भी देखी जा सकती है। सारी निर्भरता 'पर्यन्त' या 'अन्त' शब्द के सही अर्थ पर है।

(iii) पर्यन्त शब्द या अन्त शब्द कहने से साफ प्रकट होता है कि अन्तिम सीमा ग्रहाधिष्ठित राशि ही होगी। किन्तु यहां एक बात ध्यातव्य है कि संस्कृत में जब हम कहेंगे कि समुद्र पर्यन्त उसराजा का राज्य है तो वहां समुद्र के प्रारम्भिक विन्दु तक ही उसके राज्य की अवस्थिति मानी गई है, न कि वहां स्वयं समुद्र को भी उसकी राज्य परिधि के अन्तर्गत रखा गया है। देखिए, कालिदास जब रघुवंश महाकाव्य में रघुवंशी राजाओं को 'आसमुद्रक्षितीश' कहते हैं तो उसका तात्पर्य समुद्र के अतिरिक्त भूमि से ही है।

'परिगतोऽन्तम्। इस विग्रह से पर्यन्त शब्द में प्रादि समास है, जिसका अर्थ अन्त्य सीमा अर्थात् अन्तिम सीमा है। जब शनि पर्यन्त कहेंगे तो अर्थ होना चाहिए कि शनि है, अन्तिम सीमा जिसको ऐसी गणना। अतः शनि सहित व शनि रहित दोनों ही अर्थ शुद्ध हैं। किन्तु **रघुवंश** में पर्यन्त का अर्थ आसपास भी लिया गया है—

'पर्यन्त संचारित चामरस्य कपोललोलोभयकाकपक्षात्...।' (१८, ४३)

अस्तु, इतनी बारीकी से कोई विशेष निर्णायक तथ्य सामने आने वाला नहीं है। अत: ग्रन्थकार के मत को हमने स्वीकार किया है। कारण यह है कि दोनों पक्षों के पक्ष में प्रमाण उपलव्ध है। दूसरी बात यह है कि यह पक्ष नया है तथा विद्वान् पाठक इसकी प्रमाणिकता को परखकर श्रेय पक्ष का स्वयं ग्रहण कर लें। एतदर्थ इसे प्रस्तुत करना आवश्यक है। विद्वान् गुणग्राही पाठक स्वयं नीर क्षीर विवेक में समर्थ हैं।

**कृष्णाद्यङ्गान्तं फलं तद्वदङ्गा-**
**न्तं भूपुत्राल्लग्नतो लोहितान्तम्।**
**सत्खेटे सद्योगसंख्यागतर्क्षे**
**गोचारेणार्या वदन्तीति सौख्यम्॥२४॥**

कृष्णेति। तद्वत् तेनैव प्रकारेण समुदायाष्टवर्गे कृष्णाद्यं गान्तं शनिमारभ्य लग्नपर्यन्तं यत्फलं स्यात्, तत् सप्तभिः संगुण्य, सप्तविंशतिहृतलब्धयाते, कोणगे नक्षत्रे वा सूर्यादिपापे गतवति, महती रोगादिपीडा स्यात्। अथवा समुदायाष्टकवर्गे भूपुत्राद् भौमाद् अंगान्तं लग्नावसानं यत्फलं स्यात्, तत्सप्तभिः संगुण्य सप्तविंशत्या विभज्य लब्धितुल्ये नक्षत्रे वा तत् त्रिकोणनक्षत्रे गते पापे रोगादिपीडा वक्तव्या। एवं लग्नतो लोहितान्तं भौमपर्यन्तमपि तद्वदेव चिन्त्यम्। सद्योगेति। समुदायाष्टवर्गे सद्योगसंख्यागतर्क्षे लग्नात् शुभग्रहपर्यन्तं, यत्फलं तत्सप्तभिः संगुण्य पूर्ववत् सप्तविंशतिहृतलब्ध समे नक्षत्रे वा तत् त्रिकोणनक्षत्रे सत्खेटे शुभग्रहे तदा सौख्यं स्यादिति शेषः।

इसी पूर्वोक्त प्रकार से शनि से लग्न तक जितनी रेखाएं हों उनका योगकर, उसे ७ से गुणा कर २७ से भाग देना चाहिए। तब जो लब्धि हो उसके तुल्य नक्षत्र में अथवा उससे १०वें १९वें नक्षत्र में जब पापग्रह आए तो दुःख और रोग होगा।

इसी प्रकार मंगल से लग्न तक और लग्न से मंगल तक रेखाओं का योग करके कष्टकारक वर्ष का साधन करना चाहिए।

यही पद्धति बुध, गुरु, शुक्र जैसे शुभग्रहों के विषय में अपनायी जाएगी। शुभग्रह से लग्न तक और लग्न से शुभग्रह तक रेखा-योग को ७ से गुणा कर २७ से भाग देने पर प्राप्त लब्धि तुल्य नक्षत्र में या उससे त्रिकोण नक्षत्र अथवा लब्धि-तुल्य आयु वर्ष में धन, पुत्रादि की प्राप्ति होती है। ऐसा आर्यों का कथन है।

शनि मीन राशि में प्रकृत उदाहरण में है तथा लग्न मेष तक (लग्न रहित) २९ रेखाएं हैं। इन्हें ७ से गुणाकर २७ का भाग दिया २९×७=२०३÷२७=लब्धि ७, शेष १४ है। अतः सातवां नक्षत्र पुनर्वसु और इससे त्रिकोण नक्षत्र विशाखा व पूर्वाभाद्रपद में जब पापग्रह आएगा, तब कष्ट होगा। अथवा ७ वर्ष (लब्धि) की आयु में रोग शोकादि होंगे। यहां मंगल भी मीनराशि में स्थित है। अतः शनि वाला फल मंगल पर भी लागू होगा।

अब शुभग्रह के विषय में देखते हैं—यहां लग्न में मेष राशि है तथा बृहस्पति कन्या राशि में स्थित है। अतः लग्न से सिंह तक रेखाएं क्रमशः २६+२२+३६+३६+२९ का योग १४९ है। इसे सात गुना कर २७ से विभाजित किया। १४९×७=१०४३÷२७=३८ लब्धि, शेष २७ है। ३८ को २७ से विभाजित कर शेष ११ का ग्रहण

किया। अत: अश्विनी से ग्यारहवें नक्षत्र पूर्वाफाल्गुनी, इससे त्रिकोण पूर्वाषाढ़ व कृत्तिका नक्षत्रों में जब शुभग्रह आएगा तो शरीर व सन्तान का सुख होगा। अथवा ३८वें वर्ष में उक्त फल होगा। इसी प्रकार गुरु से लग्न पर्यन्त भी जानना चाहिए। इसी पद्धति से अन्य शुभग्रहों का भी फलदायक समय जाना जा सकता है।

**रेखातुल्य आयु योग :**

**आदित्यभूभोदयगे व्ययेशे**
**गतौजसौ कालकलेवरेशौ।**
**फलानि यावन्ति तनुस्थितानि**
**तदुन्मिता: स्युर्मनुजायुरब्दा॥२५॥**

आदित्येत्याख्यानक्याहायुषो वर्षपरिज्ञानमिति। व्ययेशे द्वादशभाव-स्वामिनि आदित्यभूभोदयगे शनिराश्युदयगतेऽर्थान्मकरकुम्भान्यतरराशिलग्ने तदा कालकलेवरेशौ अष्टमलग्न स्वामिनौ गतौजसौ षड्बलै रहितौ यदा तदा यावन्ति यदुन्मितानि फलानि स्थानानि तनुस्थितानि तदुन्मिता स्तावन्तो मनुजस्य आयुषो वर्षाणि स्यु:। उक्त लक्षणयोगेऽङ्गेयावन्ति फलानि तावन्ति वर्षाणि जातको जीवतीति भाव:।

यदि व्यय भाव का स्वामी मकर या कुम्भ राशिमें स्थित होकर लग्न में विद्यमान हो, अष्टमेश तथा लग्नेश दोनों निर्बल हों तब लग्न में जितनी रेखाएं हों मनुष्य की उतने वर्ष की ही आयु होती है।

**राजयोग व समुदायाष्टक रेखा :**

**तोयेशे तनुगे तनूभवनपे पातालगेहोपगे।**
**राश्योस्तत्खगयुक्तयोर्गुणगुणैस्तुल्या: कलाश्चेद्यदा।**
**राजश्रीसहिता भवा नृपतयो भावत्रयेषूदय-**
**प्राप्त्यम्भस्सु फलोपगेषु खगुणाधिकयेषु जातस्तदा॥२६॥**
**तेज:श्रीबहुतां समेति मनुजो राज्यं खवेदप्रमा-**
**ब्दादूर्ध्वं यदि पंचविंशति मुखादेवान्तसंख्या: कला:।**
**भाग्याम्भोगृहगा गजान्तकमिताब्दान्ते परेऽब्दे किमु**
**संयुक्तो नरवाहनेन जनितो मर्त्यो भवेत्सर्वदा॥२७॥**

तोयेश इति। तेज इति च। तोयेशे चतुर्थ स्वामिनि, तनुगे लग्नगते, तनूभवनपे लग्नेशे पातालगेहोपगे चतुर्थगे तत्खयुक्त योः राश्योरर्थाल्लिग्नचतुर्थ योर्गुणगुणैस्तुल्यास्त्रयस्त्रिशन्मिता कला रेखाश्चेद्यदा भवा जाता राजश्रीसहिता राजलक्ष्मीयुक्ता नृपतयो राजानो जायन्त इति शेषः। भावत्रयेष्विति। उदयो लग्नं प्राप्तिरेकादशोम्भचतुर्थस्तेषु भावत्रयेषु खगुणाधिक्येषु त्रिशताधिक्येषु फलोपगेषु रेखोपयातेषु यदा तदा जातः खवेदप्रमाब्दाच्चत्वारिंशदब्दादूर्ध्वं राज्यं तेजोमहः श्रीर्लक्ष्मीस्तयो बहुलतां समेति प्राप्नोति।

यदीति। यदि चेत्पंचविंशतिमुखास्त्रयस्त्रिशदन्ताः कला रेखा भाग्याम्भोगृहगा नवमचतुर्थस्थान यातास्तदा जनित उत्पन्नो मर्त्यो मनुष्यो गजान्तकमिताब्दान्तेऽष्टाविंशति वर्षान्ते किमु अथवापरे परतोऽब्दे सर्वदा नित्यं नरवाहनेनान्दोलिकादिना संयुक्तः सहितो भवेत्।

यदि चतुर्थ भाव का स्वामी लग्न में हो, लग्न का स्वामी चतुर्थ भाव में हो और दोनों भावों में ३३-३३ रेखाएं हों तो मनुष्य श्रीसम्पन्न राजा होता है।

लग्न, लाभस्थान तथा चतुर्थ स्थान में यदि ३० से अधिक रेखाएं हों तो मनुष्य ४० वर्ष की अवस्था के बाद तेजस्वी होकर राज्य और लक्ष्मी को पाता है।

नवम और चतुर्थ में २५ से अधिक ३३ तक रेखाएं हों तो २८वें वर्ष में या आगे मनुष्य वाहन सुख प्राप्त करता है।

**स्वोच्चे गुरौ वाहनराशियाते**
**वियत्सरस्वत्फलमित्युपेते ।**
**कल्पोपयाते तपनेऽजराशौ**
**राजा भवेल्लक्षमिताश्वनाथः ॥२८॥**

स्वोच्च इति। गुरौ स्वोच्चे कर्कटे सति वाहनराशियाते सुखभावयाते, वियत्सरस्वत्फलमित्युपेते चत्वारिंशद्रेखायुक्ते, तपतीति तपनस्तस्मिन् सूयेऽजराशौ कल्पोपयाते लग्नगते भवति चेत्तदा लक्षमिताश्वनाथो स्वामी राजा भवेत्।

यदि बृहस्पति कर्क राशि में चतुर्थ स्थान में स्थित हो तथा वह ४० रेखाओं से युक्त हो तथा मेष राशि का सूर्य लग्न में हो तो मनुष्य राजा होता है तथा वह एक लाख घोड़ों का स्वामी अर्थात् बहुत धनी मानी होता है।

**खाब्धिप्रमस्थानसमेत आद्ये**
**कोदण्ड इज्येऽनिमिषेऽसुरेज्ये ।**
**भौमे स्वतुङ्गे कलशे कृशाङ्गे**
**स्यात्सार्वभौमो निखिलेन्दिराभृत् ॥२६॥**

खाब्धीति। इज्ये गुरौ, कोदण्डे धनुषि, आद्ये लग्ने खाब्धिप्रमस्थान समेते चत्वारिंशद्रेखायुक्तेऽसुरेज्ये शुक्रेऽनिमिषे मीने, भौमे स्वोच्चे मकरे कृशांगे शनौ कलशे कुम्भे गतवति तदा जातः निखिलेन्दिराभृत् सम्पूर्णलक्ष्मीधर सार्वभौमः सम्राड् स्यात् ।

धनु लग्न में जन्म हो, जन्म लग्न में गुरु ४० रेखाओं से युक्त हो, शुक्र व मंगल अपनी उच्च राशियों में हों, शनि कुम्भ राशि में हो तो मनुष्य सारे ऐश्वर्यों से युक्त सार्वभौम चक्रवर्ती सम्राट् होता है।

**भावों की बन्धु आदि संज्ञा :**

**बन्ध्वाख्यं पुरपंचमाङ्कभवनं स्वाभ्रारिभं सेवकं**
**सोत्थास्तायगृहं तु पोषकमथाम्बायुर्व्ययं घातकम् ।**
**रेखैक्यं कुरु सन्नमीष्वधिकता चेत्पोषकस्यार्थवान्**
**हन्तुः पोषकतो भवेदधिकता हन्तुर्नरो निर्धनः ॥३०॥**

बन्ध्वाख्यमिति । पुरपंचमाकं भवनं लग्नपंचमनवगृहं बन्ध्वाख्यं बन्धुसंज्ञकमिति । स्वाभ्रारिभं द्वितीय दशमषष्ठभं सेवकम्, सोत्थास्तायगृहं तृतीय-सप्तमैकादशभवनं पोषकम्। अथाम्बायुर्व्ययं चतुर्थाष्टमद्वादशभवनं घातकम्। सन् विद्वन्, अमीषु उक्तस्थानेषु रेखैक्यं रेखाणां योगं कुरु विधेहि। चेद्यदि हन्तुर्घातकात्पोषकस्याधिकता अर्थाद् रेखाणामैक्यमधिकं तर्हि जातोऽर्थवान् धनी भवेत्, यदिपोषकतो हन्तर्घातकस्याधिकता तदा नरो निर्धनो भवेत् ।

लग्न और त्रिकोण स्थान (५, ९) **बन्धु संज्ञक** होते हैं। द्वितीय, षष्ठ व दशम **सेवक संज्ञक** होते हैं ।

तृतीय, सप्तम व एकादश **पोषक संज्ञक** होते हैं और चतुर्थ, अष्टम और द्वादश **घातक संज्ञक** होते हैं।

इन भावों की रेखाओं का योग कर लेना चाहिए। यदि घातक रेखाओं से पोषक रेखाएं अधिक हों तो व्यक्ति धनी अन्यथा निर्धन होता है।

प्रकृत उदाहरण से विषय को स्पष्ट किया गया है—

लग्न २६, पंचम २६, नवम २६ = ८१ बन्धु संज्ञक भाव रेखा योग।
द्वितीय २२, षष्ठ २६, दशम ३१ = ७९ सेवक संज्ञक भाव रेखा योग।
तृतीय ३६, सप्तम २१, लाभ ३० = ८७ पोषक संज्ञक भाव रेखा योग।
चतुर्थ ३६, अष्टम २५, द्वादश २९ = ९० घातक संज्ञक पोषक रेखा योग।

यहां घातक योग से पोषक योग कम है। अतः यह व्यक्ति जीवन में अल्प धनी होगा। बन्धु रेखा सेवक रेखा से अधिक है, अतः यह व्यक्ति जीवन में लोकप्रिय तथा सेवक नहीं होगा।

**भावों की अन्तर्भागादि संज्ञा :**

**अन्तर्भागोऽयं सुतकेन्द्राङ्कफलैक्यं**
**पुष्टं हृत्तुष्टत्वं ससुकर्म्मज्ञानकविद्यः।**
**ऐक्यं रेखाणामितरेषां यदि पुष्टं**
**डम्भाधिक्यं हृद्व्यथनं बाह्यकभागः॥३१॥**

अन्तर्भाग इति मत्तमयूरेण भावानामन्तर्भागादिसंज्ञामाह। सुतः पंचमः केन्द्राणि लग्न चतुर्थसप्तमदशमानि अंको नवमस्तत्र स्थितानां फलानां रेखैक्यं कुर्यात्। यदि तत् पुष्टमधिकं तर्हि हृत्तुष्टत्वं मनस्तोषः, ससुकर्मज्ञानकविद्यः सत्कर्मज्ञानविद्याभिर्युक्तः स्यादिति शेषः। अयमन्तर्भागो ज्ञेयः।

ऐक्यमिति। इतरेषां केन्द्रत्रिकोणभिन्नस्थानां रेखाणामैक्यं योगं कुर्यादिति। यदि तत्पुष्टमधिकं तदा डम्भाधिक्यमभिमानबाहुल्यं हृदव्यथनं मनः पीडा स्यादिति शेषः। एष बाह्यभागो ज्ञेयः।

केन्द्र स्थान (१, ४, ७, १०) व त्रिकोण स्थान (५, ९) ये अन्तः-करण संज्ञक छह स्थान हैं।

शेष छह स्थान (२, ३, ६, ८, ११, १२) बाह्य संज्ञक है।

इन दोनों भागों की रेखाओं का योग कर लेना चाहिए। यदि अन्तर्भाग की रेखाएं अधिक हों तो मनुष्य के हृदय में सन्तोष, ज्ञान, विद्या तथा धैर्य की अधिकता होती है।

यदि बहिर्भाग की रेखाएं अधिक हों तो व्यक्ति अभिमानी, दुःखी, ईर्ष्यालु तथा दिखावे वाला होता है।

**धन लाभ की दिशा का ज्ञान :**

**क्रमेण मेषादिकभत्रयेताः**
**काष्ठाश्चतस्रो हरिदिङ्मुखाः स्युः।**
**पुष्टं फलं यासु हरित्सु तासु**
**जातो लभेत द्रविणादिवृद्धिम् ।।३२।।**

क्रमेणेति। मेषः प्रसिद्धस्तदादिराशित्रयमुपगताः क्रमेण परिपाट्या हरिरिन्द्रमुखाः पूर्वाद्याः काष्ठाः दिशः स्युः। चतस्रः दिशः स्युः क्रमेणेत्युक्तं भवति। मेषवृषमिथुनाः पूर्वे, कर्कसिंहकन्याः दक्षिणे, तुलावृश्चिकधनूंषि पश्चिमायां, मकरकुम्भमीनाः उत्तरस्यामवगम्याः प्रयोजनमुच्यते। पुष्टमिति। यासु हरित्सु दिक्षु पुष्टमधिकं फलं भवति तासु द्रविणादिवृद्धिं लभेत् जातः। तस्यामेव दिक्षु गृहादीनां देवस्थानानां च निर्माणं सौख्यकरं भवति।

मेषादि तीन-तीन राशियों का क्रमशः पूर्वादि दिशाओं में वास समझना चाहिए। मेष, वृष, मिथुन पूर्व दिशा में; कर्क, सिंह, कन्या दक्षिण दिशा में; तुला, वृश्चिक, धनु पश्चिम दिशा में; मकर, कुम्भ, मीन उत्तर दिशा में माननी चाहिएं।

इन राशियों का दिशा विभाग के अनुसार रेखा-योग करना चाहिए। जिस दिशा का रेखा-योग अधिक हो, उस दिशा में व्यक्ति को धनागम व सुखादि फल होते हैं।

**मतान्तर से दिशाओं का विभाग :**

**किं वा पूर्वा प्राक्कुजान्त्याप्तिभेषु**
**व्योमाङ्कायुर्भेषु कालस्य काष्ठा।**
**चेतोभूरुग्दारकेषु प्रतीची**
**स्यात्कौबेरी सौख्यशौर्य्यार्थभेषु ।।३३।।**

किं वेति। किं वा प्राक्कुजं लग्नमन्त्यो व्ययः आप्तिभं लाभः, तेषु पूर्वादिक् व्योमदशमः, अंको नवमः आयुरष्टमस्तेषु कालस्य यमस्य काष्ठा दिक्। चेतो भूः कामः सप्तम इति यावत्, रुग् रोगः, षष्ठस्थानमिति। दारकः पुत्रः पंचम इति, तेषु पश्चिमा दिक्। सौख्यं चतुर्थः, शौर्य्यं तृतीयः, अर्थभं द्वितीयस्तेषु कौबेरी दिगुदीची स्यात्। तथा च ग्रन्थान्तरे—

'व्ययाङ्गैकादशे पूर्वा खनवाष्टसु दक्षिणा।
पश्चिमाद्रिरसाक्षेषु द्विचतुस्त्रिषु चोत्तरा ॥' इति

लग्न, द्वादश और एकादश स्थान में पूर्व दिशा; दशम, नवम व अष्टम में दक्षिण दिशा; सप्तम, षष्ठ और पंचम में पश्चिम दिशा; चतुर्थ, तृतीय और द्वितीय में उत्तर दिशा माननी चाहिए।

प्रत्येक दिशा की रेखाओं का योग कर फल जानना चाहिए।

**रेखायुतिश्चेद्युगबाणतुल्यतो**
**व्योमस्वरान्तोनफलाहरित्स्मृता ।**
**सा मध्यमा याऽभ्रखगोन्मितान्तिमा**
**संख्या च यस्याहरितोऽभ्रगोऽधिका ॥३४॥**

**सा शोभनाऽथो शुभदाः स्वभोच्चगा**
**मूलत्रिकोणोपगता किमूदिताः ।**
**येऽनन्तपान्थाः किल कार्यसिद्धिदा-**
**स्तेषां दिशः स्युर्विबुधैरितीरितम् ॥३५॥**

रेखेति। सेति च। चेद्यदि यस्यां दिशि रेखायुतिः फलानां युतिर्युगबाणतुल्यश्चतुः पंचाशतो व्योमस्वरान्ता सप्तत्यन्ता भवति सा हरित् दिशा, ऊनफला स्वल्पफला स्मृता। या अभ्रखगोन्मितान्तिमा नवत्यन्ता सा मध्यमा समानफला ज्ञेया। यस्या हरितो दिशोऽभ्रग्रोऽधिका नवत्यधिका संख्या सा शोभना शस्ता ज्ञेया।

अथो इति। आनन्तर्ये। ये शुभदाः सौम्या, अनन्तपान्था ग्रहाः, स्वभोच्चगाः स्वगृहे स्वोच्चे संस्थिता मूलत्रिकोणोपगता किमु उदिता उदयं प्राप्ताः, तेषां ग्रहाणां दिशः किल निश्चयेन कार्यस्याभीष्टस्य सिद्धिप्रदाः स्युः। इत्येवं विबुधैरीरितं कथितम्। तथा च ग्रन्थान्तरे—

चतुःपंचाशदादेश्च सप्तत्यन्तयुतिस्त्रये।
हीनफलदिशा ज्ञेया नवत्यन्ता च मध्यमा ॥
नवतेरधिका यस्याः संख्या परमशोभना।
सौम्याः स्वोच्चे त्रिकोणे चेत्तदाशा कार्यसिद्धिदा ॥' इति

जिस दिशा में ५४ से ७० तक रेखाएं हों वह हीन फल वाली होती है। ७० से ९० तक रेखाओं का योग होने पर मध्यम फल वाली और ९० से अधिक रेखाओं वाली दिशा उत्तम फल वाली होती है।

जिस दिशा में उदित, स्वराशिगत, उच्चगत या मूलत्रिकोणगत ग्रह हों, उस दिशा में कार्य की सिद्धि होती है।

**धनदायिनी व मरण दिशा का विवेक :**

**काष्ठाविभागे द्रविणाधिपस्य**
**जन्मी प्रजातो द्रविणं लभेत।**
**कालालयाधीशककुब्विभागे**
**कलेवरः कालगृहं समेति ॥३६॥**

काष्ठेति। द्रविणाधिपस्य द्वितीयभावस्वामिनः, काष्ठाविभागे प्रजात उत्पन्नो जन्मी शरीरी मनुष्य इति यावत्। द्रविणं धनं लभेत प्राप्नोति। कलालयोऽष्टमस्तस्याधीशः स्वामी तस्य ककुब् दिक् तस्या विभागः प्रदेशस्तस्मिन् कलेवरः शरीरं कालगृहं यमगृहं समेति प्राप्नोति। यथा च ग्रन्थान्तरे—

'वित्तेश्वरस्य दिग्भागे वित्तमाप्नोति मानवः।
रन्ध्रेश्वरस्य दिग्भागे देहस्तत्र विनश्यति॥' इति

अन्यत्रापि—

'वित्तेशाशासु वित्तं मृतिपतिगतदिग्भागगे देहनाशः।' इति

जिस दिशा में कुण्डली में धनेश स्थित हो, उसी दिशा में मनुष्य को धन प्राप्ति होती है।

अष्टमेश जिस दिशा में स्थित हो, उस दिशा में व्यक्ति का मरण समझना चाहिए।

इति श्रीमत्पण्डितमुकुन्ददैवज्ञविरचितेऽष्टकवर्गमहानिबन्धे पं० सुरेशमिश्रकृतायां 'मञ्जुलाक्षरायां' हिन्दीव्याख्यायां समुदायाष्टकवर्गाध्यायस्तृतीयोऽवसितः॥

# ४

# गोचराष्टकवर्गाध्याय

**चक्र निर्माण का प्रकार :**

**प्राचीःकला नन्दमिता विलिख्य**
**तिर्यक्कलाः पावकचन्द्रतुल्याः ।**
**भवन्ति कोष्ठान्यरिगोमितानि**
**भिन्नाष्टकचक्रमिदं निरुक्तम् ॥१॥**

प्राचीरिति । नन्दमिता नवतुल्याः कलाः रेखाः प्राचीः पूर्वा विलिख्य तथा पावक चन्द्रा तुल्यास्त्रयोदशोन्मितास्तिर्यक्कलास्तिरश्चीनाः रेखा विलिख्य, एवमरिगोमितानि षण्णवति तुल्यानि कोष्ठानि भवन्ति जायन्ते । इदं भिन्नाष्टकं चक्रं निरुक्तं कथितं बुधैरिति शेषः । तथा च ब्रह्मयामले—

'नवरेखा लिखेत्प्राचीस्तिर्यग्रेखास्त्रयोदश ।
षण्णवत्येव कोष्ठानि चक्रं भिन्नाष्टकं पुनः ॥' इति

नव्यास्तु भचक्रे त्वष्टवर्गार्थं सलग्नखचरान् न्यसेदित्यूचुः । अत्रप्रकारे स्वरूपमात्रभेदः फलाविशेषात्तुल्यतै वेति ।

नौ रेखाएं पड़ी और तेरह रेखाएं खड़ी खींच कर गोचराष्टक-वर्ग के लिए इस प्रकार छियानवे कोष्ठकों का चक्र बना लेना चाहिए। यह चक्र भिन्नाष्टक चक्र के समान ही होता है।

आशय यह है कि बारह राशियां और आठ सूर्यादि लग्न समेत ग्रहों को स्थापित करना है। यह श्लोक केवल शास्त्र-स्थिति सम्पादन की इच्छा से लिखा गया है। राशि, ग्रह, सूर्यादि अष्टक, रेखायोग व बिन्दुयोग इस प्रकार १२ चीजें बायीं ओर खड़ी रेखाओं में लिखी जाएंगी। इनके सामने पड़ी रेखाएं खींचें। बारह राशियों के तुल्य खानें बनाने चाहिएं। कुछ लोग बिन्दु योग तथा ग्रहों की स्थिति नहीं लिखते।

अत: तदनुसार यथेच्छ रेखा कोष्टकों को कम किया जाएगा। आगे यथावसर चक्र निर्माण करके दिखाया जा रहा है, अत: वहां से समझ लें। सारावली, वशिष्ठ संहिता, जातकादेशमार्ग आदि ग्रन्थों में श्लोकोक्त प्रकार से ही चक्र निर्माण का निर्देश दिया गया है। हमने आधुनिक पद्धति से चक्र निर्माण का प्रकार बताया है। यह नवीन पद्धति समझने की दृष्टि से अधिक उपयोगी सिद्ध होती है।

**ग्रहों की स्थापना का क्रम :**

**मूर्त्तीन्दुसौम्यास्फुजिदर्कवक्र—**
**वागीशतेजोनिधिजाः क्रमेण।**
**पंक्त्यष्टकस्यान्तकदिङ्मुखस्य**
**भेशाश्च तत्स्थानफलप्रदा स्युः॥२॥**

मूर्त्तीति। मूर्त्तिर्लग्नं, इन्दुश्चन्द्रः, सौम्योबुधः आस्फुजिच्छुक्रोऽर्कः सूर्यः वक्रोभौमः, वागीशोगुरुः, तेजोनिधिजः शनिः एते क्रमेण अन्तकदिङ्मुखस्य दक्षिणादेः पंक्त्यष्टकस्य भेशा राशिस्वामिनः स्युः। एते तत्स्थानफलप्रदास्तासां रेखाणां फलदायका भवन्तीति शेषः।

लग्न, चन्द्रमा, बुध, शुक्र, सूर्य, मंगल, गुरु और शनि ये क्रम से दक्षिणादि दिशाओं के कोष्ठकों में स्थापित किए जाने चाहिएं। इस प्रकार से रेखाओं के फल देने वाले ग्रहों का क्रम बताया गया है।

पीछे भिन्नाष्टक वर्ग के प्रकरण में हमने ग्रहों को कक्ष्याक्रम से स्थापित करने का विकल्प समझाया था। यहां गोचर या अष्टक वर्ग में नियमत: कक्ष्या क्रम से ही ग्रहों की स्थापना की जाती है। ऊपर श्लोक में जो क्रम बताया गया है वह नीचे से ऊपर की ओर लिखा जाता है। इसी क्रम से आकाश में ग्रहों की कक्ष्या स्थित है। यदि ऊपर से नीचे लिखेंगे तो पहले सबसे ऊपर शनि, तब गुरु, मंगल, सूर्य, शुक्र, बुध, चन्द्र, लग्न इस क्रम से ग्रह लिखे जाएंगे। बात दोनों तरह से समान है। आकाश में सबसे ऊपर शनि है। तत्पश्चात् गुरु की कक्ष्या है। पश्चात् मंगल, सूर्य, शुक्र, बुध व चन्द्र की कक्ष्याएं हैं। इसी कारण इस स्थापना के प्रकार को कक्ष्याक्रम स्थापना प्रकार कहते हैं। यही स्थापना क्रम बहुमत सिद्ध है। ग्रन्थकार ने भी यही क्रम अपनाया है।

**भास्करारुणतनूजमंत्रिणो**
**भार्गवक्षितितनूजबोधनान्**
**शीतलांशुमुदयं क्रमात्खगान्**
**गोचराष्टकगणे निवेशयेत् ॥३॥**

भास्करेति। भास्करः सूर्यः, अरुणतनूजः शनिः, मंत्री गुरुस्तान् भार्गवः, शुक्रः। क्षितितनूजो भौमः, बोधनो बुधस्तान्, शीतलांशुं चन्द्रं, उदयं लग्नं, एतान् खगान् ग्रहान् क्रमात् परिपाट्या, गोचराष्टकगणे गोचराष्टकवर्गे निवेशयेत्। बुध इति शेषः। तथा च ब्रह्मयामले—

'रविमन्दगुरूणां च शुक्रभौमविदां तथा।
शीतांशुलग्नयोश्चैव गोचराष्टकवर्गकम्॥' इति

सूर्य, शनि, बृहस्पति, शुक्र, मंगल, बुध, चन्द्र व लग्न इस क्रम से भी गोचराष्टक में ग्रहों की स्थापना बताई गई है।

यह स्थापना क्रम का विकल्प है। ब्रह्मयामल व किसी अन्य ग्रन्थ के हवाले से ग्रन्थकार ने इसे प्रमाणित किया है। परन्तु बहुमत इसे नहीं मानता।

**गोचर फल ज्ञान का प्रकार :**

**मन्दो राशिगजांशपूर्वभाग—**
**कालाख्ये द्वितयेऽर्चितः फलाय।**
**कक्षायाः क्रमतोऽन्त्यभागकाले**
**सम्प्रोक्तं फलदं विलग्नमार्य्यैः॥४॥**

मन्द इति। फलाय फलप्राप्त्यै राशेर्भस्य गजांशोऽष्टमांशस्तत्तुल्य एव पूर्वभागकालस्तस्मिन् मन्दः शनिः स्यादिति शेषः। द्वितीये राश्यष्टमांशद्वितीय-भागकालेऽर्चितो गुरुः स्यात्। एवं कक्षायाः क्रमतो राशेरष्टमांशस्यान्त्यभागकाले-ऽवसानांशकाले विलग्नं लग्नं फलदं फलदायकमार्यैः सज्जनैः सम्प्रोक्तं सम्यक् प्रकारेण कथितम्। ग्रन्थान्तरे तु कक्ष्याक्रमः स्पष्ट उक्तः—

'मन्दामरेज्यभूपुत्रसूर्य शुक्रेन्दुजेन्दवः।
लग्नं कक्षा क्रमो ज्ञेयः॥' इति

कोई ग्रह किसी राशि विशेष में कब-कब अपना शुभ या अशुभ फल दिखलाएगा? इसके लिए प्रत्येक राशि को आठ बराबर भागों में

बांट लिया जाता है। एक राशि के ३० अंशों को आठ से भाग देने पर आठवां हिस्सा ३ अंश ४५ कला के बराबर होता है। इन अष्टमांशों में कक्ष्या क्रम से ही ग्रहों को आधिपत्य दिया गया है तथा वे तदनुसार ही फल देते हैं।

माना किसी व्यक्ति को शनि योगकारक उत्तम फलदायक है। अब शनि जब-जब अधिक रेखायुक्त राशि में गोचर करेगा तो उसे अच्छा फल मिलेगा, यह एक सामान्य नियम है। इस नियम का प्रतिपादन पीछे अनेक स्थलों पर किया जा चुका है। अब शनि एक राशि में २ वर्ष ६ मास तक रहेगा। तो क्या पूरे समय में व्यक्ति को शुभ या अशुभ फल मिलता रहेगा या किसी विशेष भाग में ? इसका निर्भ्रान्त उत्तर हमें गोचराष्टक वर्ग से मिलेगा। आचार्यों ने राशि को आठ बराबर भागों में बांटा है। उन आठों भागों का प्रतिनिधित्व कक्ष्याक्रम से आठों वर्गाधिपति करते हैं।

० से ३ अंश ४५ कला तक—शनि का प्रतिनिधित्व
३°.४५′ से ७°.३०′ तक—गुरु का प्रतिनिधित्व
७°.३०′ से ११°.१५′ तक—मंगल का प्रतिनिधित्व
११°.१५′ से १५° तक—सूर्य का प्रतिनिधित्व
१५° से १८°.४५′ तक—शुक्र का प्रतिनिधित्व
१८°.४५′ से २२°.३०′ तक—बुध का प्रतिनिधित्व
२२°.३०′ से २६.१५ तक—चन्द्र का प्रतिनिधित्व
२६°.१५′ से ३०° तक—लग्न का प्रतिनिधित्व

अब देखना है कि अपने भिन्नाष्टक वर्ग में किस राशि में शनि को किस ग्रह ने रेखाएं दीं थीं। कल्पना कीजिए शनि, मंगल व बुध ने उस राशि में शनि को बिन्दु दिए थे। तो सीधा सा अर्थ यह हुआ कि उस राशि में गोचर करते समय शनि जब-जब शनि मंगल व बुध के अंशों (०—३°.४५′, ७°.३०′ से ११°.१५′ और १८°.४५ से २२°.३०′) में आयेगा तो अपना फल दिखाएगा। शेष समय उसका फल नहीं मिलेगा। इस प्रकार गोचर की पद्धति को अधिक विश्वसनीय और प्रामाणिक बनाने के लिए गोचराष्टक वर्ग का सहारा लिया जाता है। यहां यह ध्यान रखना आवश्यक है कि रेखायुक्त ग्रह भी यदि नीच. शत्रु राशि

में या सूर्य के साथ (अस्त) होता है तो अपना फल देने में असमर्थ ही होगा।

अब इस सारे विषय को हृदयंगम करने के लिए अपने पूर्वोक्त उदाहरण को लेते हैं। भिन्नाष्टक वर्ग में जो ग्रह जहां-जहां रेखाप्रद है वहीं इस प्रसंग में भी रेखाप्रद होगा। अतः पीछे भिन्नाष्टक वर्ग प्रकरण में दिया गया रवि का अष्टक वर्ग चक्र यहां भी काम आएगा। उस चक्र को पीछे देखिए तथा समझिए कि शनि मीन राशि में स्थित है। उस राशि में उसे रेखा देने वाले ग्रह शनि, मंगल, सूर्य, शुक्र, बुध चन्द्र और लग्न हैं। केवल बृहस्पति ने रेखा नहीं दी। अतः कहेंगे कि जब शनि मीन में होगा तो बृहस्पति के भाग (३°.४५′ से ७°.३०′ तक) को छोड़कर शेष सारे गोचर काल में अपना फल दिखाएगा।

इसी पद्धति से जब शीघ्रगामी ग्रहों का फल देने वाला समय निकालेंगे तो काल की सूक्ष्मता बढ़ती जाएगी। जैसे चन्द्रमा मकर में ४ रेखा वाला है। अतः जब-जब अपने रेखादायक ग्रहों की कक्ष्या से गुजरेगा शुभाशुभ फल देगा। इस प्रकार घण्टे मिनटों तक की सूक्ष्म अवधितक फल प्राप्ति का काल बताया जा सकता है।

**ग्रहों का राशि भोगकाल :**

**सूर्य्यादिद्युसदां वियद्गुणमिताः सांघ्रिद्वयं सायक-**
**वेदा भूयमला वियत्खगगुणाः सप्ताक्षितुल्याः क्रमात्।**
**आकाशाम्बरखेचरा अथवियद्वेदांशुगा वासराः**
**प्राचीनैर्गणकोत्तमैर्निगदिता एकर्क्षभोगा इमे ॥५॥**

सूर्येति। वियद्गुणमितास्त्रिंशत्तुल्या ३० दिवसाः, सांघ्रिद्वयं सपादद्वयं २$\frac{1}{4}$ दिनं, सायकवेदाः पंचचत्वारिंशत्तुल्या ४५ दिवसाः, भूयमला एकविंशति-तुल्या २१ दिवसाः, वियत्खगगुणा नवत्युत्तर शतत्रयतुल्या ३९० दिवसाः, सप्ताक्षितुल्याः सप्तविंशतितुल्याः २७ दिवसाः, आकाशाम्बरखेचरा नवशततुल्या ९०० दिवसाः वियद्वेदांशुगाश्चत्वारिंशदुत्तरपंचशततुल्या ५४० दिवसाः सन्ति। इमे क्रमात् परिपाट्या सूर्यादिद्युसदां सूर्यादिग्रहाणामेकर्क्षभोगाः वासराः दिवसाः प्राचीनैः गणकोत्तमैर्निगदिताः। तथा च करणप्रकाशे—

'सौरिः सुन्दरि ! सार्धमब्दयुगलं वर्षं समासं गुरुः;
राहुर्मासदशाष्टकं तु कथितं मासं सपक्षं कुजः।
सूर्यः शुक्रबुधौ त्रयोऽपि कथिता मासैकतुल्या ग्रहा-
श्चन्द्रः पादयुतं दिनद्वयमिति प्रोक्तेतिराशिस्थितिः॥' इति

**भादिगौ भगकुजौ भपेनजा—**
**वन्त्यगौ निगदितौ फलप्रदौ।**
**मध्यगौ धिषणदानवार्च्चितौ**
**सर्वदेह फलदः प्रहर्षुलः ॥६॥**

भादिगाविति। भगः सूर्यः, कुजो भौमस्तौ भादिगौ राश्यादिगौ, भपश्चन्द्रः, इनजः शनिस्तौ अन्त्यगौ राश्यन्तगौ, धिषणो गुरुः दानवार्चितः शुक्रस्तौ मध्यगौ राशिमध्यभागगतौ फलप्रदौ फलदायकौ भवत इति शेषः। इहास्मिन् गोचरफले प्रहर्षुलो बुधः सर्वदा आदिमध्यान्त्ये फलदः फलदायको भवतीति शेषः।

सूर्य किसी भी राशि को ३० दिनों में पूरा करता है। चन्द्रमा २ दिन १५ घड़ी (६ घण्टे), मंगल ४५ दिन, बुध २१ दिन, बृहस्पति ३६० दिन, शुक्र २७ दिन, शनि ९०० दिन व राहु केतु ५४० दिन एक राशि में भ्रमण करते हैं। ऐसा प्राचीन गणितज्ञों ने बताया है।

सूर्य और मंगल राशि के प्रवेश काल अर्थात् १०° अंशों तक, चन्द्र व शनि राशि के अन्तिम भाग २०° से ३०° तक, गुरु व शुक्र मध्य भाग में तथा बुध सदा ०°—३०° तक अपना गोचर जनित फल देता है।

**गन्तव्य राशि का फल :**

**आदित्यवित्कुजासिताः क्रमतः समीर-**
**सप्तेभ सप्तदिवसान् शशभृत् त्रिनाडीः।**
**मासान् द्विषड्गुणमितान् गुरुपंगुपाता**
**गन्तव्यभस्य पुरतः फलदा भवन्ति ॥७॥**

आदित्येति। आदित्यः सूर्यः, विद्बुधः, कुजोभौमः, सितः शुक्रः, ते क्रमतः परिपाटीतः समीराः वायवः पंच, सप्त प्रसिद्धाः इभा अष्टौ, सप्त दिवसा वासरास्तान् गन्तव्यभस्य गन्तव्यराशेः पुरतः पूर्वं फलदाः फलदायकाः भवन्ति। यथा सूर्यो गन्तव्यराशेः प्राक् पंचदिनानि फलदः, बुधः सप्तदिवसान्, कुजोऽष्ट-दिवसान्, शुक्रः सप्तदिवसान् फलदः स्यात्। शशभृच्चन्द्रस्त्रिनाडी त्रिघटिकाः। द्विषड्गुणमितान् द्विषट्त्रितुल्यान् मासान् क्रमेण गुरुः पंगुः शनिः, पातो राहुस्ते क्रमेण गन्तव्यभस्य गन्तव्यराशेः पुरतः प्राक् फलदाः भवन्ति। ज्योतिः प्रकाशेतु किंचिद्भिन्नमुक्तम्—

'रविर्दिनं पंच कुजास्तथाष्टौ बुधोद्वयं त्रीणि दिनानि शुक्रः ।
मासं गुरुर्मासचतुष्कमैनिर्गन्तव्यराशौ फलदा भवन्ति ।।' इति

जो ग्रह जिस राशि में स्थित हो उसे अधिष्ठित या आश्रित राशि तथा जिस राशि में ग्रह जाने वाला हो उसे गन्तव्य राशि कहते हैं। अपनी आगामी राशि का फल सूर्य ५ दिन पूर्व, चन्द्रमा ३ घड़ी पूर्व, मंगल ८ दिन पूर्व, बुध ७ दिन पूर्व, शुक्र ७ दिन पूर्व, गुरु २ मास पूर्व, शनि ६ मास पूर्व और राहु ३ मास पूर्व ही देना प्रारम्भ कर देते हैं।

इस विषय में **ज्योति सागर** और **ज्योतिः प्रकाश** में कुछ अलग ढंग से इस विषय को बताया गया है—

ज्योति प्रकाश के अनुसार सूर्य ५ दिन, मंगल ८ दिन, शुक्र ३ दिन, गुरु १ मास तथा शनि ४ मास पहले फल देता है।

ज्योतिः सागर के अनुसार चन्द्रमा ३ घड़ी, गुरु १५ दिन, शनि ४ दिन, राहु ६ मास व केतु ३ मास पूर्व फल देते हैं। शेष ग्रहों का काल ज्योति प्रकाश के समान ही माना है।

**ग्रहों का एक कोष्ठ-भोग का काल :**

**प्रत्येककोष्ठं भगभोगकालो**
**घस्त्रत्रयं सायकवेदतुल्याः ।**
**नाड्यो निरुक्तो विबुधैः प्रवीणै—**
**र्वक्ष्याम्यथो ग्लौमुखभोगकालम् ।।८।।**

प्रत्येककोष्ठमिति । घस्त्रत्रयं त्रीणि दिनानि सायकवेदतुल्याः पंचचत्वारिंशन्मितानाड्यो घट्यः प्रवीणैश्चतुरैः विबुधैः पण्डितैः प्रत्येक कोष्ठं, भगस्य सूर्यस्य भोगकाल एककोष्ठस्थितिसमयः निरुक्तः । अथो आनन्तर्ये । ग्लौमुखभोगकालं चन्द्रादीनामेककोष्ठस्थितिसमयं वक्ष्यामि ।

अष्टक वर्ग के प्रत्येक कोष्ठक में सूर्य ३ दिन ४५ घड़ी तक रहता है। यहां पूर्वोक्त कक्ष्याकाल (अंशात्मक) को मास दिनात्मक बनाकर सुविधार्थ बताया जा रहा है। अब आगे शेष चन्द्रादि ग्रहों का कोष्ठ भोग काल कहता हूं।

**शशिनस्तपनोन्मिताश्च घट्यः**
**खचराम्भोधिमिता विनाडिकाः स्युः ।**

घटिका जलदैर्मिताश्च यद्वा
क्षितिसूनोर्दिनपंचकं तथा च ॥९॥
त्रिमिता घटिकाः पलानि गोऽग्नि-
प्रमितानीह किमक्षवासराख्याः।
तुरगज्वलनोन्मिताश्च घट्यो-
ऽथ दिनान्यग्निताति चात्र घट्यः ॥१०॥
जलदप्रमिता विदो ऽर्कवद्वा-
ऽङ्गिरसः शीतकरोन्मितश्च मासः।
दिवसा धृतिसम्मिताश्च नाड्यो
युगनाराचमिता उताथ मासः ॥११॥
कुमितोऽष्टधरोन्मितान्यहानि
पवनाम्भोधिमिता भवन्ति घट्यः।
भृगुजस्य दिनत्रयं समीर-
मितघट्यः कुमरुत्पलानि किं वा ॥१२॥
रविवद्रविजस्य माससञ्ज्ञा
गुणतुल्या दिवसा द्वियुग्मतुल्याः।
घटिका द्वियमोन्मिता उताहो
गुणमासा यमदोर्मितान्यहानि ॥१३॥

शशिन इति। त्रिमिता इति। जलदेति। कुमित इति। रविवदिति च। तपनोन्मिता द्वादशतुल्या घट्यो नाड्यः, खचराम्भोधिमिता एकोनपंचाशत्तुल्या विनाडिकाः पलानि यद्वा जलदैर्मिताः सप्तदशभिस्तुल्या घटिकाः शशिनश्चन्द्रस्याष्ट-वर्गस्य प्रत्येककोष्ठं एते घट्याद्याः स्युः। अर्थाच्चन्द्रस्य भोगस्य स्थित्याः प्रत्येककोष्ठं ते घट्याद्या भवन्तीत्यर्थः। दिनपंचकं पंचदिनानि, तथा त्रिमितास्त्रितुल्याघटिकाः, गोऽग्निमितान्येकोनचत्वारिंशत्तुल्यानि पलानि, किमथवाक्षवासराख्याः पंचदिनानि, तुरगज्वलनोन्मिताः सप्तत्रिंशत्तुल्याः घट्यो नाड्यः क्षितिसूनोः भोगस्य स्थित्याः प्रत्येककोष्ठं ते दिनाद्याः स्युः। अग्निमितानि त्रितुल्यानि दिनानि, जलदप्रमिताः सप्तदशतुल्या घट्यो नाड्यः, वा रविवत् दिनत्रयं पंचचत्वारिंशत्तुल्या घट्यः एते दिनाद्याः प्रत्येककोष्ठं विदो बुधस्य भोगस्य ज्ञेयाः। शीतकरोन्मित एकतुल्योमासः, धृतिसम्मिता अष्टादशतुल्या दिवसाः, युगनाराचमिताश्चतुःपंचाशत्तुल्याः नाड्यः, एतेमासाद्याः प्रत्येककोष्ठं, अंगिरसो गुरोर्भोगस्य ज्ञेयाः।

दिनत्रयं, समीरितघट्यः, पंचतुल्यनाड्यः, कुमरुत्पलानि एकपंचशत्तुल्यानि पलानि, किमथवा, रविवत् भोगकालो ज्ञेयः। भृगुजस्य शुक्रस्य भोगस्य प्रत्येककोष्ठं ते दिनाद्या भवन्ति। गुणतुल्यास्त्रितुल्या माससंज्ञाः मासाः, द्वियुग्मतुल्या द्वाविंशतितुल्या दिवसा वासराः, द्वियमोन्मिता द्वाविंशतिमिता घटिका नाडिकाः, उताहो गुणमासास्त्रयो मासाः, यमद्वेर्मितानि द्वाविंशतितुल्यानि, अहानि दिनानि रविजस्य शनेर्भोगस्य स्थित्याः प्रत्येककोष्ठं ते मासाद्या भवन्ति। सर्वेख्यादयो ग्रहा गोचरावसरे निजनिजपूर्वोक्त मासदिनघटीपलात्मकभोगकालपर्यन्तमेकस्मिन्कोष्ठे तिष्ठन्ति। तद्द्विगुणकालपर्यंन्तं द्वितीयकोष्ठे तिष्ठन्ति। एवं तृतीयादिषु कोष्ठेषु ग्रहस्थितिकालो वोध्य इति।

चन्द्रमा १२ घड़ी ४६ पल अथवा १७ घड़ी तक एक कोष्ठक को भोगता है। मंगल ५ दिन ३ घड़ी ३६ पल या ५ दिन ३७ घड़ी तक भोगता है।

बुध ३ दिन १७ घड़ी अथवा ३ दिन ४५ घड़ी तक एक कोष्ठक को भोगता है।

बृहस्पति १ मास १८ दिन ५४ घड़ी अथवा १ मास १८ दिन ४५ घड़ी अथवा ५६ दिन तक भोगता है।

शुक्र ३ दिन ५ घड़ी ५१ पल अथवा ३ दिन ४५ घड़ी तक भोगता है।

शनि ३ मास २२ दिन २२ घड़ी अथवा ३ मास २२ दिन एक कोष्ठक में रहता है। इसे नीचे चक्र में स्पष्ट समझाया गया है। मुख्य मत व मतान्तर दोनों वहां प्रदर्शित हैं। यहां ध्यान रखिए कि एक कोष्ठक का मान ३ अंश ४५ कला है। ग्रह अपने राशि भोग काल के अनुसार इस दूरी को जितने समय में पूरा करे वह समय एक कोष्ठक का भोग काल कहलाएगी। ऊपर कई मत दिखाए जाने का कारण यह है कि भौमादि पंच ताराग्रह सूर्य की किरणों में अस्त होकर अपनी स्वाभाविक गति को छोड़कर या तो तेज चलते हैं या धीरे। इसी कारण परिस्थिति वशात् उनका भोगकाल कई विकल्पों में बताया गया है। तथापि मुख्यमत सामान्य परिस्थितियों में प्रायः ठीक उतरता है।

## कोष्ठ भोगकाल बोधक चक्र

| | | रवि | चन्द्र | भौम | बुध | गुरु | | शुक्र | शनि |
|---|---|---|---|---|---|---|---|---|---|
| मुख्यमत | मा० | ० | ० | ० | ० | १ | | ० | ३ |
| | दि० | ३ | ० | ५ | ३ | १८ | | ३ | २२ |
| | घ० | ४५ | १२ | ३ | १७ | ५४ | | ५ | २२ |
| | प० | ० | ४९ | ३९ | ० | ० | | ५१ | ० |
| मतान्तर | मा० | | ० | ० | ० | १ | अथवा ५६ दि० | ० | ३ |
| | दि० | | ० | ५ | ३ | १८ | | ३ | २२ |
| | घ० | ० | १७ | ३७ | ४५ | ४५ | | ४५ | ० |
| | प० | | ० | ० | ० | ० | | ० | ० |

**सफल विफल कोष्ठक का ज्ञान :**

**रेखायुक्तः सकलफलदो**
**रेखाहीनो यदि विफलकृत् ।**
**नीचास्तारातिभवनगतो**
**रेखोपेतोऽप्यशुभफलकृत् ॥१४॥**

रेखायुक्त इति । यो ग्रहो रेखया फलेन युक्तः सन् यस्मिन् कोष्ठे वर्तते स सकलफलदो भवति । यदि ग्रहो रेखया फलेन हीनो रेखारहितकोष्ठे भवतीत्यर्थस्तदा स विफलकृत् विफलं निष्फलं करोति । यो ग्रहो रेखया फलेनोपेतो युक्तः सन्नपि नीचराशिगतोऽस्तंगतः शत्रुराशिगतो यदि तदा अशुभफलकृद् अशुभं दुष्टं फलं करोति ।

यदि ग्रह रेखायुक्त कोष्ठक में हो तो अपना सम्पूर्ण फल देता है । यदि रेखा रहित कोष्ठक में हो तो विफल होता है । यदि कोई ग्रह रेखायुक्त होकर भी नीच राशि, शत्रुराशि या अस्तंगत हो तो अशुभ फल को देने वाला होता है ।

**ग्रहों का शुभाशुभ बल :**

**स्वोच्चेऽखिलं सत्फलमंघ्रिहीनं**
**कोणे स्वभेऽर्द्धं सखिभेऽङ्घ्रितुल्यम् ।**

**ज्ञेयो गजांशः समभे खमस्त-**
**नीचारिगे दुष्टफलं विलोमात् ॥१५॥**

स्वोच्च इति। यो ग्रहः स्वोच्चे निजोच्चराशौ वर्तते तस्य सत्फलं शुभफलं सम्पूर्णं भवेदिति शेषः। कोण इति। मूलत्रिकोणराशौ यो ग्रहो वर्तते तस्यांघ्रिहीनं पादोनं (३/४) सत्फलं भवति। स्वभेनिजराशौ अर्धं रूपार्धं (१/२) सत्फलं भवेदिति। सखिभे मित्रराशौ यस्तस्यांघ्रितुल्यं (१/४) पादतुल्यं सत्फलं भवेदिति। ज्ञेय इति। समभे समग्रहराशौ यो ग्रहो वर्तते तस्य गजांशोऽष्टमांशतुल्यं (१/८) सत्फलं भवेत्। योऽस्तंगतः सूर्येण सह वर्तते तस्य, नीचराशिगस्यारिभवनगतस्य च सत् फलं खं शून्यं भवेत्। इह विलोमादशुभं दुष्टं फलं ज्ञेयम्। अर्थात् दुष्टफलं क्रमशः शून्यम्, पादतुल्यं, पादत्रयं, अष्टमांशहीनं, सम्पूर्णं च ज्ञेयम् स्वोच्चकोण-भिन्नसमास्तंगतारिभगस्येति। तथा च गुणाकरो होरामकरन्दे—

'स्वोच्चे रूपं चरणरहितं स्वत्रिकोणे स्वभेऽर्धं,
नागांशानां त्रयमधिसुहृद्भेसुहृद्धाम्निपादः।
स्यादष्टांशः समगृहगते षोडशांशोऽरिराशौ,
द्वात्रिंशांशस्त्वधिरिपुगृहे नीचराशौ न किंचित् ॥'

जो ग्रह अपनी उच्च राशि में स्थित हो उसका शुभ फल पूर्ण, मूल त्रिकोण राशि में होने पर पौना अर्थात् ४५ कला, स्वराशि में होने पर आधा ३० कला, भिन्न राशि में होने पर चौथाई १५ कला, समराशि में होने पर आठवां हिस्सा साढ़े सात कला शुभ फल होता है। शेष अशुभ फल होगा। अर्थात् उच्च राशि में अशुभ फल शून्य, मूलत्रिकोण राशि में १५ कला, स्वराशि में ३० कला, भिन्नराशि में ४५ कला, समराशि में ५२.३० कला अशुभ फल होता है। अस्तंगत, शत्रुगत तथा नीचराशिगत ग्रह का शुभ फल शून्य और अशुभ फल पूर्ण अर्थात् ६० कला होता है।

**रेखा व बिन्दुओं का विंशोपक (विस्वा) बनाना :**

**रेखाश्च बिन्दून्विनिहत्य सायकैः**
**संहृत्य दोर्भ्यां च फलं यदाप्यते ।**
**विंशोपकात्मं क्रमतः शुभाशुभं**
**वीर्य्यं फलं तद्विधमभ्रचारिणाम् ॥१६॥**

रेखा इति। ग्रहाणां भिन्नभिन्नराशिस्थानां रेखाणां बिन्दूनां च योगः कार्यः। ततस्ता रेखा बिन्दून् च पृथक् सायकैः पंचभिर्विनिहत्य दोर्भ्यां द्वाभ्यां संहृत्य विभज्य तदा यत्फलमाप्यते लभ्यते तत् क्रमतः शुभाशुभं सदसद् रेखातः शुभफलं बिन्दुतोऽशुभफलमित्यर्थः। विंशोपकात्मकं विश्वात्मकं वीर्यं बलम्। तद्विधं अभ्रचारिणां ग्रहाणां फलमपि ज्ञेयम्। तथा च जातकरत्नकोशे—

'गृहेभ्यो ग्रहमाश्रित्य पूर्वं रेखाष्टकं स्मृतम्।
अत्र ग्रहाद् ग्रहान् कृत्वा युक्तिभेदोऽत्र केवलम्॥'
'ग्रहाणां शुभभावेषु रेखादेया खमन्यतः।
सार्धद्विगुणिता रेखा ग्रहे विश्वात्मकं फलम्॥' इति

अर्थात् एका रेखा सार्धद्वयविंशोपकात्मिका, एवमेको बिन्दुः सार्धद्वयविंशोपकात्मको ज्ञेयः। रेखातः शुभफलं बिन्दुतोऽशुभफलं ज्ञेयम्। रेखायोगः सार्धद्वयेन २½ निहता कार्या तदा विंशोपकात्मकं शुभबलं भवेत्। एवं बिन्दुयोगोऽपि तद्वत् निहतः कार्यस्तदा विंशोपकात्मकमशुभं बलं भवेत्। तत्र शुभबलाधिक्ये शुभफलमशुभबलाधिक्येऽशुभफलं वक्तव्यम्।

अलग अलग राशियों में जितनी रेखाएं हों उन्हें प्रत्येक अष्टक वर्ग के चक्र से उठा लें। उस संख्या में ५ से गुणा कर २ से भाग दें। लब्धि विंशोपकात्मक शुभ बल होगी।

इसी प्रकार प्रत्येक ग्रह के अष्टक वर्ग से प्रत्येक राशि के बिन्दु योग को ५ से गुणा कर २ से भाग देना चाहिए। लब्धि विंशोपकात्मक अशुभ बल होगी।

यदि किसी राशि में शुभ बल अधिक हो तो उस राशि में गोचर जनित फल शुभ होगा। इसके विपरीत अशुभ बल अधिक होने पर उस राशि का गोचर अशुभ होगा।

एक रेखा का विंशोपक मान २½ होता है। अर्थात् एक रेखा में २½ विस्वे होते हैं। इसी प्रकार बिन्दु भी २½ विस्वे का होता है। यदि रेखा योग अथवा बिन्दु योग को ढाई गुणा कर लिया जाय तो विंशोपक मान निकल आता है।

इस विषय को उदाहरण से स्पष्ट किया गया है। हमारे पूर्वोक्त उदाहरण में सूर्याष्टक वर्ग में मेष राशि में ४ रेखाएं हैं। इस संख्या को ढ़ाई से गुणा करने के लिए ५ से गुणा कर २ का भाग दिया तो ४×५÷२=१० विंशोपकात्मक शुभ बल हुआ। वहां बिन्दु योग भी समान होने के कारण अशुभ बल भी १० विंशोपकात्मक ही होगा।

अतः जब सूर्य मेष राशि में गोचर करेगा तब शुभाशुभ बल समान होने के कारण शुभाशुभ मिश्रित फल मिलेगा।

**ग्रहों का अंग विभाग :**

**शीर्षे मुखेऽर्को हृदये गलेऽब्जः**
**पृष्ठोदरेऽस्रो विधुजः करेऽंघ्रौ।**
**जीवश्च कट्यां जघनेऽथ गुह्ये**
**मुष्के कविर्जानुविभाग आर्किः॥१७॥**
**कुर्यात्प्रभुत्वं जननेऽनुयोगे**
**गोचारके यः खचरः प्रसव्यः।**
**तदा निजाङ्गे निजदोषतः स**
**पीडां ततस्तं परिपूजयेत्सन्॥१८॥**

शीर्ष इति। कुर्यादिति च। शीर्षे शिरसि मुखे वदनेऽर्कः सूर्यः प्रभुत्वं कुर्यात्। हृदये चित्ते गले कण्ठेऽब्जश्चन्द्रः। पृष्ठे उदरे चास्रो भौमः। करेस्ते अंघ्रौपादे विधुजो बुधः। कट्यां जघने च जीवः। गुह्ये मुष्केऽण्डकोशे कविः शुक्रः। जानुविभागे आर्किः शनिः प्रभुत्वमधिकारं कुर्यात्। यः खचरो ग्रहो जननेऽनुयोगे प्रश्नकाले, गोचारके गोचरे, प्रसव्यः प्रतिकूलवर्ती स्यादिति शेषः। तदा स निजांगे स्वकीयशरीरविभागे निजदोषतः स्वस्य पित्तादिदोषतः पीडां कुर्यात्। ततस्तं दोषकारकं ग्रहं सन् पण्डितः परिपूजयेत्।

सूर्य—सिर एवं मुख, चन्द्रमा—हृदय व गल प्रदेश, मंगल—पेट व कमर, बुध—हाथ व पैर, बृहस्पति—कमर तथा जांघ, शुक्र—गुप्तेन्द्रिय व अण्डकोश एवं शनि—जानु (घुटना) प्रदेश में अपना प्रभुत्व रखता है।

जन्मकाल, प्रश्नकाल या गोचर में जो ग्रह प्रतिकूल फल देने वाला होगा वह अपने वातपित्तादि दोषों के आधार पर अपने अपने उक्त अंगों में पीड़ाकारक होगा। अतः उसी ग्रह की शान्ति आदि का विधान करना चाहिए। इस बात को **गुणाकर** व **ढुण्डिराज** के उद्धरणों में पुष्ट किया गया है।

**आरभ्य तत्तद्भवनानि तत्तद्-**
**व्योमौकसामष्टकवर्गकाणाम्।**

**प्रस्तार्य्य रेखाः प्रथमोदिता या**
**ज्ञात्वा फलं दैवविदो वदन्तु ॥१९॥**

आरभ्येति । तत्तद् व्योमौकसां तेषां तेषां ग्रहाणां तद्तद् भवनानि तानि तानि भवनानि गृहाणि आरभ्याष्टकवर्गकाणां याः प्रथमोदिताः पूर्वोक्ता रेखाः कलास्ताः प्रस्तार्य फलं ज्ञात्वा दैवविदो ज्योतिर्विदः शुभाशुभफलं वदन्तु कथयन्तु। तथा च ब्रह्मयामले—

'तत्तद्राशीन् समारभ्य तत्तद् ग्रहाष्टकस्य च ।
वाक्योक्तबिन्दून् प्रस्तार्य फलं ज्ञात्वा वदेद् बुधः ।।' इति

जन्म समय में जो ग्रह जिस राशि में स्थित हो, उन-उन राशियों से लेकर आठ-आठ कोष्ठकों में सूर्यादि ग्रहों व लग्न की पूर्वोक्त रेखाओं को प्रस्तारित कर लेना चाहिए। तदनन्तर उन प्रस्तारित रेखाओं से ग्रहों के गोचर जनित शुभ या अशुभ फल को कहना चाहिए।

**तन्वादि भावों का फल :**

**एवं गृहाणां रविसम्मितानां**
**फलं वशेन द्युसदः स्थितेश्च ।**
**यथाफलं यस्य खगस्य यस्मिन्**
**भावे तथाद्यैर्गणकैः प्रवेद्यम् ॥२०॥**

एवमिति। एवमनेन प्रकारेण यस्य ग्रहस्य यस्मिन् भावे द्युसदो ग्रहस्य स्थितेरासनाया वशेन कारणेन रविसम्मितानां द्वादशतुल्यानां गृहाणां राशीनां यथाफलं भवति आद्यैः पुरातनैः गणकैः तथा तेन प्रकारेण फलं प्रवेद्यम्। तथा च ब्रह्मयामले—

'एवं द्वादशराशीनां ग्रहास्थितिवशाद्बुधैः ।
यद्ग्रहयस्य तु यद्भावे फलं ज्ञेयं यथा तथा ।।' इति

इस प्रकार द्वादश राशियों में ग्रहों की स्थिति के आधार पर जिस राशि में जितनी रेखाएं हों उनसे फल को जानना चाहिए।

**कोष्ठे कलोने लभते जनुष्मान्**
**दुःखादिकान् शस्त्रविषादिकेन ।**
**नाराचतुल्यादि फलैः प्रपुष्टे**
**कोष्ठे विहाय त्रिकमं शुभानाम् ॥२१॥**

विज्ञाय वृद्धिं तु तथा खलानां
हित्वाऽरिनीचर्क्षघनान्त्य मृत्यून्।
ज्ञात्वेति रेखाः करणानि धीरः
फलं वदेत्साम्यफलेन साम्यम्॥२२॥

कोष्ठ इति। विज्ञायेति। सर्वेषां ग्रहाणामष्टकवर्गे यस्यराशेः कोष्ठे कलया रेखयोने रहिते सति तदा जनुष्मान् शरीरी मनुष्य इति यावत्। शस्त्रेण बाणादिकेन विषादिभक्षणेन च दुःखादिकान् कष्टादीन् लभते। नाराचतुल्यादि-फलैः पंचप्रभृतिरेखाभिर्यस्य राशेः कोष्ठे प्रपुष्टेऽधिके सति तदा शुभानां सौम्यग्रहाणां त्रिकभं षष्ठाष्टमव्ययभावान् विहाय परित्यज्य, तथा खलानां पापा-नामरिनीचर्क्षघनान्त्यमृत्यून् शत्रुराशिनीचराशिलग्नव्ययाष्टमान् हित्वा त्यक्त्वा वृद्धिमुपचयं विज्ञाय रेखाः करणानि बिन्दून् चेत्येवं ज्ञात्वा धीरः पण्डितः फलं शुभाशुभात्मकं वदेत्। साम्यफलेन समानफलेन रेखा चतुष्टयेनेत्यर्थः साम्यं समानं फलं वदेत्। तथा च ब्रह्मयामले—

'बिन्दुहीने तु दुःखादीन् विषशस्त्रादिवाक्यतः।
फलाधिक्ये तु कोष्ठे तु पंचमाधिक्य वाक्यतः।
शत्रुनीचगृहं त्यक्त्वा व्ययषष्ठाष्टमं तथा।
पापानामुपचयं ज्ञात्वा शुभानांषट् त्रिकांस्तथा।
ज्ञात्वैवं बिन्दुरेखाश्च वदेदेवं फलं बुधः।
मध्यादि वाक्यं संप्रोक्तं फलं चैवं वदेत्तथा॥' इति

सूर्यादि सातों ग्रहों के अष्टक वर्ग में जिस राशि के जिस कोष्ठक में रेखा न हो तो उस राशि के रेखाभाव वाले कोष्ठ गोचर से जब ग्रह आए तब मनुष्य शस्त्र व विषादि से घात प्राप्त करता है।

जिस राशि में ५ से अधिक रेखाएं हों उनमें शुभग्रहों की षष्ठाष्टम द्वादश भाव की रेखाओं को छोड़कर तथा पापग्रहों की शत्रु, नीच राशि, लग्न, द्वादश व अष्टम भाव की रेखाओं को छोड़कर शेष रेखा व बिन्दु से फल कहना चाहिए। यदि रेखा व बिन्दुओं की संख्या समान हो तो समान फल समझना चाहिए।

**अधिक रेखावश शुभकृत्य का समय ज्ञान :**

स्वजन्मकालाश्रितभाद्विधातू
रेखाविधानं द्युसदां विधाय।

**प्रभूतरेखावशतः सुकर्म्म**
**सन्मासभावद्युचरासनासु ॥२३॥**

स्वजन्मेति। विधातुः कर्तुः स्वजन्मकालाश्रितभाद् निजजन्मकालीनग्रहाधिष्ठितराशेः सकाशाद् द्युसदां ग्रहाणां रेखाणां फलानां विधानं विधिं विधाय कृत्वा, प्रभूतरेखावशतो बहुरेखायोगवशेन सति शुभे मासिराशौ भावे ग्रहस्थितौ च सुकर्म विवाहादिशुभकर्म कुर्यादिति शेषः। तथा च विद्यामाधवीये—

कर्त्तुः स्वजन्मसमयावसितग्रहाणां
कृत्वाष्टवर्गकथिताक्षविधानमत्र ।
बह्वक्षयोगवशतः शुभराशिमास-
भावग्रहस्थितिषु कर्म शुभं विदध्यात् ॥ इति

जन्म समय में जो ग्रह जिस राशि में स्थित हो, उस राशि से अष्टक वर्ग का साधन कर, जिस राशि में जिस ग्रह की रेखाओं का योग अधिक हो, उस अधिक रेखा योग के आधार पर शुभ मास, राशि, भाव तथा ग्रहों की स्थिति में शुभ कार्य सम्पन्न करने चाहिएं।

**प्रक्षिप्तेष्टगणे समग्रहाणां**
**तत्कालर्क्षगरेखिकाभिधैक्ये ।**
**रेखा दन्तियमोन्मितप्रभूताः**
**सौख्यः स्याद् व्यसनं तदूनिताश्चेत् ॥२४॥**

प्रक्षिप्त इति त्रिष्टुब्जात्या। समग्रहाणां सर्वेषां ग्रहाणामष्टगणेऽष्टवर्गे प्रक्षिप्ते प्रहिते तत्कालर्क्षगरेखिकाभिधैक्ये तत्कालराशिस्थितिरेखायोगे कृते सति। यदि दन्तियमोन्मितप्रभूता अष्टाविंशतितुल्याधिका रेखाः स्युस्तदा सौख्यं वाच्यम्। यदि तदूनिता अष्टाविंशतितोऽल्पास्तदा व्यसनं विपद् वाच्या।

जन्म के समय सूर्यादि सातों ग्रह जिस राशि में स्थित हों उनकी रेखाओं का योग कर लेना चाहिए। यदि वह रेखा योग २८ से अधिक हो तो शुभ और २८ से कम होने पर अशुभ फल होता।

**कल्याण वर्मा** ने भी कहा है कि २८ रेखाएं मध्यम होती हैं। १४ रेखाएं अधम और उससे कम रेखाएं होने पर निश्चय से मरण कहना चाहिए। ग्रन्थकार ने रेखाओं के पूर्ण मान के विषय में तीन मत बताएं हैं—

(i) जो लोग सूर्यादि सातों ग्रहों की ८-८ रेखाएं अलग-अलग मानते हैं उनके मत में रेखाओं का पूर्ण मान ५६, आधा २८ व चतुर्थांश १४ होता है। **ढुण्डिराज, मंत्रेश्वर व कल्याण वर्मा** इसके मानने वाले हैं।

(ii) जो लोग सातों ग्रहों के रेखायोग को मानकर चलते हैं। उनके मतानुसार पूर्ण मान ३३७ व आधा १६७½ होता है। वैद्यनाथ इसी मत को मानते हैं।

(iii) जो एक ग्रह की ही आठ रेखाएं मानते हैं वे पूर्ण मान ८ तथा अर्ध मान ४ कहते हैं। विश्वनाथ इसके पक्षधर हैं। ग्रन्थकार ने प्रथम मत के आधार पर उक्त फल बताया है।

**चन्द्र रेखा से शुभाशुभ फल :**

**सौम्याङ्कसंस्थाः शशिनो यदुन्मिताः**
**किं शीतगोः सद्भवने यदुन्मिताः।**
**पुष्टे तदित्थं विदितं ततः शिव-**
**मापत्परेषामिति सूचितं कृशे ॥२५॥**

सौम्येति। शशिनश्चन्द्रस्य, यदुन्मिता यावन्तः सौम्यांकसंस्थाः शुभाकांवस्थिताः, किमथवा शीतगोश्चन्द्रस्य, सद्भवने शुभस्थाने यदुन्मिता यावन्तोऽकाः स्युः, इत्थमनेन प्रकारेण तद्विदितं तज्ज्ञातं चेत्तदा पुष्टेऽधिके भवति, ततस्तेभ्यः शिवं कल्याणं, कृशे ऊने आपद् विपद् ज्ञेयेति शेषः। इत्येवं परेषामन्येषां ग्रहाणां सूचितं विज्ञेयम्।

चन्द्रमा की जितनी शुभ रेखाएं हों, अथवा चन्द्र कुण्डली में ६, ८, १२ स्थानों को छोड़कर शेष स्थानों में जितनी रेखाएं हों, यदि वे ४ से अधिक हों (अलग-अलग शुभ स्थानों में) तो शुभ, यदि ४ से कम हों तो अशुभ फल विपत्ति आदि समझना चाहिए।

यहां पर चन्द्रमा से शुभ स्थानों में जहां-जहां ४ से अधिक अंक (रेखाएं) हों उस भाव की वृद्धि कहनी चाहिए। यदि ४ से कम हों तो उस भाव का नाश होगा।

इसी बात को दूसरे ढंग से भी कह सकते हैं यदि सारे शुभ भवनों में (६, ८, १२ रहित शेष भाव) २८ से अधिक रेखाएं हों तो शुभ व कम हों तो अशुभ होगा। **मंत्रेश्वर** की फलदीपिकामें एक बात और

बताई गई है कि चन्द्रमा से जिन जिन भावों में शुभ ग्रह पड़े हों, उन स्थानों में यदि २८ से अधिक रेखाएं हों तो शुभ व कम होने पर भाव सम्बन्धी अशुभ होगा।

**मास व दिवस के फल का ज्ञान :**

**रेखायोगः सामुदायाष्टवर्गे**
**ऽघ्नैकाल्पो यत्र मासे दिने वा।**
**तस्मिन्नेष्टं प्रोक्तसंख्याधिकश्चे-**
**न्मध्यं श्रेष्ठं तत्त्वदृग्भ्यः प्रपुष्टः ।।२६।।**

रेखायोग इति। समुदायाष्टवर्गे यत्र यस्मिन् मासे वा दिने दिवसे रेखाणां फलानां योगः समुदायो ऽघ्नैकाल्पो द्वादशोत्तरशतान्न्यूनस्तस्मिन्मासे दिने वा नेष्टमशुभं फलं ज्ञेयमिति शेषः। चेद्यदि स रेखायोगः प्रोक्तसंख्याधिकः द्वादशोत्तर-शतादधिक इत्यर्थः। तदा मध्यं समानं फलं वाच्यम्, यदि स तत्त्वदृग्भ्यः पंचविंशत्युत्तरशतद्वयात् प्रपुष्टोऽधिकस्तदा तस्मिन् मासे दिने वा श्रेष्ठं शोभनं फलं वाच्यमिति शेषः।

जिस मास अथवा दिन में समुदायाष्टक वर्ग की रेखाओं का योग ११२ से कम हो तो उस मास व दिन में अशुभ फल होता है। जिस मास या दिन में उक्त रेखाओं का योग ११२ से अधिक व २२५ से कम हो तो मध्यम फल उस मास व दिन में होगा। जब रेखाओं का योग २२५ से अधिक हो तो उस मास या दिन में शुभ फल होता है।

**शुभाशुभ मास विवेक :**

**संक्रान्तिघस्रेऽष्टगणेषु खौकसां**
**रेखैक्यतश्चार वशाद्विचिन्तयेत्।**
**मासः फलं शस्तमशस्तमत्र सन्**
**दक्षस्तथा तद्वशतो द्युनः फलम् ।।२७।।**

संक्रान्तीति। संक्रान्तिघस्रे रविसंक्रमणदिवसे, खौकसां ग्रहाणामष्टवर्गेषु चारवशात् गोचरवशाद् रेखैक्यतः फलयोगतो मासो मासस्य शस्तं शुभमशस्तमशुभं फलं, दक्षश्चतुरः सन् विद्वान् विचिन्तयेत्। तथा तेन प्रकारेण तद्वशतो गोचररेखा वशतो, द्युनो दिवसस्य शुभमशुभं फलं विचिन्तयेत्। तथा च वृद्धयवनः—

'संक्रमदिने ग्रहाणामष्टवर्गेषु चारवशात्।
रेखैक्याच्छुभमशुभं मासफलं तद्वशाद् दिनफलं च।।' इति

जन्मकालीन ग्रहों का अष्टक वर्ग साधन करके रख लेना चाहिए। अब जिस संक्रान्ति मास का शुभाशुभ फल जानना हो, उस संक्रान्ति के प्रवेश के दिन प्रत्येक ग्रह जिस राशि में स्थित हो, उस राशि का रेखायोग पूर्वसाधित अष्टक वर्ग से ले लें। अब सातों ग्रहों की तत्काल अधिष्ठित राशि की रेखाओं का योग कर लें। उसी योग के आधार पर पिछले श्लोक में बताए गए प्रकार से मासादि का शुभाशुभ फल जानना चाहिए।

इसी प्रकार जिस दिन का शुभाशुभ फल जानना अभीष्ट हो, उस दिन सातों ग्रहों की गोचर राशि की रेखाओं का योग करके शुभाशुभ फल जानना चाहिए।

पूर्वोक्त उदाहरण के संदर्भ में इस बात को स्पष्ट किया जा रहा है। उदाहरण में वर्णित व्यक्ति के लिए कन्या संक्रान्ति मास सं० २००१ में कैसा रहेगा ? यह जानना है। कन्या संक्रान्ति के दिन ग्रह स्थिति इस प्रकार है—

सूर्य, चन्द्र व बुध कन्या में; मंगल व शुक्र तुला में, गुरु सिंह में एवं शनि मिथुन में है।

जन्म समय सूर्याष्टक वर्ग में कन्या की रेखाएं ६, चन्द्राष्टक वर्ग में कन्या की रेखा २, मंगलाष्टक वर्ग में तुला में रेखाएं २, बुधाष्टक वर्ग में कन्या में रेखा ४, गुर्वष्टक में सिंह में रेखा ४, शुक्राष्टक में तुला में रेखाएं २ और शन्यष्टक वर्ग में मिथुन की रेखाएं ४ हैं। इन सब का योग २४ हुआ। २५ से कम रेखाएं अशुभ होती हैं। अतः यह मास अशुभ फल देने वाला होगा।

इसी बात को समुदायाष्टक से देखते हैं। कन्या संक्रान्ति के दिन अधिष्ठित राशियों की रेखा संख्या इस प्रकार है—

कन्या—२६, कन्या—२६, तुला—२१, कन्या—२६, सिंह—२६, तुला—२१, मिथुन—३६। इनका योगफल १८५ है।

अत: यह मास मध्यम फलप्रद हुआ। वास्तव में मध्यम व अशुभ फल के कारण इसे अशुभ ही समझना चाहिए।

अब इसी विषय को दिन के संदर्भ में समझते हैं।

सं० २००१ में आश्विन शुक्ल दशमी बुधवार का फल जानना है। उस दिन ग्रह स्थिति इस प्रकार है—

सूर्य—कन्या, चन्द्र—मकर, मंगल—कन्या, बुध—सिंह, गुरु—सिंह, शुक्र—तुला, शनि—मिथुन।

जन्म समय प्रत्येक ग्रह के अष्टक वर्ग में उक्त अधिष्ठित राशियों की रेखा संख्या इस प्रकार है—६+६+४+५+४+२+३=३०। योगफल २८ से थोड़ा अधिक है। अतः थोड़ा शुभ फल ही होगा, अशुभ फल नहीं होगा।

इसी विषय को समुदायाष्टक से देखें तो वहां उक्त राशियों में रेखा संख्या क्रमशः इस प्रकार है—२६+३१—२६+२९+२९+२१+३६=१९८ योग हुआ। २२५ से कम होने के कारण यह दिन मध्यम रहेगा। दोनों प्रकार से मध्यम आने के कारण यह दिन मध्यम ही समझना चाहिए।

**रेखाभिरश्वप्रमिताभिरन्विते**
**मासे नराणां मरणं प्रजल्पितम्।**
**यच्छेत्सते द्वौ तिलपर्वतावप-**
**मृत्युप्रणाशाय नखोन्मितं पलम्॥२८॥**
**स्वर्णं तदर्द्धं निजशक्तितोऽथवा**
**मास्यन्वितेऽष्टप्रमितैः फलाभिधैः।**
**सञ्जातिहीनोऽन्तृवशं गतो द्रुतं**
**विप्राय कर्पूरतुलां प्रयच्छतु॥२९॥**
**तन्मूल्यनेमं हरिदुन्मितं पलं**
**स्वर्णं प्रदद्यात्किमु तद्दलं विधोः।**
**तोषाय तद्दोषत एव मुच्यते**
**प्राप्नोति सद्यः किल वाञ्छितं फलम्॥३०॥**

रेखाभिरिति। स्वर्णमिति। तन्मूल्येति च। अश्वप्रमिताभिः सप्तभी रेखाभिरन्विते युक्ते मासे नराणां मनुष्याणां मरणं मृत्युः प्रजल्पितः कथितः। तदाप मृत्युनाशाय सते विदुषे द्वौ तिलपर्वतौ यच्छेद् दद्यात्। वा अथवा नखोन्मितं विंशतितुल्यं पलं स्वर्णमथवा निजशक्तितस्तदर्धं दशपलं सुवर्णं यच्छेत् दद्यात्। तथा च जगन्मोहने—

रेखाभिः सप्तभिर्युक्ते मासे मृत्युर्नृणां भवेत्।
सुवर्णं विंशतिपलं दद्याद् द्वौ तिलपर्वतौ॥' इति

अस्य दानस्य विशेपविधिर्दानचन्द्रिका प्रयोगरत्नमत्स्यपुराणादौ द्रष्टव्यः। अष्टेति। अष्टप्रमितैरष्टतुल्यैः फलाभिधैः रेखाभिरन्विते युक्ते मासि तदा नरो जातिहीनो जातिच्युतः सन् द्रुतं मृत्युवशं प्राप्तस्तस्माद् विधोश्चन्द्रस्य तोपाय, विप्राय कर्पूरतुलां तस्य मूल्येनेमं तस्याः मूल्यार्धं वा हरिदुन्मितं दशतुल्यं पलं स्वर्णं किमु अथवा तद्दलं तस्यार्धं पंचपलं स्वर्णं प्रदद्यात्। तदा तद्दोपतो मुच्यते। ततः किल निश्चयेन सद्यस्तत्क्षणे वाञ्छितं फलं प्राप्नोति। यथा जगन्मोहने—

'वसुभिर्जातिहीनः सन् शीघ्रं मृत्युवशो नरः।
असत्फलविनाशाय दद्यात्कर्पूरजां तुलाम्॥' इति

उपर्युक्त प्रकार से देखने पर जिस मास में ७ रेखायोग हो तो उस मास में मृत्यु समझनी चाहिए। तब इस अपमृत्यु का निराकरण करने के लिए तिलों के दो पर्वत अथवा २० पल सोना अथवा १० पल अथवा यथाशक्ति सोना दान करना चाहिए।

जिस मास में आठ रेखाएं हों तो उस मास में मनुष्य जातिच्युत होता है तथा शीघ्र ही मृत्यु को प्राप्त होता है।

अतः इस दोष का निवारण करने के लिए कर्पूर से तुलादान कराना चाहिए अथवा कर्पूर के मूल्य से आधा मूल्य या १० पल सोना तथा अशक्तावस्था में ५ पल सोना दान करना चाहिए।

इस फल और दान की मात्रा के विषय में **जगमोहन, गर्ग व पराशर** के वाक्यों को प्रमाण रूप में उद्धृत किया गया है। पर्वत का मान कितना हो? इस विषय में ध्यातव्य है कि १००० द्रोण धान्यादिक का पर्वत (ढ़ेर) उत्तम, ५०० द्रोण का मध्यम व ३०० द्रोण का पर्वत कनिष्ठ होता है। द्रोण का मान **अमर सिंह** तथा **भावमिश्र** ने अपने भाव प्रकाश में ४ आढ़क बताया है। आढ़क ४ सेर के बराबर होता था। इस प्रकार १६ सेर का १ द्रोण हुआ। इसी द्रोणमान से पर्वत का निर्माण करना चाहिए।

पल के विषय में भी **भाव प्रकाश** में बताया गया है कि १६ माशे का १ कर्ष व ४ कर्ष का १ पल होता है। इस प्रकार ६४ माशे का एक पल हुआ। किन्तु **तिथि तत्त्व** में इसका मान अन्य प्रकार से बताया गया है। तदनुसार पल के तीन भेद हैं—शास्त्र पल, वैद्यक पल व लौकिक पल। लौकिक पल—तीन तोले, दो माशे व आठ रत्ती का होता है। शास्त्र पल—चार तोले व वैद्यक पल—आठ तोले का होता है। किन्तु

ज्योतिष के संदर्भ में लौकिक पल का ग्रहण करना चाहिए। **मत्स्य पुराण** में दस पर्वतों का दान विभिन्न अवसरों पर अरिष्ट निवारणार्थ बताया गया है—धान्य पर्वत, लवण पर्वत, गुड़ पर्वत, सुवर्ण पर्वत, तिल पर्वत, कपास पर्वत, घृत पर्वत, रत्न पर्वत, चांदी का पर्वत और शर्करा पर्वत। इन सबके दान की सम्पूर्ण विधि **दान चन्द्रिका** या **प्रयोग रत्न** आदि ग्रन्थों में देख लेनी चाहिए। तिल पर्वत का मान १० द्रोण उत्तम, ५ द्रोण मध्यम व ३ द्रोण कनिष्ठ होता है।

**विभिन्न रेखा संख्यक मासों का फल :**

**कलाभिराढ्ये नवभिर्भुजङ्गतो**
**ध्रुवं मनुष्यो म्रियते शुभाप्तये।**
**चतुर्भिरश्वैः सहितं रथं दिशे-**
**त्खगेशतोषाय दशप्रमैः फलैः ॥३१॥**
**मासे युतेऽस्त्रान्मनुजस्त्यजेदसू-**
**न्कल्याणलब्ध्यै कवचं सहीरकम्।**
**दद्याद् द्विजायेशमितैः फलैर्युते**
**प्राप्याभिशापं रहितोऽसुभिस्तदा ॥३२॥**
**भवोऽत्र रौप्यस्य पलैर्दशोन्मितं-**
**र्विनिर्मितां ग्लौप्रतिमां स्वशक्तितः।**
**दिशेद् द्विजायानल होत्रिणे रवि—**
**प्रमैर्मृतिं नुर्जलदोषतो वदेत् ॥३३॥**
**धरां दिशेद्विप्रवराय भोजये-**
**त्कुटुम्बिभिः साकमतः परं शुभम् ॥३३½॥**

कलाभिरति। मास इति। भव इति। धरामिति च। नवभिः कलाभी रेखाभिः आढ्ये युक्ते मासे यदा तदा ध्रुवं मनुष्यो भुजंगतः सर्पेण म्रियते। तदा शुभाप्तये सत्फलप्राप्तये, खगेशो गरुडस्तस्य तोषाय सन्तुष्ट्यै, चतुर्भिरश्वैर्घोटकैः सहितं युक्तं रथं दिशेत् दद्यात्। ब्राह्मणायेति शेषः। तथा च जगन्मोहने—

'रेखाभिर्नवभिः सर्पान्म्रियते मनुजो ध्रुवम्।
अश्वैश्चतुर्भिः संयुक्तं रथं दद्याच्छुभाप्तये ॥' इति

दशप्रमैरिति। दशप्रमैर्दशतुल्यैः फलै रेखाभिर्युक्ते मासे यदा तदा मनुजोऽस्त्रान्मोहनादितः शस्त्राद्वा असून् प्राणान् त्यजेदुत्सृजेत्। अतः कल्याण लब्ध्यै सहीरकं वज्रसहितं कवचं द्विजाय ब्राह्मणाय दद्यात्।

ईशेति। ईशमितैरेकादशमितैः फलैर्युते मासे भवो जातोऽभिशापं मिथ्याभिशंसनं प्राप्यासुभिः प्राणैः रहितो भवेदिति। अतः स्वशक्तितो रौप्यस्य रजतस्य दशोन्मितैर्दशतुल्यैः पलैर्विनिर्मितां ग्लौश्चन्द्रस्तस्य प्रतिमामनलहोत्रिणेऽग्निहोत्रिणे द्विजाय दिशेद् दद्यात्।

रविरिति। रविप्रमैर्द्वादशतुल्यैः फलैर्युक्ते मासे जलदोपतो नुर्मनुष्यस्यमृतिं वदेत्। अतो विप्रवराय धरां भूमिं दिशेत् तथा कुटुम्बिभिः साकं भोजयेत्। अतः परं शुभं वदेदिति। यथा च जगन्मोहने—

'रेखाभिर्दशभिः शस्त्रात्प्राणांस्त्यजति मानवः।
दद्याच्छुभफलप्राप्त्यै कवचं वज्रसंयुतम्॥
रुद्रैः प्राप्याभिशापं च प्राणैर्युक्तो भवेन्नरः।
दिक्पलैः स्वर्णघटितां प्रदद्यात्प्रतिमां विधो॥' इति

यदि कोई मास ९ रेखाओं से युक्त हो तो उस मास में निश्चय से सांप के कारण मृत्यु होती है। अतः गरुड़ की प्रसन्नता के लिए चार घोड़ों से युक्त रथ का दान कर देना चाहिए।

१० रेखाओं वाले मास में मनुष्य की शस्त्र से मृत्यु सम्भावित होती है। अतः अछिद्र हीरों से जटित कवच का दान करना चाहिए। ११ रेखाओं वाले मास में मदिरा पानादि या अभिशाप के दोष के कारण मृत्यु होती है। अतः दस पल चांदी की मूर्ति बनाकर किसी अग्निहोत्री ब्राह्मण को दान कर देनी चाहिए।

१२ रेखाओं से युक्त मास में जल दोष से मनुष्य की मृत्यु हो सकती है। अतः भूमि का दान व अपने कुटुम्बी जनों के साथ ब्राह्मणों को भोजन कराना चाहिए। तब शुभ फल की प्राप्ति होती है।

**त्रिकुप्रमैर्व्याघ्रत एति पञ्चतां**
**हिरण्यगर्भस्य हरेः सदाप्तये॥३४॥**
**दानं प्रकुर्य्यात्सुरपैस्तु भक्षितः**
**कालेन जह्यादचिरेण जीवनम्।**
**मूर्त्तिं वराहस्य सुवर्णनिर्मितां**
**विप्राय यच्छेद् दिवसैः कुभृद्भयम्॥३५॥**
**तत्रेभदानं किमु दीयते करी**
**स्वर्णस्य यद्वा तिलगर्भदानकम्।**

प्रोक्तं बुधैः षोडशभिः समन्विते

मासे तदारिष्टमवाप्नुयाज्जनः ।।३६।।

कल्पाभिधं तत्र तरुं प्रयच्छतु

दोषेण तेनेह विमुच्यते दश ।

स्वर्णानि किं तच्छकलं प्रदापये—

न्मासेऽगचन्द्रैः सहिते गदार्दितः ।।३७।।

स्थानान्तरः सञ्चलितः प्रभूय

दिने दिने तत्र मिताशनी स्यात् ।

दानेन धेन्वाश्च गुडस्य तेन

दोषेण मर्त्यः परिमुच्यते सः ।।३८।।

पापग्रहाणां यदि चेद्दृशा भवे-

न्नूनं महादानमिह प्रदापयेत् ।।३८½।।

त्रिक्विति । दानमिति । तत्रेति । कल्पेति स्थानादिति । पातेति च । त्रिकुप्रमैस्त्रयोदशतुल्यैः फलैर्युक्ते मासे यदा तदा व्याघ्रतः शार्दूलात् पंचतां मृत्युमेति प्राप्नोति । अतः सदाप्तये शुभफललाभाय हरेर्विष्णोः हिरण्यगर्भस्यशालिग्रामस्य दानं प्रकुर्यात् ।

सुरपैरिति । सुरपैश्चतुर्दशभिः फलैर्युक्ते मासे कालेन मृत्युना भक्षितः खादितोऽचिरेण जीवनं जह्यादुत्सृजेत् । अतो वराहस्य भगवतो मूर्ति सुवर्णनिर्मितां विप्राय यच्छेत् ।

दिवसैरिति । दिवसैः पंचदशभिः फलैर्युक्ते मासे कुभृद् राजा तस्मात् भयं स्यात् । तत्र इभो हस्ती तस्य दानं वितरणं कार्यम् । अथवा सुवर्णस्य करी हस्ती दीयते । यद्वा तिलगर्भदानकं बुधैः प्रोक्तम् ।

षोडशभिरिति । षोडशभिः फलैः समन्विते मासे जनोऽरिष्टं कष्टमवाप्नुयात् । तत्र कल्पाभिधं तरुं कल्पवृक्षं प्रयच्छतु विप्राय । किमथवा दशपलानि स्वर्णानि वा तच्छकलं तदर्धं पंच पलं स्वर्णं प्रदापयेत् । तेन दोषेण मुच्यते । यच्च ग्रन्थान्तरे प्रोक्तम्—

'षोडशभिरंगपीडा भवति शरीरे महाव्याधिः ।' इति

मास इति । अगचन्द्रैः सप्तदशभिः फलैर्युक्ते मासे नरो गदेन रोगेण अर्दितः पीडितो भूत्वा स्थानान्निजाधिष्ठितस्थानात् संचलितो भूत्वा तत्र स दिने दिने प्रतिदिनं मिताशनी मिताहारी मन्दाग्निभाग् भवति । अतो गुडस्य धेन्वाः सुरभ्या दानेन मर्त्यो मनुष्यस्तेन दोषेण परिमुच्यते । यदि चेत्तदा पापग्रहाणाम-

शुभग्रहाणां दशा भवेत् तर्हि नूनं महादानं तुलापुरुषदानं प्रदापयेत्। तथा च जगन्मोहने—

ऋषि चन्द्रैर्व्याधिभयं गुडधेनुं निवेदयेत्।

१३ रेखाओं से युक्त मास में बाघ के कारण मृत्यु होती है। तब शुभफल की प्राप्ति के लिए शालग्राम का दान करना चाहिए।

१४ रेखाओं वाले मास में काल के कारण मृत्यु होती है। अतः भगवान् वराह की मूर्ति बनवा कर दान करनी चाहिए।

१५ रेखाओं वाले मास में व्यक्ति को राजा से भय होता है। अतः हाथी का दान या सोने के हाथी या तिलगर्भ का दान करना चाहिए।

·१६ रेखाओं से युक्त मास में अरिष्ट होता है। अतः कल्पवृक्ष का दान, अथवा १० या ५ पल सोने का दान करना चाहिए।

१७ रेखाओं से युक्त मास में रोगपीड़ा, स्थानभ्रंश तथा मन्दाग्नि आदि होते हैं। अतः गुड़ धेनु का दान करना चाहिए। यदि उस समय पापग्रहों की दशा चल रही हो तो तुलादान करना चाहिए।

पुराणों में दस धेनुओं का दान बताया गया है। वे इस प्रकार हैं—गुड़धेनु, घृतधेनु, तिलधेनु, जलधेनु, क्षीरधेनु, मधुधेनु शर्कराधेनु, दधिधेनु, रसधेनु, वास्तविक धेनु।

इनमें अलग-अलग धेनुओं का प्रमाण अलग-अलग वताया गया है। यहां हम पाठकों के लाभार्थ गुड़धेनु का विवरण दे रहे हैं—

एक हजार पल का एक भार होता है। इसी से गुड़धेनु का प्रमाण करते हैं।

उत्तम गुड़धेनु—४ भार गुड़ (धेनु निमित्त) १ भार (वत्स निमित्त)
मध्यम गुड़धेनु—२ भार गुड़ (धेनु निमित्त) १/२ भार (वत्स निमित्त)
कनिष्ठ गुड़धेनु—१ भार गुड़ (धेनु निमित्त) १/४ भार (वत्स निमित्त)

आशय यह है कि उक्त मात्रा में गुड़ लेकर अलग अलग रखकर उस ढेर में गौ व वत्स की कल्पना करके दान करना चाहिए।

**मासे भुजङ्गेन्दुमिते कलिप्रियो**
**ना सत्यवादीतदयो गतार्थवान्॥३९॥**

रिष्टेन नूनं परिभूयते तदा
रत्नक्षमागोकनकानि दीयते ।
भव्येप्सुभिर्गोकुमितेऽत्र नीवृत-
स्त्यागो मृतिर्वैभरथं गजं हयम् ॥४०॥
तत्र प्रयच्छेत्कुसुराय मुच्यते
तद्दोषतोऽथो गगनाश्विसम्मिते ।
बुद्ध्या विमुक्तः किमु नीचकर्म्मणि
सक्तोऽत्र दानं सितघोटकस्य गोः ॥४१॥
किं दीयते ब्राह्मणभोजनं भवो
लक्षायुतं वाथ सहस्रमङ्गभृत् ।
कुर्यात्कुयुग्मैरुपतापपीडिता
उद्योगहीना उत कृष्णमानसाः ॥४२॥
ऐश्वर्य्यमुक्ता इह धान्यपर्वत-
दानं किमु स्थापनकं स्वयं भुवः ।
भक्त्या विधानेन नरः करोतु त-
द्दोषच्छिदे युग्मकरैः कृशोऽर्द्दितः ॥४३॥
क्षीणैस्तथा बन्धुजनैः प्रसूतिज-
मेव [प्रविन्देद्भयाननी तदा ।
देयोत दानानि दश प्रयच्छतु
भद्रेच्छुरग्निद्विमितैः प्रपद्यते ॥४४॥
क्लेशाननेकान् [प्रतिमां विनिर्मितां
तीक्ष्णद्युतेर्हेममयीं स्वशक्तितः ।
शैलैः पलाख्यैः किमु तद्दलेन वा
तत्खण्डखण्डेन पुनर्द्विजातये ॥४५॥
ददातु दोषक्षयकाम्यया जनो
मासे चतुर्विशतिसम्मिते सदा ।
स्त्रीशेमुषीमोहित उद्भवो तदा-
ऽगम्यासु कुर्याद्गमनं किमन्विते ॥४६॥

पापग्रहाणां दशया स्वबन्धुभिः
प्राणी निरस्तो धनसंक्षयोऽथवा ।
भ्रष्टो निजस्थानकतः प्रदीयते
यद्वा सहस्रं च गवां गवां शतम् ॥४७॥
किं वा प्रदद्याद्दश गा द्विजाय त-
द्दोषस्य शान्त्यै दशया युतेऽसतः ।
मासे प्रकुर्याज्जनितो यथोदितं
मर्त्यो यथाशक्ति विधीयते सतः ॥४८॥
खेटस्य दायेऽथ फलैः समन्विते
तत्त्वप्रमैर्मासि खगस्य पीडया ।
वातामयाद्यैरथ वातिसारतो
मन्दाग्निमान्द्यं चिरकालिकं तदा ॥४९॥
तद्व्याधिशान्त्यै द्विजतर्पणं क्रतु-
होमादि कुर्यात्तपनादितुष्टये ॥४९½॥

मास इति । रिष्टेनेति । तत्रेति । किमिति । ऐश्वर्येति । क्षीणैरिति । क्लेशैरिति । ददात्विति । पाप्मेति । किंवेति । खेटस्येति । तद्व्याधि इति च । भुजंगेन्द्रमिते एकोन्विंशोन्मिते मासे । तदा ना मनुष्यः कलिप्रियः कलहप्रियोऽसत्यवादी, इतदयो निर्दयः, गतार्थवान् निर्धनः, नूनं रिष्टेन कष्टेन परिभूयते । पीडित इत्यर्थः । तदा भवेप्सुभिः शुभेच्छुभिः रत्नं माणिक्यादि, क्षमाभूमिः, गौः, कनकं सुवर्णं एतानि वस्तूनि दीयते ।

गोक्विति । गोकुमिते एकोनविंशतिमिते मासे तदा नीवृतो देशस्य त्यागो वा मृतिर्मरणं भवेत् । तत्रेभानां हस्तिनां रथं स्यन्दनं गजं हयं कुसुराय ब्राह्मणाय प्रयच्छेत् । तदा तद्दोषतो मुच्यते । तथा च जगन्मोहने—

देशत्यागोऽंक चन्द्रैः स्याच्छान्तिं कुर्याद्विधानतः ।

अथो इति । गगनाश्विसम्मिते विंशति तुल्ये—मासे तदा वुद्ध्या मत्या विमुक्तो रहितोऽथवा नीचकर्मणि जघन्यक्रियायां सक्तः, अतोऽत्र सितघोटकस्य श्वेतहयस्य गोर्धेन्वा दानं दीयते भव उत्पन्नोऽंगभृत्प्राणी लक्षं शतसहस्रमयुतं दशसहस्रं सहस्रं वा ब्राह्मणभोजनं कुर्यात् । तथा च जगन्मोहने—

विंशत्या बुद्धिनाशः स्यात्कुर्याल्लक्षमितं जपम् ॥ इति

कुयुग्मैरिति । कुयुग्मैरेकविंशत्या युते मासे तदोपतापो रोगस्तेन पीडिता दुःखिताः, उद्योगहीना निरुद्यमा उताथवा कृष्णमानसाः, कपटहृदयाः, ऐश्वर्यं

विभूतिस्तया मुक्ता रहिता अतो धान्यपर्वतदानं दीयते, किमु तद्दोषाच्छिदे तद्दोष-परिहाराय भक्त्या श्रद्धया विधानेन स्वयंभुवो ब्रह्मणः स्थापनं करोतु। तथा च जगन्मोहने—

भूमिपक्षे रोगपीडा दद्यात् धान्यस्य पर्वतम्। इति

युग्मेति युग्मकरैर्द्वाविंशत्या युते मासे तदा कृशो दुर्बलः क्षीणैर्दुर्बलैर्बन्धु-जनैरर्दितः पीडितः प्रसूतिजं दुःखमेव प्रविन्देत्प्राप्नुयात्। तदोभयाननी प्रसववती गौर्देया, उताथवा भद्रैश्चतुर्दशदानानि प्रयच्छतु। यथा ग्रन्थान्तरे—

'कुमतिर्द्वाविंशद्भिर्दैन्यं च पराभवो विकलम्।' इति

गर्गपराशरादयोऽपि—

'आकृत्या च परिक्षीणः क्षीणैर्बन्धुभिरर्दितः।
दुःखमेव सदा विन्देद्देयोभयमुखी ततः॥
अथवा दशदानानि प्रदद्याच्छान्तिकाम्यया॥' इति

अग्नीति। अग्निद्विमितैस्त्रयोविंशतिमितैर्युक्ते मासे तदानेकान् विविधान् क्लेशान् प्रपद्यते। अतएव जनो दोषक्षयकाम्यया, स्वशक्तितो निजसामर्थ्यात्, तीक्ष्णद्युते रवेः, शैलैः सप्तभिः पतार्ध्यैः सौवर्णी प्रतिमां मूर्ति विनिर्मितां घटितां किमु अथवा तद्दलेन तदर्धेन वा तत्खण्डखण्डेन तदर्धार्धेन पुनर्द्विजातये ब्राह्मणाय दद्यात्। तथा च जगन्मोहने—

'रामपक्षयुते मासे नानाक्लेशान् प्रपद्यते।
सौवर्णीं प्रतिमां दद्याद् रवेः सप्तपलैः क्रमात्॥' इति

मास इति। चतुर्विंशति सम्मिते मासे तदा उद्भवी जन्मी मनुष्य इति यावत्। स्त्रियाः शेमुषी बुद्धिस्तया मोहितोऽगम्यासु स्त्रीषु गमनं कुर्यात्। किमथवा पाप्मग्रहाणां खलखेचराणां, दशयान्विते सति प्राणी स्वबन्धुभिर्निरस्तः तिरस्कृतो-ऽथवा धनस्य संक्षयो वा निजस्थानतो भ्रष्टश्च्युतोऽतएव गवां सहस्रं वा गवां शतं दीयते। किं वा तस्यदोषस्य शान्त्यै दशगाः ब्राह्मणाय प्रदद्यात्। असतोऽशुभस्य दशया युते मासे जनित उत्पन्नो नूनं निश्चयेन यथोदितं यथोक्तं विधानं प्रकुर्यात्। सतः शुभस्य खेटस्यदाये यथाशक्ति शान्तिः शमो विधीयते।

अथेति। अथेत्यानन्तर्ये। तत्त्वप्रमैः पंचविंशतिमितैः फलै रेखाभिः समन्विते युक्ते मासि तदा खगस्य ग्रहस्य पीडयाऽथवा वातामयाद्यैर्वायुरोगादिभिरथवा अतिसारतोऽथवा चिरकालिकं मन्दाग्निमान्द्यं भवेदिति शेषः। व्याधौ रोगस्तस्य शान्त्ये शमाय द्विजानां ब्राह्मणानां तर्पणं तृप्तिं कुर्यात्। अथवा तपनादितुष्टये सूर्यादीनां प्रीतये ऋतुहोमादि यज्ञहोमादि कुर्यात्। यथाऽन्यत्रप्रोक्तम्—

'करतलगतमपि वित्तं नश्यति पुंसां तु पंचविंशत्या।' इति

१८ रेखाओं से युक्त मास में कलह करने में मन लगना, मिथ्या भाषण, निर्दयता, धन की हानि एवं कष्ट प्राप्ति होती है। अतः शुभ फल की प्राप्ति के लिए माणिक्य, सुवर्ण, भूमि या गौ का दान करें।

१९ रेखाओं से युक्त मास में देश का त्याग या मृत्यु होती है। अतः हाथी, घोड़ा या इनसे युक्त रथ का दान करना चाहिए।

२० रेखाओं से युक्त मास में बुद्धि का नाश या नीच कर्म में आसक्ति होती है। अतः सफेद घोड़ा या गाय का दान करना चाहिए। अथवा एक लाख, दस हजार या एक हजार ब्राह्मणों को यथाशक्ति भोजन करावें।

२१ रेखाओं वाले मास में रोग, उद्योग में हानि या कार्य का अभाव, पापात्मता या धनधान्य की हानि के कारण कष्ट होता है। अतः धान्य पर्वत का दान या श्रद्धापूर्वक ब्रह्मा जी की मूर्ति स्थापित करनी चाहिए।

२२ रेखाओं वाले मास में दुर्बलता, दरिद्रता, बन्धुओं से पीड़ा तथा कष्ट होता है। अतः प्रसूता गाय का दान करना चाहिए। अथवा दस महादान (पूर्वोक्त) करना चाहिए।

२३ रेखाओं से युक्त मास में मनुष्य को अनेक प्रकार के क्लेश होते हैं। अतः सात पल सोने की सूर्य-प्रतिमा दान करनी चाहिए। अशान्ति में ३½ पल या इसका आधा १ ¾ पल सोने की सूर्य की प्रतिमा देनी चाहिए।

२४ रेखाओं वाले मास में स्त्रियों के मोह में पड़कर कुस्त्री गमन होता है। यदि तब पापग्रह की दशा भी चल रही हो तो बन्धुओं से तिरस्कार, धन का नाश या स्थानभ्रंश होता है। अतः एक हजार या एक सौ या दस गायें दान में देनी चाहिएं। यदि पापग्रह की दशा हो, पूर्ण शान्ति तथा शुभग्रह की दशा न हो तो यथाशक्ति शान्ति करनी चाहिए।

२५ रेखाओं से युक्त मास में ग्रहजन्य अरिष्ट, वात रोग का प्रकोप या लम्बे समय तक चलने वाली मन्दाग्नि होती है। अतः ब्राह्मणों को भोजन व अन्न पानादिक से तृप्त करना चाहिए। साथ ही सूर्यादि ग्रहों को हवनादि से संतुष्ट करना चाहिए।

**युक्ते यदा मासि रसद्विसम्मितैः**
**स्याज्जाड्यमत्राप्यसकृत्प्रजल्पितम् ॥५०॥**

ना विस्मरेत्तत्क्षणकेऽतिचञ्चलः
सम्पूजनं तस्य च दोषशान्तये।
वाग्देवताया द्विजसत्तमैः सह
कुर्यात्तदा पायसशर्करादिभिः ॥५१॥
संहोमयेत्क्षौद्रयुतैर्विमुच्यते
दोषाभिधैर्जाड्यमुखैश्च संविदः।
नैर्मल्यमाप्नोतु भसम्मितैर्युते
मासे व्ययो भूरिधनस्य चिन्तया ॥५२॥
ग्रस्तः शरीरी मलिनश्चिदल्पः
श्रीसूक्तपूर्वस्य विधाननाम्ना।
सम्पत्प्रदा क्षीरसमुद्रजातां
देवीं महामां परिपूजयेत्ताम् ॥५३॥
कुर्याज्जयं होममुखं प्रसादतः
पद्मालयाया धनधान्यसंयुतः।
सम्पन्न आशीविषयुग्म संयुते
मासे न लाभोऽपचयो भवेत्तदा ॥५४॥
प्रयाति यत्नं विफलं जनुष्मतः
क्वचित्तदानीं द्रविणं न लभ्यते।
अतो विदध्याद्धवनं विभावसो-
र्जातो विमुक्तोऽखिलदोषतो नरः ॥५५॥

युक्त इति। नेति। संहोमयेति। ग्रस्त इति। कुर्यादिति। प्रयातीति च। रसद्विसम्मितैः षड्विंशतितुल्यैः फलैः युक्ते मासि यदा तदा, जाड्यं शीतलता, असकृद्वारं वारं, प्रजल्पितं कथितमपि तत्क्षणके सद्यो, विस्मरेत् तथाऽतिचंचलो भवेत्, तदा तस्य दोषशान्तये दोषपरिहाराय, वाग्देवताया वागीश्वर्याः सम्पूजनं कुर्यात्। तथा द्विजसत्तमैर्ब्राह्मणपुंगवैः सह क्षौद्रयुतैर्मधुयुतैः, पायसशर्करादिभिः सम्यग्होमयेत् जुहुयात्। तदा जाड्यमुखैः शैत्यप्रभृतिभिर्दोषाभिधैर्विमुच्यते। यतः संविदो बुद्धेर्नैर्मल्यमाप्नोतु लभताम्। तथा च जगन्मोहने—

'ऋतुपक्षैर्बुद्धिहीनः पूज्या वागीश्वरी तथा।' इति

भसम्मितैरिति। भसम्मितैः सप्तविंशति तुल्यैः फलैर्युक्ते मासि तदा, भूरिधनस्य बहुधनस्य, व्ययोऽपायः, चिन्तया स्मृत्या ग्रस्तः, मलिनो मलदूषितः, चिदल्पो

बुद्धिमन्दो भवेदिति शेषः। अतः श्रीसूक्तपूर्वस्य लक्ष्मीसूक्तादेर्विधान नाम्ना विधिना, सम्पत्प्रदां क्षीरसमुद्रजातां दुग्धसागरसमुद्भवां महामां महालक्ष्मीं परिपूजयेत्। जपं होममुखं हवनादि च कुर्यात्। तदा पद्मालयाया लक्ष्म्याः प्रसादतः प्रसन्नतया, धनैर्द्रविणैर्धान्यैः सस्यैः संयुतो युक्तः सम्पन्नश्च भवेदिति शेषः। तथा च जगमोहने—

'धनक्षयः स्यान्नक्षत्रैः श्रीसूक्तं तत्र संजपेत्।'' इति

आशीति। आशीविषयुग्म संयुतेऽष्टाविंशति युते मासे तदा लाभो न भवेदयचयो भवेत्। जनुष्मतो जनिमतो, यत्नं प्रयासं विफलं निष्फलं प्रयात्याप्नोति। तदानीं क्वचिद् द्रविणं धनं न लभ्यते न प्राप्यते। अतो विभावसोरवेः होमं हवनं होमं प्रकुर्यात्। यतो जानो नरोऽखिलदोषतः समस्तदोषतो विमुक्तो रहितो भवेदिति शेषः। तथा च जन्मोहने—

'वसुपक्षयुते मासे न लाभो हानिरेव च।
सूर्यहोमं च विधिना कर्त्तव्यं शुभकांक्षिभिः॥' इति

ग्रन्थान्तरे तु सत्फलमुक्तं तद्यथा—

अष्टाविंशतिभिरपि द्रव्यागमनं तथा सुखाधिक्यम्।' इति

२६ रेखाओं से युक्त मास में जड़ता, बार-बार याद करने पर भी भूल जाने की प्रवृत्ति तथा अति चंचल स्वभाव जैसे फल होते हैं। इस दोष के परिहार के लिए वागीश्वरी देवी की आराधना, पूजा आदि करनी चाहिए। साथ ही मधु (शहद) और शर्करा से मिश्रित द्रव्य पदार्थ से श्रेष्ठ ब्राह्मणों की उपस्थिति में हवन करना चाहिए। ऐसा करने से मनुष्य की बुद्धि जड़ता को छोड़कर निर्मलता को प्राप्त करती है।

२७ रेखाओं से युक्त मास में धन का अत्यधिक व्यय, चिन्ता से आतुर होना, मलिनता व बुद्धि की जड़ता जैसे फल होते हैं। इस स्थिति में श्रीसूक्तादि विधान से महालक्ष्मी का जप, पूजा व होम आदि करना चाहिए। ऐसा करने से व्यक्ति महालक्ष्मी के प्रसाद से धनधान्य व सम्पदा से युक्त हो जाता है।

२८ रेखाओं वाले मास में लाभ न होना, खर्च अधिक होना, परिश्रम की सफलता का अभाव तथा धन न मिलना जैसे फल होते हैं। अतः श्रीसूर्य के मंत्र से हवन करें। तब समस्त दोषों का परिहार होता है।

**मासेऽङ्कवैवस्वतसम्मितैः फलै-**
**र्युक्ते स्मृतिव्याकुलता भवेदतः।**

द्विजातये वेदविदे कुटुम्बिने
चामीकरं तस्य दलं ददातु किम् ।।५६।।
श्रीसूर्यतुष्ट्यै चिरमत्र जीवते
रोगैर्विमुक्तः सहितः सुतेजसा।
अश्रान्तमानन्दयुतः खलग्रह-
दशासमेते फलमेतदीर्यते ।।५७।।

मास इति। श्रीति च। अंकवैवस्वतसम्मितैरेकोनत्रिंशत्तुल्यैः फलै रेखाभिर्युक्ते सहितेमासे स्मृतिश्चिन्ता तया व्याकुलता भवेत्। अतः श्रीसूर्यतुष्ट्यै तोषाय, कुटुम्बिने स्त्रीपुत्रादियुक्ताय, वेदविदे वेदविज्ञाय, ब्राह्मणाय चामीकरं सुवर्णं किमु तस्य दलमर्धं ददातु। तेन रोगैर्विमुक्तः सुतेजसा सहितोऽश्रान्तं नित्यं, आनन्दो हर्षस्तेन युतः सहितः खलग्रहः पापग्रहस्तस्य, दशया समेते युक्ते मासि एतत्फलं उदीर्य्यते कथ्यते। दैवज्ञैरिति शेषः। तथा च जगन्मोहने—

एकोनत्रिंशता वापि चिन्तया व्याकुलो भवेत्।
घृतवस्त्रसुवर्णानि तत्र दद्याद् विचक्षणः ।।' इति

ग्रन्थान्तरे च—एकोनत्रिंशाद्भिर्लोके लोकस्तु पूज्यतामेति इति ।। इति

२९ रेखाओं से युक्त मास में मनुष्य चिन्ता से व्याकुल होता है। अतः श्री सूर्य भगवान् की प्रसन्नता के लिए सपरिवार वेदवेत्ता ब्राह्मण को सुवर्ण का दान करना चाहिए। अथवा सुवर्ण का आधा मूल्य प्रदान करना चाहिए। ऐसा करने से मनुष्य रोगों से मुक्त होकर तेजस्वी, सदा प्रसन्न रहने वाला और दीर्घायु होता है। उक्त अशुभ फल तभी कहना चाहिए जब मास में पापग्रह की दशा चल रही हो।

आशय यह है कि उक्त मास में यदि शुभ ग्रह की दशा चल रही हो तो अशुभ फल नहीं होगा। यद्यपि जगन्मोहन नामक ग्रन्थ में तथा गर्ग पराशर आदि महर्षियों ने अशुभ फल को ही रेखांकित किया है, किन्तु किसी अन्य ग्रन्थ के हवाले से ग्रन्थकार ने बताया है कि २९ रेखाओं वाले मास में व्यक्ति सम्मान पाता है। निष्कर्ष यह है कि अशुभ दशा में अशुभ फल तथा शुभ दशा में सम्मानादि शुभ फल कहना चाहिए।

विद्याद्बुधः सत्फलमभ्रपावक-
पूर्वैः फलेर्जातकनिर्णयस्त्वति।

**रेखाभिरभ्राग्निमिताभिरन्विते**
**व्यापारतो वित्तमवाप्नुयान्नरः ।।५८।।**

विद्यादिति । अभ्रपावकपूर्वैस्त्रिंशत्प्रभृति फलै रेखाभिः सत्फलं शुभफलं बुधः, पण्डितो विद्याद् जानीयात् । इत्येवं जातकानां जातकसम्बन्धिग्रन्थानां निर्णयो निश्चयो ज्ञेय इति शेषः । अभ्राग्निमिताभिस्त्रिंशत्तुल्याभी रेखाभिरन्विते युक्ते मासि, नरो मनुष्यो, व्यापारतो वित्तं धनमवाप्नुयाल्लभेत । तथा च जगन्मोहने—

त्रिंशता धनधान्याप्तिरिति जातक निर्णयः ।' इति

ग्रन्थान्तरेऽपि—

मानं सुकृतावाप्तिस्त्रिंशद्भिर्नास्ति कोऽपि सन्देहः ।
सौख्यं द्रव्यागमनं पुंसामेकाधिकाभी रेखाभिः ।।
रेखाधिक्ये शस्तं शून्याधिक्ये ततोऽधर्मं कथितम् ।।' इति

३० से अधिक रेखाओं वाले मास में शुभ फल होता है। ऐसा जातक शास्त्रों के आधार पर कहा जा रहा है।

३० रेखाओं वाले मास में व्यक्ति व्यापार में खूब धन प्राप्त करता है।

**युक्ते कुरामैर्द्रविणान्वितो महो-**
**द्योगोऽथमासे यमवह्निभिर्युते ।**
**देहोत्थसम्पद्दहनानलोन्मितै—**
**र्युक्ते महीपैरपि मान्यते भवी ।।५९।।**
**उद्योगसिद्धिः समवाप्नुयाद् धनं**
**व्यापारतोऽथोदधिरामसम्मिते ।**
**लाभः सुवर्णस्य तथांशुकस्य च**
**विद्यात्समज्ञां महतीं वृषान्वितः ।।६०।।**
**तीर्थस्य भक्त्या सहितोऽथपावकैः**
**श्रीमान्भवेत्षड्दहनोन्मितैर्युते ।**
**प्राप्तिं सुपुत्रस्य वदेन्नगानलै-**
**र्लाभोऽङ्गजाया गजपावकान्विते ।।६१।।**
**मासे मनुष्यः परिचिन्तितं फलं**
**प्राप्नोति मासेऽङ्कगुणोन्मितैर्युते ।**

द्रव्याणि रत्नानि समेति सम्भवः
शून्याब्धितुल्यैः सहिते यशोऽन्वितः ।।६२।।
युक्तो धनेनाथ धराब्धिसम्मिते ।
लाभं प्रभूतं जनितः प्रपद्यते ।।६३।।

युक्त इति । उद्योगपति । तीर्थस्येति । मास इति । युक्त इति च । कुरामैरेकत्रिंशत्तुल्यैः फलैर्युक्ते मासेतदा द्रविणेन धनेनान्वितो युक्तो महोद्योगो विशालोद्यमो भवेरिति शेषः ।

अथेति । यमवह्निभिर्द्वात्रिंशत्तुल्यैः कलैर्युते सहिते मासे तदादेहः शरीरं तस्मादुत्थोत्पन्ना सम्पत्ति पुत्र इत्यर्थः भवेदिति शेषः ।

दहनेति । दहनानलोन्मितैस्त्रयस्त्रिंशत्तुल्यैं, फलैर्युक्ते मासे तदा भवी जन्मी, महीपैं राजभिर्मान्यते पूज्यते, उद्योगो यत्नश्चेष्टेति यावत् । तस्यसिद्धिः प्राप्तिः, व्यापारतो धनं द्रव्यं समवाप्नुयाल्लभेत । तथा च गर्गपराशरादयः—

रामवह्नियुते मासे व्यापाराद् धनमाप्नुयात् ।
उद्योगसिद्धिश्च भवेन्मान्यते च नृपैरपि ।।' इति

जगन्मोहनेत्वेत्फलं नोक्तं तदित्थम्—

'पुत्रसम्पद् गुणाग्निभिः' इति । चिन्त्यमेतत् ।

अथेति । अथेत्यानन्तर्ये । उदधिरामसम्मिते चतुस्त्रिंशत्तुल्ये मासे तदा सुवर्णस्य अंशुकस्य वस्त्रस्य लाभो वाच्येति शेपः । महतीं समज्ञां कीर्तिं विद्याज्जानीयात् । ततो वृषेण धर्मेणान्वितो युवतः । तीर्थस्य पुण्यस्थलस्य भक्त्या सहितो युक्तः स्यादिति शेपः । तथा च जगन्मोहने—

सहेमवस्त्रलाभश्च चतुस्त्रिंशत्समन्विते ।' इति

अक्षेति । अक्षपावकैः पंचत्रिंशत्तुल्यैः फलैर्युक्ते मासे तदा श्रीमान् लक्ष्मीवान् भवेदिति शेषः ।

षडिति । षड्दहनोन्मितैः षट्त्रिंशत्तुल्यैः फलैर्युक्ते मासि सुष्ठु शोभनः पुत्र स्तनयस्तस्य प्राप्ति लाभं वदेत्कथयेद्दैवज्ञ इति शेषः ।

नगेति । नगानलैः सप्तत्रिंशत्तुल्यैः फलैर्युक्ते मासे तदाऽङ्गजायाः कन्याया लाभः प्राप्तिर्वाच्येति शेषः । इह जगन्मोहने तु धनाप्तिरुक्ता सा च यथा—

'सप्तत्रिंशद्धनस्याप्तिः·······।' इति

गजेति । गजपावकान्वितेऽष्टत्रिंशत्तुल्यैः फलैर्युक्ते मासि मनुष्यः तदा परिचिन्तितं मनोवाञ्छितं फलं प्राप्नोति ।

मास इति । अंकगुणोन्मितैरेकोनचत्वारिंशत्तुल्यैः फलैर्युते मासे तदासम्भवो नरः द्रव्याणि धनानि, रत्नानि समेति प्राप्नोति ।

शून्येति। शून्याब्धितुल्यैश्चत्वारिंशत्तुल्यैः फलैः सहिते मासे, यशसा कीर्त्यान्वितो युक्तो धनेन युक्तश्च भवेदिति शेषः तथा च जगन्मोहने—

धनवान् कीर्तिमांश्चैव चत्वारिंशति वर्धते।
अत उर्ध्वं यशोऽर्थाप्तिः पुण्यश्रीरुपचीयते॥' इति

अथेति। अथेत्यानन्तर्ये। धराब्धिसम्मिते एकचत्वारिंशत्तुल्ये मासे तदा जनितो जातः प्रभूतं विविधं लाभं प्राप्तिं प्रपद्यते प्राप्नोति। गर्गपराशरादयोऽपि—

'भूवेदबिन्दुसंयुक्ते नानालाभं प्रपद्यते।' इति

३१ रेखाओं से युक्त मास में धन का लाभ होता है तथा व्यक्ति बड़े प्रयत्न सापेक्ष कार्य करता है।

३२ रेखाओं से युक्त मास में पुत्र सम्पत्ति का लाभ होता है।

३३ रेखाओं वाले मास में राजा से सम्मान, प्रयत्न में सफलता तथा व्यापार में धन लाभ होता है।

३४ रेखा युक्त मास में सोने व वस्त्र का लाभ होता है। व्यक्ति विपुल ख्याति अर्जित करता है तथा पुण्य से युक्त होकर तीर्थों की यात्राएं करता है।

३५ रेखाओं वाले मास में मनुष्य की शोभा बढ़ती है।

३६ रेखाओं से युक्त मास में उत्तम पुत्र की प्राप्ति होती है।

३७ रेखाओं वाले महीने में कन्या सन्तान की प्राप्ति होती है।

३८ रेखाओं वाले मास में मनोवांच्छित फल की प्राप्ति होती है।

३९ रेखाओं से युक्त मास में धन तथा रत्नों की प्राप्ति व ४० रेखाओं वाले मास में बहुत से धन की प्राप्ति होती है तथा अन्य अनेक प्रकार के लाभों को प्राप्त करता है। ४१ रेखा वाले मास में बहुत धन की प्राप्ति होती है।

**समन्विते मासि यमागमप्रमैः**
**श्रीमानुदारो बहुलोकसेवितः।**
**आर्त्तो महाभोगयुतो महाधनो**
**ना मेदिनीमण्डलसंस्थितो भवेत्॥६४॥**

समन्वित इति। यमागमप्रमैर्द्विचत्वारिंशत्तुल्यैः फलैः समन्विते युक्ते मासि तदा, जातः समुत्पन्नो ना मनुष्यः श्रीः (शोभा) अस्ति अस्य श्रीमान् शोभावानित्यर्थः। उदारो दाता, बहुभिः प्रचुरैर्लोकैर्जनैः सेवित आश्रितः महाभोगा विपुल

भोगास्तैर्युतः महद् धनं अस्य महाधनः। मेदिन्याः पृथिव्या मण्डलं तस्मिन् संस्थित आश्रितो भवेत्। तथा च गर्गपराशरादयः—

'पक्षवेदैः पुनः श्रीमानुदारो वहुसेवितः।
महाधनो महाभोगो महीमण्डलसंस्थितः॥' इति

४२ रेखाओं से युक्त मास में मनुष्य समस्त भूमण्डल में शोभायमान होता है। वह बड़ा दानी, बहुत से लोगों का सहारा, वहुत से भोगों को भोगने वाला और बड़ा धनवान् होता है।

**मास्यग्निपाथोधियुते समन्ततः**
**सम्पत्सुखं सागरसागरप्रमैः॥६५॥**
**स्थानैर्युते मासि धराधिनायक-**
**मान्यः समीरोदधि सम्मितैः फलैः।**
**युक्ते धनी ज्ञानयुतः स्वयं पर-**
**मात्मा मनुष्यो वृषसागरान्वितः॥६६॥**

मासीति। स्थानैरिति च। अग्निपाथोधियुते त्रिचत्वारिंशत्सहिते मासि तदा समन्ततः सर्वतः सम्पद् विभवं, सुखं स्यादिति शेषः।

सागरेति। सागर सागरप्रमैश्चतुश्चत्वारिंशत्तुल्यैः स्थानैः फलैर्युतं मासि तदा धरा तस्याधिनायकः स्वामी तस्य मान्यः पूज्यः राजपूज्य इत्यर्थः।

समीरेति। समीरोदधिसम्मितैः पंचचत्वरिंशत्तुल्यैः फलैः रेखाभिर्युक्ते मासे तदा मनुष्यो धनी धनवान्, ज्ञानयुतो वृषसागरान्वित, पुण्यसमुद्रयुतोऽतीव पुण्यात्मेत्यर्थः। स्वयमात्मना परमात्मा परब्रह्म भवेदिति शेषः। तथा च गर्गपराशरादयः—

'पंचवेदमिते मासे ज्ञानवान् धनिको भवेत्।
पुण्यसागरसंयुक्तः परमात्मा स्वयं भवेत्॥' इति

४३ रेखाओं से युक्त मास में सब ओर से सम्पत्ति का लाभ तथा सुख मिलता है। ४४ रेखाओं से युक्त मास में व्यक्ति राज सम्मान को पाता है।

४५ रेखाओं से युक्त मास में व्यक्ति को धन तथा सम्मान की प्राप्ति, बहुत से पुण्यफलों का लाभ तथा ब्रह्म तुलयत्व प्राप्त होता है।

**मास्यङ्गपाथोधिमितैर्युते शुभं**
**समन्ततः सप्तसमुद्रसंयुते।**

**अनुत्तमैः सर्वगुणैः समन्वितो**
**मासीभवेदैः सहिते दयापरः ।।६७।।**
**सर्वेषु जीवेषु सराजलक्षणः**
**श्रीपुण्यवृद्धिः सुकृताध्वगामिनाम् ।**
**मध्ये धनिज्ञानवतां सुशोभन-**
**स्तारान्तराले रजनीश्चरो यथा ।।६८।।**

मासीति । सर्वेष्विति च । अंगपाथोधिमितैः षट्चत्वारिंशत्तुल्यैः फलैर्युक्ते मासि समन्ततः शुभं स्यादिति । सप्तेति । सप्तसमुद्रयुते सप्तचत्वारिंशद्युते मासे तदा अनुत्तमैः श्रेष्ठैः सर्वगुणैः समगुणैः समन्वितो युक्तः स्यादिति ।

मासीति । इभवेदैरष्टचत्वारिंशत्तुल्यैः फलैः सहिते युक्ते मासि सर्वेषु सम्पूर्णेषु जीवेषु प्राणिषु दयापरो दयालुः राज्ञां यानि लक्षणानि चिह्नानि तैः सहितः, श्रीः शोभा पुण्यं धर्मस्तयोर्वृद्धिः, सुकृतं पुण्यं तस्याध्वा मार्गस्तद्गामिन-स्तेषां यथा तारान्तरा तारागणानां मध्ये रजनीचरश्चन्द्रः तथा धनिनो वित्तवन्तो ज्ञानिनस्तेषां मध्ये सुशोभनो भवेदिति शेषः ।

४६ रेखाओं से युक्त मास में मनुष्य सब ओर से कल्याण पाता है।

४७ रेखाओं से युक्त मास में मनुष्य समस्त गुणों से युक्त होता है।

४८ रेखाओं वाले मास में सब जीवों पर दया करने वाला, राजोचित लक्षणों से युक्त, शोभावान् धर्म में रति वाला पुण्यात्मा, धनी तथा ज्ञानियों के बीच में उसी प्रकार शोभा प्राप्त करता है जैसे तारागण के मध्य चन्द्रमा सुशोभित होता है।

**रेखाओं से दिनफल का ज्ञान :**

**कुर्यादिष्टदिने समाम्बरसदामैक्यं कलानां ततः**
**शस्ताशस्तफलं वदेद्वसुयमैस्तुल्ये कलैक्ये फलम् ।**
**मध्यं स्यादधिके शुभं त्वथ कृशेऽसत्स्यात्कलानां युति-**
**र्घस्रे यत्र मनून्मिता यदि तदा पुंसां त्रिवर्गक्षतिः ।।६९।।**

कुर्यादिति । इष्टदिनेऽभीष्टदिवसे समाम्बरसदां सर्वग्रहाणां कलानां रेखाणामैक्यं योगं कुर्यात् । ततस्तस्माद्रेखायोगाद् शस्ताशस्तफलं शुभाशुभफलं वदेत् । यदा कलैक्ये वसुयमैस्तुल्येऽष्टाविंशतितुल्ये सति तदा मध्यं समानं फलं ज्ञेयमिति ।

अधिकेऽष्टाविंशत्याधिके शुभं स्यात् । अथ कृशेत्वल्पेऽल्पदशुभं फलं स्यात् । यत्र यस्मिन् धस्त्रे दिने कलानां रेखाणां युतिर्मनून्मिता चतुर्दशतुल्या यदि स्यात्तदा पुंसां पुरुषाणां त्रिवर्गाणां धर्मार्थकामानां क्षतिः स्यात् । तथा च ब्रह्मयामले—

सर्वग्रहाणां रेखैक्यं कुर्यादिष्ट दिने ततः ।
अष्टविंशे फलं मध्यमधिकोने शुभाशुभम् ॥
फलं शुभाशुभं ब्रूयात्तत्प्रकारोऽभिधीयते ।
सर्वग्रहाणां रेखैक्यं शक्रतुल्यं भवेद्यदा ॥' इति

जन्मकालीन ग्रहों का भिन्नाष्टक वर्गादि बनाकर तैयार कर लेना चाहिए । तदनन्तर जिस दिन का फल जानना अभीष्ट हो, उस दिन ग्रहों की गोचर राशि के रेखांकों को (मास की तरह) युक्त कर लेना चाहिए ।

यदि उक्त रेखा योग, अभीष्ट दिन में २८ हो तो मध्यम फल तथा २८ से अधिक हो तो शुभ फल होता है ।

२८ से कम रेखाएं होने पर अशुभ फल तथा १४ से कम रेखाएं होने पर धर्म, धन व सुखोपभोगादि (त्रिवर्ग) की हानि होती है । यह विषय पहले मास फल जानने के प्रसंग में सोदाहरण समझाया जा चुका है ।

**महापदो मारुतरूपसम्मिते**
**नृपप्रमे भूपभयं घनोन्मिते ।**
**क्षयः पुराणप्रमितेऽर्थसंक्षयो**
**विहङ्गमोर्वीप्रमिते कुशेमुषी ॥७०॥**
**स्याद्बान्धवार्त्तिर्नखरोन्मिते कलि-**
**र्ज्ञेयो व्ययः स्वर्गमिते हृदि व्यथा ।**
**नासत्यनासत्यमिते पराभवो**
**दैन्यं तथा निष्फलता तदोदिता ॥७१॥**

महापद इति । स्यादिति च । मारुत रूपसम्मिते पंचदशतुल्ये फलैक्ये दिने महत्यो विपुला आपदो विपत्तयः स्युरिति । नृपप्रमे षोडश तुल्ये फलैक्ये दिवसे भूपो राजा तस्माद् भयं दरं स्यात् । घनोन्मिते सप्तदशतुल्ये फलैक्ये तदा क्षयो नाशः स्यात् । पुराणमितेऽष्टादशतुल्ये फलैक्ये दिनेऽर्थस्य धनस्य संक्षयो नाशः स्यात् । विहंगमोर्वीप्रमिति एकोनविंशतितुल्ये फलैक्ये दिने कुशेमुषी निन्दितबुद्धि

बान्धवेषु पीडा स्यात्। नखरोन्मिते विंशतितुल्ये फलैक्ये दिने कलिः कलहो व्ययोऽपायो ज्ञेयः स्मृतः। स्वर्गमिति एकविंशतितुल्ये फलैक्ये दिने हृदि मनसि व्यथा पीडा स्यात्। नासत्यनासत्यमिते द्वाविंशतितुल्ये दिने पराभवस्तिरस्कारः दैन्य दीनता निर्धनतेति यावत्। निष्फलता विफलता उदिता कथिता। तथा च ब्रह्मयामले—

'···············तिथितुल्ये महापदः।
भूपतुल्ये भूपभयं नाशः सप्तदशे स्मृतः॥
अष्टादशे तु रेखैक्ये धनहानिश्च जायते।
कुमतिबन्धुपीडा स्यात्तदा चैकोनविंशतौ॥
रेखैक्ये नखतुल्ये तु व्ययश्च कलहः स्मृतः।
एकविंशति संख्यैक्ये हृदिदुःखं प्रजायते॥
पराभवस्त्वफलता दैन्यं चाकृति संख्यके॥' इति

जिस दिन का रेखायोग १५ हो उस दिन बड़ी विपत्ति का सामना करना पड़ता है।

१६ रेखाओं से युक्त दिन में राजा से भय होता है। १७ रेखा वाले दिन में नाश, १८ रेखा युक्त दिन में धन की हानि, १९ रेखा युक्त दिन में दुर्बुद्धि, २० रेखा युक्त दिन में कलहागम तथा व्यय, २१ रेखाओं से युक्त दिन में हृदय में दुःख तथा २२ रेखाओं वाले दिन में अपमान, विफलता व दरिद्रता होती है।

**ग्रामाक्षितुल्ये धनधर्म्मनाशन-**
**मर्हत्समाने सहसा धनक्षतिः।**
**हानिः करस्थस्य धनस्य मारुत-**
**नासत्यतुल्येऽङ्गयमोन्मिते कलिः॥७२॥**

ग्रामेति। ग्रामाक्षितुल्ये त्रयोविंशतितुल्ये रेखैक्ये दिने धनं, धर्मः तयोर्नाशनं क्षयः स्यादिति। अर्हत्समाने चतुर्विंशतितुल्ये फलैक्ये दिने सहसा धनस्य द्रव्यस्य क्षतिः स्यात्। मारुतनासत्यतुल्ये पंचविंशति तुल्ये फलैक्ये दिने करस्थस्य हस्तगतस्य धनस्य हानिः; अंगयमोन्मिते षड्विंशतितुल्ये दिने कलिः कलहः स्यात्। तथा च ब्रह्मयामले—

'त्रयोविंशतिमिते प्रोक्ता हानिर्धर्मार्थयोरपि।
अकस्माद्धनहानिः स्याच्चतुर्विंशन्मिते तथा॥
करस्थस्यापि द्रव्यस्य हानिः स्यात् पंचविंशके।
षड्विंशके तु कलहः······॥ इति

सम्मितैश्चतुस्त्रितुल्यैः फलैः सहिते दिवसे सम्पूर्णा सम्पत्सम्पत्तिः कथितोक्ता । अत उर्ध्वमेकवृद्धया सर्वेपामर्थानां सिद्धिः प्राप्तिर्वाच्येति शेषः । एवं रससायकान्तं षट्पंचाशदन्तमष्टक वर्ग जातं फलं वदेत् । अनेन विधिना पुंसां पुरुषाणां वासरजं दिन जनितं शुभाशुभं फलाख्यं विचक्षणैः विचार्यं विचिन्त्यम् । दायफलस्य दशाफलस्य अह्नोदिनस्य फलस्य च वोधाय यामलनामशास्त्राद् ब्रह्मयामलग्रन्थान्मया महाष्टवर्गउदितः कथितः । तथा च ब्रह्मयामले—

'......................समता धिष्ण्यसंख्यके ।
पिण्डे द्रव्यागमश्चैकोनत्रिंशे जनपूजितः ।।
त्रिशन् मिते राजपूजा सुकृतं सुखसंयुतम् ।
एकत्रिशन्मिते द्रव्यं सन्मानं च विशेषतः ।
दन्ततुल्यैः सर्वसिद्धिर्महालाभोऽमरैः समैः ।।
चतुरधिकत्रिशद्भी रेखाभिरभिसंमता ।
सर्वसम्पत्सिद्धिश्च सर्वार्थानामेकाभिवृद्धितो ज्ञेया ।
रसशररेखा यावत्फलयुक्तं त्वष्ट वर्गजं मुनिभिः ।।
दिनजं फलं विचार्यं त्वनेन विधिना शुभाशुभं पुंसाम् ।
दशाफलस्य ज्ञानाय तथादिनफलस्य च ।
प्रोक्तो महाष्टकोवर्गः शास्त्राच्च ब्रह्मयामलात् ।। इति

जिस दिन २७ रेखाएं हों तो उस दिन मध्यम फल अर्थात् शुभा-शुभ मिश्रित फल होता है ।

२८ रेखाओं वाले दिन में धन का लाभ, २९ रेखा वाले दिन में लोगों से सम्मान, ३० रेखा वाले दिन में राजा से सम्मान, सुख व धर्म लाभ होता है ।

३१ रेखाओं वाले दिन में सब कार्य सिद्ध होते हैं ।

३२ रेखाओं वाले दिन में सब कार्य सिद्ध होते हैं ।

३३ रेखाओं वाले दिन में खूब लाभ, ३४ रेखा वाले दिन में समस्त सम्पत्तियों का लाभ होता है ।

३४ से आगे ५६ रेखाओं तक उत्तरोत्तर धनवृद्धि का फल मिलता है । इस प्रकार मनुष्यों के दैनिक शुभ व अशुभ फल का विचार करना चाहिए । मैंने (ग्रन्थकार ने) यह फल **ब्रह्मयामल** नामक शास्त्र के आधार पर बताया है ।

**विवाहादि कृत्यों मेंअष्टक वर्ग का उपयोग :**

**अन्वेष्यं ग्रहगोचरं हि ताव-**
**द्यावन्नाष्टकमाप्यते ग्रहाणाम् ।**
**सम्प्राप्तेऽष्टगणे यदा नराणां**
**गोचारं विफलं भवेत्तदानीम् ॥७७॥**

अन्वेष्यमिति। नराणां मनुष्याणां ग्रहाणां जन्मकालीनग्रहाणां यावदष्टकमष्टवर्गो नाप्यते न लभ्यते तावद्ग्रहोचरमन्वेष्यं द्रष्टव्यम्। यदाष्टगणेऽष्टवर्गे सम्प्राप्ते तदानीं गोचरं ग्रहगोचरं विफलं भवेत्। तथा च श्रीवराहः—

विफलं गोचरगणितं स्वष्टकवर्गेण निर्दिशेत्पुंसाम्।
रेखाधिक्ये शुभदं विन्द्वधिके नैव शोभनं प्रायः॥ इति

विवाह, यज्ञोपवीत, विद्यारम्भ, गृहनिर्माणादि शुभ कार्यों में भी अष्टक वर्ग का विचार करना चाहिए। जब तक अष्टक वर्ग शुद्धि प्राप्त न हो अर्थात् अष्टक वर्ग के आधार पर अनुकूल समय न आए तब तक गोचर से ही शुभाशुभ फल का विचार करना चाहिए; किन्तु अष्टक वर्ग के अनुसार अनुकूल समय होने पर गोचर की प्रामाणिकता इन कार्यों में नहीं देखनी चाहिए। अर्थात् तब गोचर जनित फल को निर्णायक न मानकर अष्टक वर्ग जनित फल का ही अधिकार मानना चाहिए।

**शुभकृत्यों में अष्टक वर्ग शुद्धि अनिवार्य :**

**सूक्ष्मा शुद्धिर्याष्टवर्गोद्भवा सा**
**स्थूला शुद्धिर्गोचरोत्था प्रदिष्टा।**
**तस्मादादावष्टवर्गस्य शुद्धि-**
**श्चिन्त्या नृणां दोर्ग्रहे मौञ्जिबन्धे ॥७८॥**

सूक्ष्मेति। या अष्टवर्गोद्भवा अष्टकवर्गजनिता शुद्धिः पंचाधिकरेखायुक्तरूपा सा सूक्ष्मा कृशा प्रदिष्टा कथिता। या गोचरोत्था गोचरजनिता शुद्धिर्जन्मराशितो विचतुर्थाष्टमव्ययगतरविगुरुचन्द्र रूपा सा स्थूला प्रदिष्टाकथिता बुधैरिति शेषः। तस्माद्धेतोर्नृणां मनुष्यांणा दोर्ग्रहे पाणिग्रहणे मौञ्जिबन्धने उपनयने आदौ प्रागष्टवर्गस्य शुद्धिः चिन्त्या विचारणीया। तथा च राजमार्त्तण्डे—

'सूक्ष्माष्टवर्गसंशुद्धिः स्थूला शुद्धिस्तु गोचरे।' इति

मुहूर्तगणपतावपि—

'स्वाष्टवर्गे यदा खेटोऽधिकरेखस्तु राशितः।
तदा गोचरदुष्टोऽपि श्रेष्ठो नाल्पकरेखिकः ॥' इति

श्रीमरीचिरपि—

आदावष्टकवर्गः शोध्यो विज्ञैस्तदप्राप्तौ।
गोचरबलं विचिन्त्यं तदभावे वामवेधजं वीर्यम् ॥' इति

मनुष्यों के विवाह व्रत बन्धादि शुभ कृत्यों में अष्टक वर्ग की शुद्धि सूक्ष्म होती है। इसके विपरीत गोचर शुद्धि तदपेक्षया स्थूल ही मानी जाएगी।

इस विषय में ग्रन्थकार ने **राजमार्तण्ड, ज्योतिः सार, मुहूर्त्त-गणपति योगयात्रा, संहिता सार व मरीचिकृत** ग्रन्थ का हवाला दिया है। ये सब उक्त मत से सहमत हैं।

**आदित्येन्दुसुरेशपूजितेषु**
**शुद्धेष्वष्टगणेषु दोर्ग्रहादि।**
**कर्त्तव्यं न कदापि गोचराख्ये**
**प्राचीनैरिति कीर्त्तितं मुनीन्द्रैः ॥७६॥**

आदित्येति। अष्टगणेषु आदित्यः सूर्यः, इन्दुश्चन्द्रः, सुरेशपूजितोगुरुस्तेषु शुद्धेषु पंचाधिकरेखायुक्तेषु दोर्ग्रहादि विवाहादि सत्कर्मेति यावत् कर्त्तव्यं करणीयं, गोचराख्ये गोचरशुद्धौ चतुर्थाष्टमद्वादशशुद्धौ तु कदापि दोर्ग्रहादि न कर्त्तव्यम्। इति प्राचीनैः मुनीन्द्रैः कीर्तितं कथितम्। तथा च राजमार्त्तण्डे—

अष्टवर्गविशुद्धेषु गुरुशीतांशुभानुषु।
व्रतोद्वाहौ च कर्त्तव्यौ गोचरे न कदाचन ॥'

विवाहवृन्दावने तु गोचरशुद्धिरेव मुख्योक्ता, सा च—

'योषितां गुरुपतंगगोचरैः शोभनो निगदितः करग्रहे।
अष्टवर्गविधिना तदव्यये सूर्य शुद्धिरपरे नृणां जगुः ॥
यथोदये चन्द्रमसः प्रकाशो, दिगंगनानां मुखकैरवस्य।
तथाष्टवर्गे ग्रहलग्नशुद्धौ कार्यस्य पुंसां भवतीह शुद्धिः ॥
अभावतो गोचर शोभनानां शुद्धि वदेद्भागुरिरष्टवर्गात्।
वैधव्यकन्याक्षयः हेतुयोगो जीवोऽष्टवर्गस्य वदेन्न शुद्धिम् ॥' इति

**सूर्य, चन्द्र तथा गुरु की शुद्धि विवाहादि कृत्यों में देखनी परमावश्यक मानी गई है। किन्तु जब ये अष्ट वर्ग से शुद्ध हों अर्थात्**

पांच रेखाओं से अधिक रेखाओं वाली राशि में स्थित हों तब विवाहादि कृत्य करना शुभ होता है । सूर्यादि की केवल गोचर शुद्धि में विवाहादि कार्य करना ठीक नहीं है । यह प्राचीन महर्षियों का कथन है ।

अभी तक भिन्नाष्टक व समुदायाष्टक द्वारा गोचर फल जानने के विषय में विस्तार से बताया गया है। किन्तु प्रस्ताराष्टक वर्ग का निर्माण भी इस प्रक्रिया का आवश्यक अंग है। चक्र निर्माण व रेखा विन्दुओं का न्यास पूर्वोक्त प्रकार से होता है। प्रस्ताराष्टक वर्ग में ९६ कोष्ठक बनाकर ग्रहाधिष्ठित राशि से रेखाओं का न्यास किया जाता है। समुदायाष्टक वर्ग के प्रसंग में पीछे दिए गए चक्र यथावत् यहां भी काम आ जाएंगे। केवल रेखास्थापन में भेद होगा। साथ ही त्रिकोण शोधन व एकाधिपत्य शोधन तथा पिण्ड निर्माण भी आवश्यक है। इसी विषय में ग्रन्थकार आगे बता रहे हैं ।

**प्रस्ताराष्टक चक्र का निर्माण :**

**आलिख्याङ्कमिताश्च पूर्वरेखा**
**याम्योदक्प्रगता दश त्रिरेखाः।**
**प्रस्तारं रसनन्दतुल्यकोष्ठं**
**पंक्तिभोन्मितमष्टवर्गजातम् ॥८०॥**

आलिख्येति । अर्कमिता नवतुल्याः पूर्वरेखाः पूर्वस्यां दिशिरेखाः कला आलिख्य, तथा दशत्रिरेखा त्रयोदशरेखा याम्योदक्प्रगता आलिख्य इति रसनन्दतुल्यकोष्ठं षण्णवतितुल्यकोष्ठं प्रस्तारं पंक्तीभोन्मितं पंक्त्यष्टकमष्टकवर्गजातं चक्रमिति शेषः ।

नौ रेखाएं पड़ी व तेरह रेखाएं खड़ी खींचें। इस प्रकार ९६ कोष्ठकों का प्रस्तार चक्र बन जाता है ।

इस कोष्ठकों में ग्रह स्थापना राशि नाम व योगादि के लिए प्रयुक्त होने वाले कोष्ठकों का ग्रहण नहीं है। सरल शब्दों में कहें तो पीछे बताए गए भिन्न या समुदायाष्टक वर्ग के चक्र के समान कोष्ठकों वाला चक्र यहां भी बना लेना चाहिए। इस चक्र में जिस राशि में ग्रह अधिष्ठित हो, उसी राशि से राशियों की स्थापना क्रमशः की जाएगी। ग्रहों की स्थापना का क्रम कक्ष्यानुसार (शनि, गुरु, मंगल, सूर्य, शुक्र,

बुध, चन्द्र व लग्न होगा। शेष ग्रहों को भी अपनी-अपनी अधिष्ठित राशि के कोष्ठक में स्थापित किया जाएगा। प्रस्तार से तात्पर्य होता है विस्तार अर्थात् भिन्नाष्टक का विस्तृत उपबृंहित रूप। रेखाओं की स्थापना पूर्वोक्त प्रकार से ही की जाएगी।

इस विषय को अपने पूर्वोक्त उदाहरण के संदर्भ में समझते हैं। भिन्नाष्टक वर्ग के प्रकरण में हम सूर्य का भिन्नाष्टक वर्ग प्रदर्शित कर चुके हैं। अब हमने एक चक्र बना रखा है तथा साथ ही पूर्वोक्त भिन्नाष्टक (सूर्य) को भी सामने रखे हुए हैं। अब हमें सूर्य का प्रस्ताराष्टक बनाना है। सूर्य कन्या राशि में स्थित है। अत: कन्या, तुला आदि क्रम से राशियों को स्थापित किया। ग्रहों को कक्ष्याक्रम से स्थापित कर लिया। भिन्नाष्टक वर्ग में कन्या में जहां जहां रेखाएं थीं, तदनुसार यहां भी रेखाएं स्थापित कर लीं। भिन्नाष्टक में रेखा योग निम्नोक्त प्रकार से है तथा प्रस्तार में केवल उसका क्रम ही परिवर्तित होगा। हमने देखा कि सूर्य के प्रस्ताराष्टक में भिन्नाष्टक की तरह ही कन्या-६, तुला-४, वृश्चिक-३, धनु-४, मकर-४, कुम्भ-३, मीन-७, मेष-४, वृष-२, मिथुन-६, कर्क-४ व सिंह-१ रेखाएं प्राप्त हुई हैं।

आशय यही है कि भिन्नाष्टक वर्ग की रेखाओं को सूर्य के प्रस्तार में उसकी अधिष्ठित राशि से, चन्द्रमा के प्रस्तार में चन्द्राधिष्ठित राशि से अर्थात् सब ग्रहों की अपनी अपनी अधिष्ठित राशि से प्रारम्भ कर सब रेखाओं व योग को यथावत् रख लेंगे। भिन्नाष्टक व प्रस्ताराष्टक में केवल राशि क्रम का भेद है, अन्यथा सब रेखाएं आदि भिन्नाष्टक की तरह ही होती है।

**त्रिकोण शोधन का प्रकार :**

**क्षिप्तेष्विहाष्टद्युचरेषु राशि-**
**चक्रे यथामार्गमथो विदध्यात्।**
**आदौ त्रिकोणस्य विशोधनाख्यं**
**सर्वेषु राशिष्वनिशं सुधीन्द्रः ॥८१॥**

क्षिप्तेष्विति। राशिचक्रे पूर्वप्रस्तारित चक्रे यथा मार्गमष्टद्युचरेषु सलग्नेषु रव्यादिसप्तग्रहेषु क्षिप्तेषु स्थापितेषु सत्सु। अथो आदौ प्राग् अनिशं नित्यं सर्वेषु राशिषु मेषादिषु द्वादशसु सुधीन्द्रः पण्डितेन्द्रः त्रिकोणस्य मेषसिंहधनूरूपस्य विशोधनाख्यं संशोधनं विदध्यात् कुर्यात्। तथा च देशशाल जातके—

राशिचक्रे यथामार्गं क्षिप्तेष्वष्टग्रहेषु च।
त्रिकोणशोधनं कुर्यादादौ सर्वेषु राशिषु॥ इति

इस प्रकार प्रस्तारित चक्र में लग्न सहित आठों वर्गाधिपों को स्थापित कर ग्रहाधिष्ठित राशि क्रम से रेखाओं को स्थापित करके रेखायोग कर लिख लेना चाहिए (देखिए श्लोक ७७ व्याख्या)। तदनन्तर राशियों के रेखायोग का विद्वान् ज्योतिषी को त्रिकोण शोधन करना चाहिए।

त्रिकोण से तात्पर्य १, ५, ६, राशियों से है। प्रत्येक राशि से पांचवीं व नवीं राशि त्रिकोण होती है। जैसे मेष राशि से पांचवीं सिंह राशि व नवीं धनु राशि त्रिकोण हुई। मेष, सिंह व धनु तीनों त्रिकोण राशियां हैं। इसी प्रकार वृष, कन्या व मकर तीनों त्रिकोण हैं। मिथुन, तुला व कुम्भ एवं कर्क, वृश्चिक, मीन परस्पर त्रिकोण राशियां हैं। इनका शोधन करने का प्रकार आगे श्लोकों में बताया जा रहा है।

**कोदण्डमेषहरयो मृगगोकुमार्य्यः**
**कर्काटकाल्यनिमिषा घटतौलियुग्माः।**
**ते स्युः परस्परमिह क्रमतस्त्रिकोणा-**
**स्त्रिष्वेषु शोधयतु तत्सममल्पकं यत् ॥८२॥**
**शून्यं यदेकभवने बुध, तत्त्रिकोणं**
**नो शोधयाखिलगृहेषु यदा समानम्।**
**सर्वं विशोधय विशोध्यमिति त्रिकोण-**
**मेकाधिपस्य भवनद्वयकस्य पश्चात् ॥८३॥**

कोदण्डेति। शून्यमिति। सूर इति। संस्थापयेति। साम्यमिति। भयोरिति। सिंहस्येति च। कोदण्डं धनुः, मेषः, हरिः सिंहः, एते मृगोमकरः गौर्वृषः कुमारी-कन्या, एते, कर्काटकः, कर्कः, अलिर्वृश्चिकः अनिमिषो मीनः एते घटः कुम्भः, तौली तुला, युग्मो मिथुनः, एते राशयः क्रमतः परस्परमन्योन्यंत्रिकोणा स्युरिति।

एष्विति। एषु पूर्वोक्तेषु त्रिषु राशिमध्येषु यदल्पं तस्य समं तुल्यं शोधयतु। यदा एकभवने एकराशौ शून्यं खं फलं रेखाभाव इत्यर्थः तदाहेबुध। तेषां राशीनां त्रिकोणं न शोधय मा त्यज। यदाखिलगृहेषु समानं तुल्यं फलं भवति तदा सर्वं समस्तं फलं विशोधय। इति त्रिकोणराशीनां मिथः शोध्यम्। तथा च देवशालजातके—

मंत्रेश्वरेण तु किंचिद् विशेषमुक्तम्—'भवनद्वयशून्ये सति तदाऽन्य-मन्दिरं सफलभवनं शोधयेत्। अर्थात्तस्य सफलभवनस्याधोऽपि शून्यं निवेशयेत्।

त्रिकोणेषु च यन्न्यूनं तत्तुल्यं त्रिषु शोधयेत्।
एकस्मिन् भवने शून्यं तत्त्रिकोणं न शोधयेत्।।
समत्वं त्रिषु गेहेषु सर्वं संशोधयेद् बुधः।।' इति

मेष, सिंह व धनु परस्पर त्रिकोण राशियां हैं। वृष, कन्या व मकर; मिथुन, तुला व कुम्भ; कर्क वृश्चिक, मीन; परस्पर त्रिकोण राशियां हैं।

इन त्रिकोण राशियों में जिस राशि का रेखायोग सबसे कम हो, उस योग को शेष दोनों अधिक फल वाली राशियों के योग में से घटा लेना चाहिए।

अब जो शेष बचे वह संख्या अधिक फल वाली दोनों राशियों के नीचे लिखें तथा जिस राशि का योग कम था उसके नीचे शून्य स्थापित कर लेना चाहिए।

यदि त्रिकोण राशियों में से किसी राशि का फल पहले से ही शून्य हो तो उनका त्रिकोण शोधन नहीं किया जाएगा। अर्थात् जिस राशि का जो रेखायोग हो उसे ही यथावत् लिख लेना चाहिए। वही योग उनका त्रिकोण शुद्ध योग माना जाएगा।

यदि तीनों राशियों का रेखायोग समान हो तो उन तीनों के नीचे शून्य स्थापित कर लेना चाहिए।

इस प्रकार त्रिकोण शोधन के उपरान्त एकाधिपत्य शोधन करना चाहिए।

**एकाधिपत्य शोधन :**

**सूरे, फलानि परिशोधय सद्युसद्भे**
**स्वल्पे फले खगवियुक्तगृहे फलेन।**
**पुष्टे यदा कृशफलं त्यज तत्र पुष्टा-**
**च्छेषं तु तत्फलमधो विविहङ्गभस्य ।।८४।।**
**संस्थापय ग्रहवियुक्तगृहे फलाल्पे**
**पुष्टे फलेन खगसंयुतभे तदाल्पम्।**
**सर्वं त्यजाथ द्विविषत्सहितं भयुग्मं**
**नो शोधयार्य, गृहयोरुभयोः फलानि ।।८५।।**

साम्यं खसद्ग्रहितयोर्गृहयोः फलानां
सर्वाणि सन्त्यज फलानि तयोस्तु राश्योः।
खेटोनयोर्भवनयोः फलयोरसाम्यं
संशोध्ययाधिकफलात्फलमल्पकं यत् ॥८६॥
भयोर्ग्रहोपेतवियुक्तयोश्चे-
त्फलस्य साम्यं खगवर्जितस्य।
फलं गृहस्य त्यज तत्र सर्वं
खमेकभे शोधय नेह विद्वन् ॥८७॥
सिंहस्य कर्कस्य पृथग् गृहं फलं-
मेषा न कार्या प्रथमोदिता क्रिया।
प्रागत्र शोध्योर्वरितं यदागतं
राशेरधस्तस्य तु तन्निवेशयेत् ॥८८॥

सूर इति। संस्थापयेति। साम्यमिति। भयोरिति। सिंहस्येति च। एकाधिपस्येति पूर्ववत्रान्वयः।

पंचाशत्परतस्त्रिकोणशोधनानन्तरं भवनद्वयकस्य राशिद्वयस्य एकाधिपस्य एक एव स्वामी तस्य यथा—मेषवृश्चिकयोर्भौमइत्थ राशिद्वयस्य यानि फलानि त्रिकोणशोध्यावशिष्टानि हे सूरे! तानि परिशोधय। यत्र सद्युसद्भे ग्रहयुक्तराशौ त्रिकोणशोध्यावशिष्टे स्वल्पे न्यूने फले खगवियुक्तगृहे ग्रहरहितराशौ फलेन त्रिकोणशोध्यावशिष्टेन पुष्टेऽधिके सति तदा तत्र पुष्टादधिकफलात् कृशफलं न्यूनफलं त्यजशोधय। शेषमवशिष्टं यत्फलं तद् विविहंगमभस्याधो ग्रहरहितराशेरधः संस्थापय। ग्रहयुक्तराशेरधरस्तु तस्य फलं त्रिकोण शोध्यावशिष्टं निवेशय।

ग्रहवियुक्तगृहे ग्रहरहितराशौ, फलेन त्रिकोणशोध्यावशिष्टेनाल्पे न्यूने खगसंयुतभे ग्रहसंयुतराशौ फलेन त्रिकोणशोध्यावशिष्टेन पुष्टेऽधिके सति तदाल्पं फलं सर्वं त्यज, ग्रहरहितराशेरधः शून्यं स्थाप्यं ग्रहयुक्तराशेरधस्तु तस्यफलं स्थाप्यमित्यर्थः। अथ भयुग्मं राशिद्वयं दिविषदा ग्रहेण सहितं युक्तं तदा उभयोर्द्वयो ग्रहयोराश्योः यानि फलानि त्रिकोणशोध्यावशिष्टानि तानि नो शोधय, द्वयो राश्योर्यस्त्रिकोणशोध्यावशिष्टं फलं तदेव तयोरधः स्थाप्यमित्यर्थः। खसद्ग्रहितयोः ग्रहरहितराश्योः फलानां त्रिकोणशोध्यावशिष्टानां साम्यं स्याद्यदि तदा तयो राश्योर्यानि त्रिकोणशोध्यावशिष्टानि फलानि तानि सर्वाणि सन्त्यजोत्सृज, द्वयोराश्योरधः शून्यमेव स्थाप्यम्। खेटोनयोर्ग्रहरहितयोः भवनयोः राश्योः फलयोस्त्रिकोणशोध्यावशिष्टयोरसाम्यं एकस्याल्पमन्यस्याधिकमित्यर्थः। यदि तदा

यदल्पकं फलं तदधिकफलात्पुष्टफलात् संशोधय यच्छेषं तदधिकफलराशेरधः स्थाप्यं न्यूनफलाराशेरधस्तु शून्यमेव स्थाप्यम्। यदा द्वयोर्ग्रहोपेतवियुक्तयोर्ग्रहयुक्तरहितयोर्भयो राश्योः फलस्य त्रिकोणशोध्यावशिष्टस्य साम्ये समत्वे सति तदा खगवर्जितस्य ग्रहरहितस्य गृहस्य राशेः फलं त्रिकोणशोध्यावशिष्टं तत्र सर्वं समस्तं त्यज, ग्रहरहितराशेरधः शून्यं स्थाप्यं ग्रहयुक्तराशेरधस्तत्फलमेव स्थाप्यमित्यर्थः।

यदैकभे एकराशौ खं शून्यं भवति तदा इहास्मिन् स्थले द्वयोराश्योस्त्रिकोणशोध्यावशिष्टानि फलानि न शोधय, स्वस्य स्वस्य च यद्यत्फलं तत्तसर्वं स्वस्य स्वस्य चाधो निवेशये दिव्याशयः। सिंहस्य कर्कस्य च पृथग्गृहं पृथक् फलं चात एवैषा प्रथमोदिता पूर्वोक्ता क्रिया रीतिस्तत्र न कार्या। तयोर्यत्प्राक् समानीतं शोध्योर्वरितं त्रिकोणशोध्यावशिष्टं तत्तसर्वं तदधो निवेशयेत्। उभयोरेकाधिपत्यत्वादेकाधिपत्य शोधनं भवेन्नेति भावः। तथा च श्रीदेवशालः—

एवं त्रिकोणं संशोध्य पश्चादेकाधिपत्यताम्।<br>
क्षेत्रद्वयेफलानि स्युस्तदा संशोध्य बुद्धिमान्॥<br>
क्षीणेन सह तान्यस्मिन् शोधयेद् ग्रहवर्जिते।<br>
ग्रहयुक्ते फलं न्यूनं ग्रहाभावे फलाधिकम्॥<br>
उभयोस्तत्र संशोध्यं फलं हीनं विनिश्चितम्।<br>
फलहीने तथा राशौ गगनेचरवर्जिते॥<br>
फलाधिके ग्रहयुते चान्यास्मिन् सर्वमुत्सृजेत्।<br>
उभयेग्रहसंयुक्ते न संशोध्यं कदाचन॥<br>
उभाभ्यां ग्रहहीनाभ्यां समत्वे सकलं त्यजेत्।<br>
सग्रहाग्रहसाम्ये च तत्सर्वं शोध्यमग्रहे।<br>
कुलीरसिंहयो राश्योः पृथक् क्षेत्रं पृथक् फलम्॥ इति

सूर्य व चन्द्रमा को छोड़कर शेष पांच भौमादि ग्रहों को दो-दो राशियों का आधिपत्य मिला है। जैसे मंगल—मेष व वृश्चिक, बुध—मिथुन व कन्या, गुरु—धनु व मीन, शुक्र—वृषभ व तुला और शनि—मकर व कुम्भ का अधिपति है। इस प्रकार इन दस राशियों का ही एकाधिपत्य शोधन होता है। एतदर्थ यह प्रक्रिया अपनायी जाती है।

(i) यदि दोनों एकाधिपत्य राशियों में से किसी एक में ग्रह हो तथा दूसरी राशि ग्रह रहित हो, और त्रिकोण शोधन के उपरान्त ग्रह युक्त राशि का फल कम हो तो कम फल को अधिक में से घटाकर शेष फल ग्रह रहित राशि के

नीचे लिखें तथा ग्रह युक्त राशि के नीचे उसका सम्पूर्ण त्रिकोण शुद्ध फल लिखें।

(ii) यदि ग्रह रहित राशि का फल कम हो तो ग्रह रहित राशि के समस्त फल को त्याग दिया जाता है तथा वहां शून्य लिखा जाता है। ग्रह युक्त राशि का फल यथावत् रहेगा।

(iii) यदि दोनों राशियों में ग्रह हों तो उनका एकाधिपत्य शोधन नहीं होगा अर्थात् उनका त्रिकोण शुद्ध फल ही वहां लिखा जाएगा।

(iv) यदि दोनों एकाधिपत्य राशियों में कोई ग्रह न हो और दोनों राशियों का त्रिकोण शुद्ध फल समान हो तो दोनों के नीचे शून्य स्थापित करना चाहिए।

(v) यदि दोनों एकाधिपत्य राशियां ग्रह शून्य हों और दोनों का फल असमान हो तो अल्पफल को अधिक फल में से घटाना चाहिए। शेष को अधिक फल वाली राशि के नीचे स्थापित करें और अल्प फल वाली राशि के नीचे शून्य स्थापित करें।

(vi) यदि दोनों राशियों में से एक में ग्रह हो तथा दोनों का त्रिकोण शुद्ध फल बराबर हो तो ग्रह युक्त राशि का त्रिकोण शुद्ध फल लिखें और ग्रह रहित राशि के नीचे शून्य स्थापित कर दें।

(vii) यदि दोनों में से किसी राशि में शून्य त्रिकोण शुद्ध फल हो तथा दूसरी राशि में कुछ फल हो तो उनका फल यथावत् रहने दें अर्थात् वहां एकाधिपत्य शोधन न करें।

(viii) सिंह व कर्क का एकाधिपत्य शोधन नहीं होगा। उनका त्रिकोण शुद्ध फल ही वहां लिखा जाएगा।

इस समस्त विषय को अब अपने पूर्वोक्त उदाहरण के संदर्भ में समझते हैं।

**त्रिकोण शोधन का उदाहरण**—सूर्य के अष्टक वर्ग में त्रिकोण राशियों में रेखाएं इस प्रकार हैं—

मेष, सिंह, धनु का फल क्रमशः ४, १, ४ है। यहां अल्प फल

१ को सर्वत्र घटाने से उक्त राशियों का त्रिकोण शुद्ध फल क्रमशः ३, ०, ३ हुआ।

वृष, कन्या, मकर क्रमशः २, ६, ४ फल वाली हैं। यहां भी अल्प फल २ को सर्वत्र घटाया तो क्रमशः ०, ४, २ त्रिकोण शुद्ध फल हुआ।

मिथुन, तुला, कुम्भ के क्रमशः ६, ४, ३ फल में से न्यूनतम ३ को घटाया तो क्रमशः ३, १, ०, त्रिकोण शुद्ध फल बचा।

कर्क, वृश्चिक, मीन के क्रमिक फल ४, ३, ७ में से न्यूनतम ३ को सर्वत्र घटाया तो क्रमशः १, ०, ४ त्रिकोण शुद्ध फल हुआ।

इसी पद्धति से चन्द्रादिक के अष्टक वर्गों में भी त्रिकोण शोधन किया जाएगा।

यदि किसी राशि में पहले से ही शून्य होगा तो वहां त्रिकोण शोधन नहीं होगा, इस नियम के अनुसार लग्न मेष, सिंह व धनु का फल लग्नाष्टक में क्रमशः ०, ४, ६, है। अतः यहां ०, ४, ६ फल को ही त्रिकोण शुद्ध फल मान लिया जाएगा।

यदि तीनों राशियों में समान फल हो तो समस्त फल त्याग कर शून्य ग्रहण करें। यह स्थिति गुरु के अष्टक वर्ग में है। वहां मेषादि त्रिकोण राशियों का फल ४, ४, ४ ही है। अतः वहां ० माना जाएगा। शेष स्थानों पर तीनों में से अल्प फल को घटाकर शेष का ही ग्रहण किया जाएगा।

**रवि त्रिकोण शोधन**

| रा. | मे. | वृ. | मि. | क. | सिं. | क. | तु. | वृ. | ध. | म. | कुं. | मी. |
|---|---|---|---|---|---|---|---|---|---|---|---|---|
| रे.यो. | ४ | २ | ६ | ४ | १ | ६ | ४ | ३ | ४ | ४ | ३ | ७ |
| त्रि.शो. | ३ | ० | ३ | १ | ० | ४ | १ | ० | ३ | २ | ० | ४ |

**चन्द्र त्रिकोण शोधन**

| रा. | मे. | वृ. | मि. | क. | सिं. | क. | तु. | वृ. | ध. | म. | कुं. | मी. |
|---|---|---|---|---|---|---|---|---|---|---|---|---|
| रे.यो. | ५ | ३ | ५ | ७ | ५ | २ | २ | ३ | ४ | ६ | ४ | ३ |
| त्रि.शो. | १ | १ | ३ | ४ | १ | ० | ० | ० | ० | ४ | २ | ० |

### भौम त्रिकोण शोधन

| रा. | मे. | वृ. | मि. | क. | सिं. | क. | तु. | वृ. | ध. | म. | कुं. | मी. |
|---|---|---|---|---|---|---|---|---|---|---|---|---|
| रे.यो. | २ | १ | ६ | २ | ३ | ४ | २ | ३ | ३ | ४ | ४ | ५ |
| त्रि.शो. | ० | ० | ४ | ० | १ | ३ | ० | १ | १ | ३ | २ | ३ |

### बुध त्रिकोण शोधन

| रा. | मे. | वृ. | मि. | क. | सिं | क. | तु. | वृ. | ध. | म. | कुं. | मी. |
|---|---|---|---|---|---|---|---|---|---|---|---|---|
| रे.यो. | ५ | ३ | ५ | ४ | ५ | ४ | ५ | ५ | ४ | ५ | ६ | ३ |
| त्रि.शो. | १ | ० | ० | १ | १ | १ | ० | २ | ० | २ | १ | ० |

### गुरु त्रिकोण शोधन

| रा. | मे. | वृ. | मि. | क. | सिं. | क. | तु. | वृ. | ध. | म. | कुं. | मी. |
|---|---|---|---|---|---|---|---|---|---|---|---|---|
| रे.यो. | ४ | ४ | ५ | ७ | ४ | ५ | ५ | ५ | ४ | ३ | ५ | ५ |
| त्रि.शो. | ० | १ | ० | २ | ० | २ | ० | ० | ० | ० | ० | ० |

### शुक्र त्रिकोण शोधन

| रा. | मे. | वृ. | मि. | क. | सिं. | क. | तु. | वृ. | ध. | म. | कुं. | मी. |
|---|---|---|---|---|---|---|---|---|---|---|---|---|
| रे.यो. | ४ | ६ | ५ | ६ | ६ | १ | २ | ५ | ५ | ५ | ५ | २ |
| त्रि.शो. | ० | ५ | ३ | ४ | २ | ० | ० | ३ | १ | ४ | ३ | ० |

### शनि त्रिकोण शोधन

| रा. | मे. | वृ. | मि. | क. | सिं. | क. | तु. | वृ. | ध. | म. | कुं. | मी. |
|---|---|---|---|---|---|---|---|---|---|---|---|---|
| रे.यो. | २ | ३ | ४ | ६ | ५ | ४ | १ | १ | २ | ४ | ३ | ४ |
| त्रि.शो. | ० | ० | ३ | ५ | ३ | १ | ० | ० | ० | १ | २ | ३ |

### लग्न त्रिकोण शोधन

| रा. | मे. | वृ. | मि. | क. | सिं. | क. | तु. | वृ. | ध. | म. | कुं. | मी. |
|---|---|---|---|---|---|---|---|---|---|---|---|---|
| रे.यो. | ० | ५ | ६ | ३ | ४ | २ | ४ | ४ | ६ | ६ | ४ | ५ |
| त्रि.शो. | ० | ३ | २ | ० | ४ | ० | ० | १ | ६ | ४ | ० | २ |

**एकाधिपत्य शोधन का उदाहरण**—त्रिकोण शोधन हो जाने के बाद ही एकाधिपत्य शोधन किया जाता है। एकाधिपत्य शोधन के ८ नियम बताए जा चुके हैं। एकाधिपत्य शोधन जहां नियमतः होता हो तभी किया जाएगा।

भौमाष्टक वर्ग में कन्या राशि ग्रह युक्त है और मिथुन ग्रह रहित है। दोनों का फल त्रिकोण शोधन के उपरान्त क्रमश: ३, ४ है। अल्प को अधिक में से घटाने पर शेष १ मिथुन के नीचे स्थापित किया तथा कन्या का फल ३ यथावत् रहा। (नियम सं० २)

सूर्य के अष्टक वर्ग में कन्या ग्रह युक्त राशि का फल ४ व ग्रह रहित मिथुन का फल ३ है। अतः मिथुन के समस्त फल को त्याग कर वहां ० रक्खा। कन्या का फल यथावत् ४ ही रहा। (नियम सं० २)

इसी प्रकार अन्यत्र समझना चाहिए। सुविधा के लिए इस उदाहरण का एकाधिपत्य शोधन नीचे दिया जा रहा है।

### सूर्यैकाधिपत्य शोधन

| रा. | मे. | वृ. | मि. | क. | सिं. | क. | तु. | वृ. | ध. | म. | कुं. | मी. |
|---|---|---|---|---|---|---|---|---|---|---|---|---|
| ग्र. | ल. | . | . | . | . | र.बृ. | बु.शु. | . | . | चं. | . | मं.श. |
| त्रि.शो.रे. | ३ | ० | ३ | १ | ० | ४ | १ | ० | ३ | २ | ० | ४ |
| ए.शो.रे. | ३ | ० | ० | १ | ० | ४ | १ | ० | ० | २ | ० | ४ |

### चन्द्रैकाधिपत्यशोधन

| रा. | मे | वृ. | मि. | क. | सिं. | क. | तु. | वृ. | ध. | म. | कुं. | मी. |
|---|---|---|---|---|---|---|---|---|---|---|---|---|
| ग्र. | ल. | . | . | . | . | र.बृ. | बु.शु. | . | . | चं. | . | मं.श. |
| त्रि.शो.रे. | १ | १ | ३ | ४ | १ | ० | ० | ० | ० | ४ | २ | ० |
| ए.शो.रे. | १ | १ | ३ | ४ | १ | ० | ० | ० | ० | ४ | ० | ० |

### भौमैकाधिपत्यशोधन

| रा. | मे. | वृ. | मि. | क. | सिं. | क. | तु. | वृ. | ध. | म. | कुं. | मी. |
|---|---|---|---|---|---|---|---|---|---|---|---|---|
| ग्र. | ल. | . | . | . | . | र.बृ. | बु.शु. | . | . | चं. | . | मं.श. |
| त्रि.शो.रे. | ० | ० | ४ | ० | १ | ३ | ० | १ | १ | ३ | २ | ३ |
| ए.शो.रे. | ० | ० | १ | ० | १ | ३ | ० | १ | ० | ३ | ० | ३ |

### बुधैकाधिपत्यशोधन

| रा. | मे. | वृ. | मि. | क. | सिं. | क. | तु. | वृ. | ध. | म. | कुं. | मी. |
|---|---|---|---|---|---|---|---|---|---|---|---|---|
| ग्र. | ल. | . | . | . | . | र.वृ. | बु.शु. | . | . | चं. | . | मं.श. |
| त्रि.शो.रे. | १ | ० | ० | १ | १ | १ | ० | २ | ० | २ | १ | ० |
| ए.शो.रे. | ० | ० | ० | १ | १ | १ | ० | १ | ० | २ | ० | ० |

### जीवैकाधिपत्यशोधन

| रा. | मे. | वृ. | मि. | क. | सिं. | क. | तु. | वृ. | ध. | म. | कुं. | मी. |
|---|---|---|---|---|---|---|---|---|---|---|---|---|
| ग्र. | ल. | . | . | . | . | र.वृ. | बु.शु. | . | . | चं. | . | मं.श. |
| त्रि.शो.रे. | ० | १ | ० | २ | ० | २ | ० | ० | ० | ० | ० | ० |
| ए.शो.रे. | ० | १ | ० | २ | ० | २ | ० | ० | ० | ० | ० | ० |

### शुक्रैकाधिपत्यशोधन

| रा. | मे. | वृ. | मि. | क. | सिं. | क. | तु. | वृ. | ध. | म. | कुं. | मी. |
|---|---|---|---|---|---|---|---|---|---|---|---|---|
| ग्र. | ल. | . | . | . | . | र.वृ. | बु.शु. | . | . | चं. | . | म.श. |
| त्रि.शो.रे. | ० | ५ | ३ | ४ | २ | ० | ० | ३ | १ | ४ | ३ | ० |
| ए.शो.रे. | ० | ५ | ३ | ४ | २ | ० | ० | ३ | १ | ४ | ० | ० |

### मन्दैकाधिपत्यशोधन

| रा. | मे. | वृ. | मि. | क. | सिं. | क. | तु. | वृ. | ध. | म. | कुं. | मी. |
|---|---|---|---|---|---|---|---|---|---|---|---|---|
| ग्र. | ल. | . | . | . | . | र.वृ. | बु.शु. | . | . | चं. | . | म.श. |
| त्रि.शो.रे. | ० | ० | ३ | ५ | ३ | १ | ० | ० | ० | १ | २ | ३ |
| ए.शो.रे. | ० | ० | २ | ५ | ३ | १ | ० | ० | ० | १ | १ | ३ |

### लग्नैकाधिपत्यशोधन

| रा. | मे. | वृ. | मि. | क. | सिं. | क. | तु. | वृ. | ध. | म. | कुं. | मी. |
|---|---|---|---|---|---|---|---|---|---|---|---|---|
| ग्र. | ल. | . | . | . | . | र.बृ. | बु.शु. | . | . | चं. | . | म.श. |
| त्रि.शो.रे. | ० | ३ | २ | ० | ४ | ० | ० | १ | ६ | ४ | ० | २ |
| ए.शो.रे. | ० | ३ | २ | ० | ४ | ० | ० | १ | ४ | ४ | ० | २ |

**राशि ग्रह गुणक एवं पिण्ड साधन :**

**नगाशेभाब्ध्याशेष्वगगजखगेष्वीशतपना**
**गुणा मेषाद् बाणेष्विभविषयकाष्ठामुनिशराः ।**
**गुणा भानोः शुद्धं फलमिह पृथग्भाम्बरसदां**
**गुणैर्गुण्यं पिण्डं कथयति तदैक्यं भखगयोः ॥८६॥**

नगेति । नगाः सप्त, आशा दश, इभा अष्टौ, अब्धयश्चत्वारः आशाः दश, इषवः पंच, अगाः सप्त, गजा अष्टौ, खगा नव, इषवः पंच, ईशा एकादश, तपना द्वादश एते क्रमान्मेषाद् मेषमारभ्य मीनान्तानां गुणा गुणकाः स्युः । बाणाः पंच, इषवः पंच, इभा अष्टौ, विषयाः पंच, काष्ठा दश, मुनयः सप्त, शरा पंच, एते भानोः सूर्याद् रविमारभ्य शन्यन्तानां सप्तानां ग्रहाणां क्रमशो गुणाः स्युः । इह राशीनां शुद्धं एकाधिपत्यशोध्यावशिष्टं फलं पृथक् पृथक् भानि राशयः, अम्बरसदोग्रहास्तेषां स्वैः स्वैर्गुणैर्गुण्यं, ततस्तेषां गुणनफलानामैक्यं योगः कार्यः । तं भखगयोः राशिग्रहयोः पिण्डं गुणनफलसमूहं कथयति निगदति । श्रीदेवशालोऽत्र—

'शोध्यावशिष्टं संस्थाप्य राशिमानेन ताडयेत् ।
ग्रहयुक्तेऽपितद्राशौ ग्रहमानेन वर्धयेत् ॥ १ ॥
गोसिंहौ दशगुणितौ, वसुभिर्मिथुनालिनौ वणिङ्मेषौ ।
मुनिभिः कन्यामकरौ शरैः शेषाः स्वमानगुणिताः स्युः ॥ २ ॥
जीवारशुक्रसौम्यानां दशवसुसप्तेन्द्रियैः क्रमाद् गुणयेत् ।
बुधसंख्यैः शेषाणां राशिग्रहवर्गणाः पृथक् कार्याः ॥ ३ ॥
राशिग्रहगुणकारैः फलानि गुणयेत् पृथक् तैस्तैः ।
वक्रग्रहैर्युक्ते स्याद् गुणयेद् ग्रहसंख्या नित्यम् ॥ ४ ॥
एवं गुणित्वा संयोज्य, ........................... ॥ इति

राशियों के गुणक इस प्रकार हैं—

मेष-७, वृष-१०, मिथुन-८, कर्क-४, सिंह-१०, कन्या-५, तुला-७, वृश्चिक-८, धनु-९, मकर-५, कुम्भ-११, मीन-१२ ।

ग्रहों के गुणक इस प्रकार हैं—

सूर्य-५, चन्द्र-५, मंगल-८, बुध-५, गुरु-१०, शुक्र-७, शनि-५ ।

पिण्ड साधन के लिए निम्नलिखित क्रियाएं करें—

(i) प्रत्येक ग्रह के अष्टक वर्ग में प्रत्येक राशि के एकाधिपत्य शुद्ध फल को उसी राशि के गुणक से गुणाकर सब का योग करने से 'राशिपिण्ड' होता है ।

(ii) जिन राशियों में ग्रह स्थित हों, उन राशियों के फल को ग्रहों के गुणकों से गुणा कर योग करने से 'ग्रह पिण्ड' होता है।

(iii) यदि एक राशि में एक से अधिक ग्रह स्थित हों तो उस राशि के शुद्ध फल को उन ग्रहों के अलग-अलग गुणकों से बारी-बारी से गुणा कर योग फल में सम्मिलित करना चाहिए।

(iv) सूर्यादि ग्रह के राशि पिण्ड व ग्रह पिण्ड को जोड़ने से 'योग-पिण्ड' होगा।

उदाहरण से इसे समझते हैं। सर्व प्रथम राशियों को लिखा। उनके नीचे एकाधिपत्य शुद्ध फल लिखा। उस शुद्ध फल के नीचे तत्तद् राशियों के गुणकों को लिखा। इसके नीचे फल×गुणक का यथास्थान गुणनफल लिखा।

अब इसी चक्र में यथास्थान राशियों के नीचे ग्रहों को स्थापित कर लिया। ग्रहों के नीचे (जहां-जहां वे हैं) के स्थानों में ग्रह गुणक लिखकर पूर्ववत् गुणा कर लिया। प्रस्तुत उदाहरण का सूर्य पिण्ड बना कर देखते हैं—

यहां पर राशि गुणक से एकाधिपत्य शुद्ध रेखा को गुणा करनें से राशि पिण्ड और ग्रह गुणक से एकाधिपत्य शुद्ध रेखा को गुणा करनें से ग्रह पिण्ड बना है। जिन राशियों में दो ग्रह हैं वहां पर उन दोनों के गुणकों से बारी-बारी से रेखा को गुणित किया गया है। अब सब राशियों के पिण्ड का योग करने से **राशिपिण्ड योग** व ग्रहों के पिण्डों का योग करने से **ग्रहपिण्ड योग** बन जाएगा। इन दोनों योगों का योग करने से सूर्य का **योग पिण्ड** बनेगा।

राशि पिण्ड—२१+४+२०+७+१०+४८=११० राशिपिण्डयोग
ग्रह पिण्ड—२०+४०+५+७+१०+३२+२०=१३४ ग्रह पिण्ड योग

दोनों का योग—११०+१३४=२४४ सूर्य का योग पिण्ड हुआ।

अब इसी प्रकार शेष चन्द्रादि ग्रहों के अष्टक वर्ग की त्रिकोणैकाधिपत्य शुद्ध रेखाओं को बारी-बारी से ग्रह गुणक व राशि गुणक से गुणाकर पर्ववत् पिण्ड बनाया तो ये निम्नोक्त पिण्ड बने—

## सूर्य पिण्ड का उदाहरण

| राशि | मेष | वृष | मिथुन | कर्क | सिंह | कन्या | तुला | वृश्चिक | धनु | मकर | कुम्भ | मीन |
|---|---|---|---|---|---|---|---|---|---|---|---|---|
| ए० शो० रेखा | ३ | ० | ० | १ | ० | ४ | १ | ० | ० | २ | ० | ४ |
| राशि गुणक | ७ | १० | ८ | ४ | १० | ५ | ७ | ८ | ९ | ५ | ११ | १२ |
| राशि पिण्ड | २१ | ० | ० | ४ | ० | २० | ७ | ० | ० | १० | ० | ४८ |
| ग्रह | ल० | — | — | — | — | र० बृ० | बु० शु० | — | — | चं० | — | मं० शं० |
| ग्रह गुणक | — | — | — | — | — | ५ | ५ | — | — | ५ | — | ८ |
| | | | | | | १० | ७ | | | | | ५ |
| ग्रह पिण्ड | — | — | — | — | — | २० | ५ | — | — | १० | — | ३२ |
| | | | | | | ४० | ७ | | | | | २० |

चन्द्रमा का राशि पिण्ड ८७ ग्रह पिण्ड २० व योग पिण्ड १०७ है। मंगल का राशि पिण्ड ९२, ग्रह पिण्ड ९९ व याग पिण्ड १९१ हुआ।

बुध का राशिपिण्ड ३७, ग्रहपिण्ड २५ व योगपिण्ड ६२ है।

गुरु का राशिपिण्ड २८, ग्रहपिण्ड ३० व योगपिण्ड ५८ है।

शुक्र का राशिपिण्ड १६३, ग्रहपिण्ड २० व योगपिण्ड १८३ है।

शनि का राशिपिण्ड १२३, ग्रहपिण्ड ५९ व योगपिण्ड १८२ है।

लग्न का राशिपिण्ड १७४, ग्रहपिण्ड ४६, व योगपिण्ड २२० है।

प्रक्रिया को समझाने के लिए यहां पिण्डसाधन के चक्र प्रस्तुत उदाहरण में दिए जा रहे हैं। इनकी सहायता से न्यास प्रकारादि को समझने में काफी सुविधा होगी।

**चन्द्रपिण्डसाधन**

| रा. | मे. | वृ. | मि. | क. | सिं. | क. | तु. | वृ. | ध. | म. | कुं. | मीं. |
|---|---|---|---|---|---|---|---|---|---|---|---|---|
| ए.शो.रे. | १ | १ | ३ | ४ | १ | ० | ० | ० | ० | ४ | ० | ० |
| रा.गु. | ७ | १० | ८ | ४ | १० | ५ | ७ | ८ | ९ | ५ | ११ | १२ |
| रा.पि. | ७ | १० | २४ | १६ | १० | २० | . | . | . | . | . | . |
| ग्र. | ल. | . | . | . | . | र.वृ. | बु.शु. | . | . | चं. | . | मं.श. |
| ग्र.रा. | . | . | . | . | . | ५।१० | ५।५ | . | . | ५ | . | ८।५ |
| ग्र. पि. | . | . | . | . | . | . | . | . | . | २० | . | . |

राशिपिण्ड=८७, ग्रहपिण्ड=२०, योग : १६८ चन्द्रयोग पिण्ड।

**भौमपिण्डसावन**

| रा. | मे. | वृ. | मि. | क. | सिं. | क. | तु. | वृ. | ध. | म. | कुं. | मी. |
|---|---|---|---|---|---|---|---|---|---|---|---|---|
| त्रि.शो. | ० | ० | १ | ० | १ | ३ | ० | १ | ० | ३ | ० | ३ |
| रा.गु. | ७ | १० | ८ | ४ | १० | ५ | ७ | ८ | ९ | ५ | ११ | १२ |
| रा.पि. | . | . | ८ | . | १० | १५ | . | ८ | . | १५ | . | ३६ |
| ग्र. | ल. | . | . | . | . | र.बृ. | बु.शु. | . | . | चं. | . | मं.श. |
| ग्र. गु. | . | . | . | . | . | ४।१० | ५।५ | . | . | ५ | . | ८।५ |
| ग्र.पि. | . | . | . | . | . | १५।३० | . | . | . | १५ | . | २४।१५ |

राशिपिण्ड=९२, ग्रहपिण्ड=९९, योग : ९१ भौमयोगपिण्ड।

### बुधपिण्डसाधन

| रा. | मे. | वृ. | मि. | क. | सिं. | क. | तु. | वृ. | ध. | म. | कुं. | मी. |
|---|---|---|---|---|---|---|---|---|---|---|---|---|
| त्रि.शो. | ० | ० | ० | १ | १ | १ | ० | १ | ० | २ | ० | ० |
| रा.गु. | ७ | १० | ८ | ४ | १० | ५ | ७ | ८ | ९ | ५ | ११ | १२ |
| रा.पि. | . | . | . | ४ | १० | ५ | . | ८ | . | १० | . | . |
| ग्र. | ल. | . | . | . | . | र.बृ. | बु.शु. | . | . | चं. | . | म.श. |
| ग्र.गु. | . | . | . | . | . | ४\|१० | ५\|५ | . | . | ५ | . | ८\|५ |
| ग्र.पि. | . | . | . | . | . | ५\|३० | . | . | . | १० | . | . |

राशिपिण्ड = ३७, ग्रहपिण्ड = २५, योग = ६२ बुधयोगपिण्ड ।

### गुरुपिण्डसाधन

| रा. | मे. | वृ. | मि. | क. | सिं. | क. | तु. | वृ. | ध. | म. | कुं. | मी. |
|---|---|---|---|---|---|---|---|---|---|---|---|---|
| त्रि.शो. | ० | १ | ० | २ | ० | २ | ० | ० | ० | ० | ० | ० |
| रा.गु. | ७ | १० | ८ | ४ | १० | ५ | ७ | ८ | ९ | ५ | ११ | १२ |
| रा.पि. | . | १० | . | ८ | . | १० | . | . | . | . | . | . |
| ग्र. | ल. | . | . | . | . | र.बृ. | बु.शु. | . | . | चं. | . | म.श. |
| ग्र.गु. | . | . | . | . | . | ५\|१० | ५\|५ | . | . | ५ | . | ८\|५ |
| ग्र.पि. | . | . | . | . | . | १०\|२० | . | . | . | . | . | . |

राशिपिण्ड = २८, ग्रहपिण्ड = ३०, योग = ५८ गुरुयोगपिण्ड ।

### शुक्रपिण्डसाधन

| रा. | मे. | वृ. | मि. | क. | सिं. | क. | तु. | वृ. | ध. | म. | कुं. | मी. |
|---|---|---|---|---|---|---|---|---|---|---|---|---|
| त्रि.शो. | ० | ५ | ३ | ४ | २ | ० | ० | ३ | १ | ४ | ० | ० |
| रा.गु. | ७ | १० | ८ | ४ | १० | ५ | ७ | ८ | ९ | ५ | ११ | १२ |
| रा.पि. | . | ५० | २४ | १६ | २० | . | . | २४ | ९ | २० | . | . |
| ग्र. | ल. | . | . | . | . | र.बृ. | बु.शु. | . | . | चं. | . | म.श. |
| ग्र.गु. | . | . | . | . | . | ५\|१० | ५\|५ | . | . | ५ | . | ८\|५ |
| ग्र.पि. | . | . | . | . | . | . | . | . | . | २० | . | . |

राशिपिण्ड = १६३ ग्रहपिण्ड = २०, योग = १८३ शुक्रयोगपिण्ड ।

### शनिपिण्डसाधन

| रा. | मे. | वृ. | मि. | क. | सिं. | क. | तु. | वृ. | ध. | म. | कुं. | मी. |
|---|---|---|---|---|---|---|---|---|---|---|---|---|
| त्रि.शो. | ० | ० | २ | ५ | ३ | १ | ० | ० | ० | १ | १ | ३ |
| रा.गु. | ७ | १० | ८ | ४ | १० | ५ | ७ | ८ | ९ | ५ | ११ | १२ |
| रा.पिं. | . | . | १६ | २० | ३० | ५ | . | . | . | ५ | ११ | ३६ |
| ग्र. | ल. | . | . | . | . | र.बृ. | बु.शु. | . | . | चं. | . | मं.श. |
| ग्र.गु. | . | . | . | . | . | ५।१० | ५।५ | . | . | ५ | . | ८।५ |
| ग्र.पिं. | . | . | . | . | . | ५।१० | . | . | . | ५ | . | २४।१५ |

राशिपिण्ड=१८३, ग्रहपिण्ड=५९, योग=१८२ शनियोगपिण्ड।

### लग्नपिण्डसाधन

| रा. | मे. | वृ. | मि. | क. | सिं. | क. | तु. | वृ. | ध. | म. | कुं. | मी. |
|---|---|---|---|---|---|---|---|---|---|---|---|---|
| त्रि.शो. | ० | ३ | २ | ० | ४ | ० | ० | १ | ४ | ४ | ० | २ |
| रा.गु. | ७ | १० | ८ | ४ | १० | ५ | ७ | ८ | ९ | ५ | ११ | १२ |
| रा.पि. | . | ३० | १६ | . | ४० | . | . | ८ | ३६ | २० | . | २४ |
| ग्र. | ल. | . | . | . | . | र.बृ. | बु.शु. | . | . | चं. | . | मं.श. |
| ग्र.गु. | . | . | . | . | . | ५।१० | ५।५ | . | . | ५ | . | ८।५ |
| ग्र.पि. | . | . | . | . | . | . | . | . | . | २० | . | १६।१० |

राशिपिण्ड=१७४, ग्रहपिण्ड ४६ योग=२२० लग्नयोगपिण्ड।

पिण्ड साधन से शुभाशुभ फल का विवेक किस प्रकार किया जाएगा इसका निरूपण आगामी अध्यायों में किया जा रहा है।

[इति श्रीमत्पण्डितमुकुन्ददैवज्ञविरचितेऽष्टकवर्गमहानिबन्धे पं०सुरेशमिश्रकृतायां 'मञ्जुलाक्षरा'यां हिन्दी व्याख्यायां गोचराष्टकवर्गाध्यायश्चतुर्थोऽवसितः॥]

# ५

# ग्रहजन्याष्टकवर्गफलाध्याय

**सूर्याष्टक वर्ग व पितृकष्ट विचार :**

आत्मा प्रभावो जनकस्य चिन्ता
शक्तिः फलं पङ्कजिनीधवस्य ।
हंसाष्टवर्गं गगनाटनेषु
निक्षिप्य राशिर्नवमोऽर्कगस्य ॥१॥
गेहं पितुस्तद्भफलैर्निहन्या-
च्छोध्यपिण्डं भहृतावशेषम् ।
धिष्ण्यं कृशाङ्गो यदि याति तस्मिन्
कालेऽम्बक क्लेशमुदीरयन्ति ॥२॥
तत्कोणगे वा जनितोत तत्सम्-
श्छिद्रेषु दायस्य तदत्ययं वदेत् ।
हेलेर्हिते ऽहावसितेऽथवाऽसृजि
भेज्येक्षणोने पितृहा भवेन्नरः ॥३॥

आत्मेति। गेहमिति। तदिति च। आत्मा शरीरं, प्रभावः प्रतापः; जनकस्य पितुश्चिन्ता स्मृतिः शक्तिः सामर्थ्यं, पंकजिनी कमलिनी तस्या धवः पतिस्तस्यैतत्सर्वं फलं ज्ञेयमिति शेषः। तथा च देवशालः—

'आत्माप्रभावः शक्तिश्च पितृचिन्तारवेर्फलम्। इति

गगनेति। गगनाटनेषु सूर्यादिग्रहेषु सलग्नेषु हंसः सूर्यस्तस्याष्टवर्गमष्टवर्गाकान् निक्षिप्याऽष्टकवर्गं विरच्येत्यर्थः। ततोऽर्कगस्य राशेर्यो नवमो राशिः स पितुर्जनकस्य गेहं स्थानं ज्ञेयमिति। यथाऽत्र देवशालः—

'आदित्यस्याष्टवर्गाणि निक्षिप्याकाशचरिषु।
अर्कस्थितस्य नवमो राशिः पितृगृहं स्मृतम्॥' इति

अथवा शेष तुल्य नक्षत्र से त्रिकोण नक्षत्रों (दसवां व उन्नीसवां) में जब गोचर से शनि आए और साथ मारकेश की दशा हो तो उस समय पिता या पितृ तुल्य किसी अन्य व्यक्ति की मृत्यु होती है। यदि सूर्य से चतुर्थ स्थान में शनि राहु या मंगल स्थित हों और उन पर गुरु, शुक्र की दृष्टि न हो तो मनुष्य स्वयं ही पिता का नाश करने वाला होता है। अर्थात् यह योग पितृघाती या पितृहन्ता योग होता है।

सूर्य से विचारणीय विषयों के संदर्भ में टीकोक्त उद्धरणों के प्रामाण्य पर **देवशाल** व **मंत्रेश्वर** व ग्रन्थकार की एक वाक्यता है। सामान्यत: पितृस्थान दशम स्थान माना गया है किन्तु यहां नवम स्थान मानने में क्या तर्क है? सर्व प्रथम तो प्राचीन ग्रन्थकार सूर्य से नवम स्थान को पितृ स्थान मान रहे हैं। यह बात उक्त उद्धरणों से स्पष्ट है। अष्टक वर्ग प्रकरण को छोड़कर सामान्य फलित विचार करते समय भी हमारे विचार से पिता के सम्बन्ध में नवम भाव की उपेक्षा नहीं की जा सकती है।

लग्न से पंचम स्थान पुत्र का है। अत: पंचम से नवम स्थान आत्म का है। आशय यह है कि पितृभाव व पुत्र भाव में नवम पंचम सम्बन्ध होना चाहिए। इस दृष्टि से देखें तो भाग्य स्थान से पंचम अर्थात् लग्न विचारणीय जातक का आत्म भाव है। तथा आत्म से नवम जातक के पिता का है।

आत्म से सप्तम पति या पत्नी का स्थान होता है तथा इस दृष्टि से दशम स्थान पितृ स्थान होता है किन्तु पति पत्नी सम्बन्ध के अतिरिक्त यदि आत्म सम्बन्ध से पिता का विचार करें तो नवम ही युक्ति संगत प्रतीत होता है। इस विषय में पराशर शास्त्र में क्वचित् अन्तर्विरोध भी झलकता है। सामान्यत: राज्य, आकाश वृत्ति, मान व पिता आदि का विचार दशम भाव से किया जाना चाहिए, यह स्पष्ट निर्देश महर्षि **पराशर** का है; किन्तु साथ ही वे एक स्थान पर लिखते हैं कि भाग्य स्थान से द्वितीय अथवा चतुर्थ स्थान में मंगल हो व नवमेश नीचराशिस्थ बैठ जाए तो पिता निर्धन होता है। (देखें, पराशर होरा अ० २१ श्लोक ४) इस सम्पूर्ण अध्याय में पिता का विचार नवम भाव को केन्द्र बिन्दु बनाकर ही किया गया है। तथापि उत्तर भारतीय परम्परा दशम को

व दक्षिण भारतीय परम्परा नवम को पितृ स्थान मानती आयी है। इस विषय में **'देवकेरलम्'** ग्रन्थ के कुछ प्रमाण प्रस्तुत हैं—

'नवमेन तदीशेन स्वपिता जन्मभं विदुः।
'कुग्रामवासी स्वपिता नीचांशे भाग्यनायके।'

इसके अतिरिक्त उक्त ग्रन्थ में तृतीय स्थान को श्वसुर स्थान (पत्नी का पिता) माना गया है। इससे भी आत्म स्थान से नवम पितृ स्थान सिद्ध होता है। इस विषय में प्रकृत ग्रन्थकार का स्पष्ट मत है कि मुख्यत: नवम स्थान व सूर्य से नवम स्थान से पिता का विचार करना चाहिए। वे **भावमंजरी** ग्रन्थ में नवम भाव के कारकत्व में तो पिता का उल्लेख करते हैं। जबकि दशम भाव के संदर्भ में पिता का नाम भी नहीं लेते।

स्वामीगुरुर्मातुलभाग्यताता:ध र्मे विचिन्त्या ॥
(भाव मंजरी, कारक प्रकरण, श्लोक २४)

साथ ही इसी प्रकरण का श्लोक २७ भी देखें। इससे **उत्तर कालामृतकार** भी सर्वथा सहमत है (देखें, कारक खण्ड)।

अब प्रकृत विषय पर आ जाएं। उक्त विषय को अपने पूर्वोक्त उदाहरण के संदर्भ में समझते हैं। वहां जन्म समय मेष लग्न है व सूर्य कन्या राशि में स्थित है। कन्या से नवम भाव में वृष राशि है। सूर्याष्टक वर्ग में वृष राशि को २ रेखाएं मिली हैं। सूर्य का योग पिण्ड २४४ है। इन्हें परस्पर गुणा किया तो गुणनफल २४४×२=४८८ हुआ। इसे २७ से भाग दिया तो ४८८÷२७=लब्धि १८, शेष २। यहां शेष ही उपयोगी है। अश्विनी से गिनने पर दूसरा (शेष तुल्य) नक्षत्र भरणी हुआ। निष्कर्ष यह निकला कि भरणी नक्षत्र में जब गोचर से शनि जाएगा तो पिता को कष्ट होगा। इसके त्रिकोण नक्षत्र पूर्वा फाल्गुनी व पूर्वाषाढ़ नक्षत्र में भी शनि का गोचर पिता या पिता समान व्यक्ति को कष्टकारक होगा। त्रिकोण नक्षत्र के विषय में बताचुके हैं कि प्रत्येक नक्षत्र से दसवां व उन्नीसवां नक्षत्र त्रिकोण होता है। सुविधा के लिए यहां नक्षत्रों के त्रिकोण लिख रहे हैं—

| नक्षत्र | त्रिकोण नक्षत्र | नक्षत्र | त्रिकोण नक्षत्र |
|---|---|---|---|
| अश्विनी | मघा/मूल | स्वाती | शत०/आर्द्रा |
| भरणी | पू० फा०/पू० षा० | विशाखा | पू० भा०/पुन० |
| कृत्तिका | उ० फा०/उ० षा० | अनुराधा | उ० भा०/पुष्य |
| रोहिणी | हस्त/श्रवण | ज्येष्ठा | रेवती/आश्लेषा |
| मृगशिरा | चित्रा/धनि० | मूल | अश्विनी/मघा |
| आर्द्रा | स्वाती/शत० | पू० षा० | भरणी/पू० फा० |
| पुनर्वसु | विशाखा/पू० भा० | उ० षा० | कृत्तिका/उ० फा० |
| पुष्य | अनु०/उ० भा० | श्रवण | रोहिणी/हस्त |
| आश्लेषा | ज्येष्ठा/रेवती | धनिष्ठा | मृगशिरा/चित्रा |
| मघा | मूल/अश्विनी | शतभिषा | आर्द्रा/स्वाती |
| पू० फा० | पू० षा०/भरणी | पू० भा० | पुनर्वसु/विशाखा |
| उ० फा० | उ० षा०/कृत्तिका | उ० भा० | पुष्य/अनु० |
| हस्त | श्रवण/रोहिणी | रेवती | आश्लेषा/ज्येष्ठा |
| चित्रा | धनिष्ठा/मृगशिरा | | |

**पिता का अन्य विचार :**

**मूर्त्तेर्मृगाङ्कान्नवमालयाचिते**
**मार्त्तण्डजे यद्यवलोकितान्विते।**
**काले तदा तज्जनकाम्बिकात्ययं**
**दायानुकूलेन सुधीः प्रयोजयेत् ॥४॥**
**अनेहसा वोदयतः कपांशभे-**
**शितुर्दशायां जनकक्षयः स्मृतः।**
**वदेद्दशायां हिबुकालयेशितुः**
**पितुः समानस्य नुरत्ययं किमु ॥५॥**

मूर्त्तेरिति। अनेहसि च। मूर्त्तेर्लग्नाद् मृगाकांच्चन्द्राद् वा, नवमालयाचिते नवमस्थानगते मार्त्तण्डजे शनौ, अथैः पापैर्लोकितान्विते दृष्टमुक्ते यदि चेत्तदा काले दायानुकूलेन दशानुकूलेनानेहसा कालेन च सुधीः पण्डितः तस्य जातस्य जनकाम्बिक-योर्मातापित्रोरत्ययं मृत्युं प्रयोजयेत् कथयेत् तथा च देवशालः—

लग्नाच्चन्द्राद् गुरुस्थानं याते सूर्यसुते यदि।
पित्रोर्नाशं तदा काले वीक्षिते पापसंयुते॥
दशानुकूलकालेन योजयेत्कालवित्तमः॥' इति

वेति। वा, उदयतो लग्नात् कपश्चतुर्थेशस्तस्यांशभे नवांशराशी तयोरीशितुः स्वामिनो दशायां दाये जनकस्य पितुः क्षयो नाशः स्मृतो ज्ञेयः। किमु अथवा हिबुकालयेशितुश्चतुर्थस्वामिनो दशायां दाये नुर्मनुष्यस्य पितुर्जनकस्य पितुः समानस्य पुरुषस्य वा अत्ययं मृत्युं वदेत्। तथा च देवशालः—

'लग्नात्सुखेशराशीशदशायां च पितृक्षयः।
सुखनाथदशायां च बहुप्राप्तेश्च संश्रयः॥' इति

लग्न एवं चन्द्रमा इन दोनों में जो अधिक बली हो, उससे नवम स्थान में शनि स्थित हो और उस पर पाप ग्रह की दृष्टि हो या पाप ग्रह से उसकी युति हो तो साथ में मारकेश की दशा आदि (पिता की) का विचार कर उक्त परिस्थिति में माता पिता की मृत्यु कहनी चाहिए।

लग्न से चतुर्थ स्थान का स्वामी जिस राशि या जिस नवांश में हो उस राशीश व नवांशेश की दशा में या चतुर्थेश की दशा में पिता या पितृतुल्य व्यक्ति का मरण होता है।

**पिता का काम पुत्र द्वारा पूर्ण होने का योग :**

**जातो नरो योऽम्बकसम्भवाष्टमे**
**किं वा तदीशेऽपि कलेवरोपगे।**
**कार्याणि तेनैव पितुः प्रकारये-**
**न्नो संशयोऽत्राम्बुप आयलग्नगे॥६॥**
**शीतांशुलग्नाच्च विशेषतोऽम्बक-**
**निकेतयुक्ते सवितुर्वंशानुगः।**
**तातस्य कार्यस्य हि कर्म्मशेषकं**
**समाप्यते तेन शरीरजन्मना॥७॥**

जात इति। शीतांश्विति। यो नरो मनुष्योऽम्बकसम्भवाष्टमे पितृजन्माष्टमे पितुर्जन्मराशेर्लग्नराशेर्वाऽष्टमे राशौ लग्ने वा जात इत्यर्थः। अथवा तदीशे पितुर्जन्मलग्नराशीशे लग्नेशे वा तस्य जातस्य कलेवरोपगे लग्नस्थिते सत्यपि तेनैव पितुर्यानि कार्याणि अवशिष्टानि तानि प्रकारयेद्विदध्यात्। अत्र संशयो न कर्त्तव्यः। तथा च देवशालः—

'पितृजन्माष्टमे जातस्तदीशे लग्नगेऽपि वा ।
तेनैव पितृकार्याणि कारयेन्नात्र संशयः ॥' इति

अत्रेति। अत्रास्मिन् प्रकरणेऽम्बुपश्चतुर्थेश आयलग्नगे लग्नादेकादश-स्थानगते विशेषतः शीतांशुलग्नाच्चन्द्रराशे रम्बकनिकेतयुक्ते दशमस्थानस्थिते। चतुर्थेश इति शेषः। तदा जातः सवितुःपितुर्वंशानुगो वश्योऽनुचरश्च। तेन शरीर-जन्मना पुत्रेण तातस्य पितुः कार्यस्य कर्त्तव्यस्य कर्मशेषकं कर्माविशिष्ट समाप्यते। तथा च देवशालः—

'सुखेशे लाभलग्नस्थे चन्द्र लग्नाद्विशेषतः ।
पितृगृहसमायुक्ते जातः पितृवशानुगः ॥' इति

पिता के जन्म समय चन्द्रमा जिस राशि में हो अर्थात् पिता की जन्म राशि या पिता के जन्म लग्न से अष्टम राशि या अष्टम लग्न में किसी का जन्म हो, अर्थात् जिसकी जन्मराशि पिता की जन्मराशि से अष्टम हो व जिसका जन्म लग्न पिता के जन्म लग्न से अष्टम हो तो वह पिता द्वारा प्रारम्भ किए गए असमापित कार्यों को पिता के बाद स्वयं पूरा करता है।

अथवा पिता की जन्म राशि का स्वामी या पिता का जन्म लग्नेश जब पुत्र के जन्म लग्न में हो तो भी वह पिता के शेष कर्त्तव्यों को पूरा करता है।

यदि चतुर्थेश लाभ स्थान में हो विशेषतया चन्द्रराशि से दशम स्थान में चतुर्थेश हो तो वह व्यक्ति पिता के वश में रहता है। तथा वह पिता के शेष कामों को उनका अनुगामी बनकर पूरा करता है।

**पिता से धन प्राप्ति के योग :**

**जातः पितुर्जन्मतृतीयराशौ**
**स्वकीयतातस्य धनाश्रितः सः ।**
**पितुर्वियद्भे पितृतुल्यकर्म-**
**गुणान्वितस्तद्रमणेऽङ्गगे चेत् ॥८॥**
**श्रेष्ठस्तनूजो जनकात्तदानीं**
**यः शून्यमासो मिहिराष्टवर्गे ।**
**संव्वत्सराख्यं प्रति तत्र मासे**
**त्यजेद्विवाहं व्यवहारपूर्वम् ॥९॥**

जात इति। श्रेष्ठ इति च। पितुर्जनकस्य जन्मनो राशेर्जन्मलग्नाद् वा यस्तृतीयराशिस्तस्मिन् यो नरो जात उत्पन्नः स स्वकीय तातस्य धनाश्रितो धन-भोक्ता भवेदिति शेषः। पितुस्तातस्य वियद्भे दशमराशौ यस्य बालस्य जन्म भवेत्; सः पितृतुल्यकर्मगुणान्वितो भवेत्। तथा च देवशालः—

'पितृजन्मतृतीयर्क्षे जातः पितृधनाश्रयः।
पितृकर्मगृहे जातः पितृकर्मगुणान्वितः॥' इति

तद्रमण इति। तद्रमणे पितुर्जन्मराशीशे लग्नेशे वा तस्यजातस्यांगगे लग्नगे चेद्यदि तदानीं जातस्तनूजः पुत्रो जनकात्पितुः श्रेष्ठो भवेदिति शेषः। तथा च देवशालः—

तदीशे लग्नसंस्थेऽपि पितृश्रेष्ठो भवेत्सुतः॥ इति

य इति। मिहिराष्टवर्गे सूर्याष्टवर्गे यः शून्यमासो रेखाभावमासोऽर्थात् सूर्याष्टकवर्गे यस्मिन्राशौ रेखाभावस्तद्राशितुल्यमास इत्यर्थः। संवत्सराख्यं प्रति प्रतिवर्षं तत्र तस्मिन् मासे विवाहं व्यवहारपूर्वं विवाहादि त्यजेद् वर्जयेत्। तथा च देवशालः—

'सूर्याष्टवर्गे यः शून्यो मासः सवंत्सरं प्रति।
विवाहव्यवहारादि तस्मिन्मासि विवर्जयेत्॥' इति

जिस व्यक्ति का जन्म अपने पिता की जन्म राशि या जन्म लग्न से तृतीय राशि या लग्न में हुआ हो तो वह अपने पिता के धन का भोग करता है।

पिता की राशि (या लग्न) से दशम राशि में जिसका जन्म हो वह अपने पिता के समान कार्य करता है।

पिता का जन्म राशीश जब जन्म लग्न में हो तो व्यक्ति अपने पिता से श्रेष्ठ होता है।

सूर्याष्टक वर्ग में जिस राशि में शून्य हो प्रति वर्ष उस मास में विवाहादि शुभकृत्य नहीं करने चाहिएं।

**सूर्याष्टक वर्ग व शरीर कष्ट विचार :**

**खे मास्यकायासविवादकं फलं**
**ज्ञात्वैवमादि प्रतिमासमाचरेत्।**
**संशोध्यपिण्डं तपनस्य बिन्दुक-**
**मानेन हन्याद्रविभिर्विभाज्येत्॥१०॥**

**शेषर्क्षमाप्ते मिहिरेऽथवा ततः**
**कोणोपगे तातमृतिं विनिर्दिशेत् ।**
**एवं समेषां गगनाधिवासिनां**
**फलं मनुष्यो मतिमान्विचिन्तयेत् ॥११॥**

ख इति । शेषेति च । खे शून्ये मासि रेखाभावसंख्याके मास इत्यर्थः । अकं दुःखमायासः परिश्रमः, विवादः कलह एवमादि फलं ज्ञात्वा प्रतिमासं मासंमासं प्रति, आचरेत् कुर्यात् । तथा च देवशालः—

कलहायासदुःखानि शून्यमासे भवन्ति च ।
एवमादि फलं ज्ञात्वा मासं प्रति समाचरेत् ।

संशोध्येति । तपनस्य सूर्यस्य यत्संशोध्यपिण्डं स्पष्टपिण्डं विन्दुकमानेन सूर्याष्टवर्गे यन्नवमं स्थानं तत्र यावान्विन्दुयोगस्तेनहन्याद् गुण्येत् । ततो रविभि-र्द्वादशभिर्विभाजयेद् हरेत् । शेषर्क्षे शेषतुल्यराशिमाप्ते मिहिरेरवौ, अथवा ततस्तस्माच्छेषराशितः कोणोपगेरवौ सति तदा तातस्य पितुर्मृतिं मृत्युं विनिर्दिशेत् । एवं पूर्वोक्तप्रकारेण समेषां सर्वेषां गगनाधिवासिनां ग्रहाणां मतिमान् मनुष्यः फलं विचिन्तयेन् तथा च देवशालः—

संशोध्यपिण्डं सूर्यस्त रन्ध्रमानेन वर्धयेत् ।
द्वादशादिहृताच्छेषं मेषादि गणयेत्पुनः ॥
तस्मिन्मासे मृत्तिं विद्यात्तत्त्रिकोणगतेऽपि वा ।
सूर्यादिकल्पयेत्वन्ये परतो भास्करे मृतिः ॥
विशेषं भावसूत्रेऽग्रे पितुर्दयादिकं दिशेत् ॥ इति

सूर्याष्टक वर्ग में जिस राशि में ० फल हो, उस राशि के मास में, अर्थात् उस राशि के संक्रान्ति मास में दुःख, परिश्रम व कलह होती है । इस प्रकार मासिक फलादेश के शुभाशुभ का विवेक कर लेना चाहिए ।

सूर्याष्टक वर्ग में सूर्य की अधिष्ठित राशि से जो अष्टम राशि हो, उस राशि के विन्दु योग (अशुभ फल) से सूर्य के शुद्ध योग पिण्ड को गुणा करना चाहिए । इस गुणनफल को १२ से भाग देकर जो शेष बचे, उस शेष तुल्य मेषादि राशि के संक्रान्ति मास में अथवा उस राशि से नवम व पंचम राशि के मास में मनुष्य की मृत्यु हो जाती है । इसी प्रकार अन्य ग्रहों से भी विचार करना चाहिए ।

सूर्याष्टक वर्ग के अष्टमराशिस्थ बिन्दुमान से फल जानने का प्रकार देवशाल ने भी बताया है । जैसा कि टीकोक्त उद्धरण में स्पष्ट है । यही बात **मंत्रेश्वर** भी अपनी **फलदीपिका** में कहते हैं—

"संशोध्यपिण्डं सूर्यस्य रन्ध्रमानेन वर्धयेत्‌···।"
(अष्टकवर्गफलाध्याय श्लोक ५-६)

यहां एक शंका है। सीधा अर्थ है कि सूर्य के शोध्यपिण्ड को अष्टम के मान से गुणा करना चाहिए। अर्थात्‌ सूर्याधिष्ठित राशि से अष्टमराशि के मान से वर्धित करना चाहिए इत्यादि।

फलदीपिका के टीकाकार प० गोपेश कुमार ओझा ने इसका अर्थ लिखा है कि शोध्य पिण्ड में ८ जोड़कर आगे की क्रिया करनी चाहिए। यह अर्थ भ्रामक है।

वृद्धि शब्द का गणितीय अर्थ गुणा ही होता है। यही अर्थ उक्त उद्धरण स पूर्ववर्ती श्लोकों में आए 'वर्धयेत्‌' पद का पं० ओझा ने भी किया है। मूल ग्रन्थकार पं० मुकुन्द कृत व शिक्षा मंत्रालय भारत सरकार द्वारा प्रकाशित **ज्योतिष शब्द कोष** में भी वृद्धि का अर्थ गुणा किया गया है। देखें (**गणनादि वर्ग पृ० ९०**) किन्तु इस श्लोक का अर्थ करने में पं० ओझा के भ्रम का कारण समझ में नहीं आता है। अस्तु अष्टमभावस्थ मान से गुणा करना चाहिए, यही अर्थ प्रशस्त है।

दूसरी शंका यह है कि सूर्य से अष्टम भाव के मान का अर्थ तत्रस्थ रेखाएं माना जाए या तत्रस्थ बिन्दुयोग। यह विषय फलदीपिका या देवशाल जातक के मूल उद्धरण से स्पष्ट प्रतिभासित नहीं होता। किन्तु ग्रन्थकार ने अपने मूल श्लोक में स्पष्ट रूप से बिन्दु शब्द का ही प्रयोग किया है। यहां बिन्दु के ही ग्रहण का हेतु स्पष्ट नहीं है। अपने पूर्व प्रसक्त उदाहरण से इसे समझते हैं—

कन्या राशिस्थ सूर्य से नवम राशि वृषभ में रेखाएं २ व बिन्दु ६ हैं। सूर्य का शोध्य पिण्ड २४४ है। इसे बिन्दुमान से गुणा किया २४४×६=१४६४ गुणनफल को १२ से भाग दिया— १४६४÷१२ =लब्धि १२२, शेष ०। यहां शून्य मीन राशि मानी। मीन राशि में या इससे त्रिकोण कर्क व वृश्चिक राशियों में जब शनि आएगा तो उदाहरण से सम्बद्ध जातक के पिता को कष्ट होगा। यदि पिता न हों तो पितृ तुल्य व्यक्ति को कष्ट होगा।

इसी प्रकार चन्द्रमा से माता का, मंगल से भाई का, बुध से बन्धु बान्धव, वृहस्पति से पुत्र, शुक्र से पत्नी व शनि से आजीविका का विचार इसी प्रकार से करना चाहिए। किस ग्रह से क्या विशेष विचार

किया जाता है इसका विस्तृत विवेचन आगे यथा प्रसंग किया जा रहा है।

**चन्द्राष्टक वर्ग के विचारणीय विषय :**

> **प्रसादधीग्राममनांसि माते-**
> **न्दुनेन्दुतोऽम्बाभवनेऽम्बिकायाः ।**
> **स्मृतिर्विधेया शशिनोऽष्टवर्गं**
> **ग्रहेषु निक्षिप्य वियद्भगेऽब्जे ।।१२।।**
> **सन्त्यज्य तद्भं शुभकर्म्म कारये-**
> **च्चन्द्राष्टमेड्भत्रितये विशेषतः।**
> **आयासमाभीलमुतोपतापकं**
> **लभेत मर्त्योऽत्र न विभ्रमो भवेत् ।।१३।।**

प्रसादेति। सन्त्यज्येति च। प्रसादः प्रसन्नता, धीर्बुद्धिः, ग्रामः प्रसिद्धः, मनश्चित्तं, माता एतत्सर्वं इन्दुना चन्द्रेण चिन्तयेदिति। इन्दुतश्चन्द्रादम्बाभवने चतुर्थे मातुः स्मृतिश्चिन्ता विधेया कार्या। तथा च देवशालजातके—

'मनोबुद्धिप्रसादं च मातृचिन्ता मृगांकतः।' इति

शशिन इति। ग्रहेषु सूर्यादिषु सलग्नेषु शशिनश्चन्द्रस्याष्टकवर्गं निक्षिप्य, अब्जे चन्द्रे वियद्भगते शून्यराशिगते सति तदा तद्भं तं राशिं तद्राशिनक्षत्रं वा संत्यज्य वर्जयित्वा शुभकर्म विवाहादिशुभकृत्यं कारयेत्। विशेषतश्चन्द्रराशितो योऽष्टमराशिस्तस्यस्वामिनो भत्रितये नक्षत्रत्रये यदि शुभकर्म कुर्यात्तदा मर्त्यो मनुष्यः, आयासं परिश्रमं आभीलं दुःखं, उताथवा उपतापं रोगं, लभेत्। अत्र विभ्रमः सन्देहो न भवेत्। तथा च देवशालः—

> 'चन्द्राष्टवर्गं निक्षिप्य शून्यराशिगते विधौ।
> तन्नक्षत्र परित्यज्य शुभकर्माणि कारयेत्।।
> चन्द्राष्टमेश नक्षत्रत्रितयेषु विशेषतः।
> आयाम व्याधिदुःखादि लभते नात्र संशयः।।' इति

प्रसन्नता, बुद्धि, ग्राम, मन, माता ये सब विषय चन्द्रमा से देखे जाते हैं।

चन्द्राधिष्ठित राशि से चतुर्थ स्थान से माता का विचार किया जाता है।

लग्नसहित सूर्यादि ग्रहों में चन्द्राष्टक वर्ग के अंकों का प्रस्ताराष्टक बनाकर देखना चाहिए कि किस राशि में शून्य है अर्थात् किस राशि में रेखाओं का अभाव है। उसी रेखा रहित राशि में जब गोचर से चन्द्रमा आएगा तब तक अथवा उस राशि से सम्बद्ध नक्षत्रों में विवाहादि कृत्य नहीं करने चाहिएं।

विशेषतः चन्द्रमा की अधिष्ठित राशि से अष्टम जो राशि है उस राशि के स्वामी की जो एक या दो राशियां हों, उन राशियों के नक्षत्रों में यदि शुभ कार्य किए जाएंगे तो परिश्रम, दुःख व रोगादि कुफल होते हैं। इस विषय में संदेह नहीं करना चाहिए।

यहां ये निर्देश दिए गए हैं—

(i) शून्यफल वाली राशि में चन्द्रमा आए तो उस समय शुभ कृत्यों को वर्जित करे।

अथवा उस राशि से सम्बन्धित तीनों नक्षत्रों को पूर्ण वर्जित करे, चाहे चन्द्रमा उस रेखा रहित राशि को छोड़ भी क्यों न दे।

यथा माना मेष राशि रेखा रहित है। अतः आप चाहें तो मेष राशि में चन्द्रमा के सम्पूर्ण भोगकाल को वर्जित करें अथवा अश्विनी, भरणी व कृत्तिका इन तीनों सम्पूर्ण नक्षत्रों को ही वर्जित करें।

(ii) चन्द्रमा की अधिष्ठित राशि से अष्टम राशि का जो ग्रह स्वामी हो उस स्वामी ग्रह के नक्षत्रों को शुभ कृत्यों में वर्जित करना चाहिए। यथा किसी का मंगल चन्द्रमा से अष्टमेश यदि है तो मेष व वृश्चिक इन दोनों राशियों से सम्बन्धित नक्षत्रों (अश्विनी, भरणी, व कृत्तिका, विशाखा, अनुराधा व ज्येष्ठा) को सम्पूर्ण वर्जित करें।

**मातृ कष्टकारक समय का ज्ञान :**

**शीतांशुतः सौख्यफलैर्विनिघ्न :**
**पिण्डो भभक्ते परिशेषमृक्षम् ।**
**प्राप्ते पतङ्गात्मभवे जनित्री-**
**हानिं ततः कोणगते वदेद्वा ।।१४।।**

शीतांशुत इति । शीतांशुतश्चन्द्राधिष्ठितराशितो यत्सौख्यं चतुर्थ भवनं तस्य फलै रेखाभि: पिण्डश्चन्द्रस्य शोध्यपिण्डो विनिघ्नो गुणित: कार्य: । ततोभ: सप्तविंशत्या भक्ते सति तदा यत्परिशेषं तदृक्षं नक्षत्रं प्राप्ते वा तत: शेषतुल्यनक्षत्रात् कोणगते दशमैकोनविंशति नक्षत्र प्राप्ते पतंगात्मभवे शनौ तदा जनित्री माता तस्या हानिं क्षतिं वदेत् । तथा च देवशाल:—

'चन्द्रात्सुखफलै: पिण्डं वर्धयेच्छोध्यपूर्ववत् ।
शेषमृक्षं शनौ याते मातृहानिं विनिर्दिशेत् ।।
तत्त्रिकोणेषु वा ।' इति

जन्म समय में चन्द्रमा जिस राशि में हो, उस राशि से अर्थात् मनुष्य की जन्म राशि से चतुर्थ राशि के रेखायोग को ले लीजिए। उस रेखा योग को चन्द्रमा के शुद्ध पिण्ड से गुणा कीजिए।

इस गुणनफल में २७ से भाग देकर शेष संख्यक नक्षत्र में अथवा उस नक्षत्र से त्रिकोण नक्षत्र में जब गोचर से शनि आए तो माता की मृत्यु का समय जानना चाहिए।

आशय यह है कि माता की दशा आदि अशुभ हो और आयु खण्ड पूर्ण होने वाला हो तथा साथ में उक्त स्थिति भी बन रही हो तो निश्चय से मृत्यु जाननी चाहिए अन्यथा रोगादि जन्य कष्ट ही होंगे। अपने पूर्वोक्त उदाहरण में चन्द्रमा मकर राशि में स्थित है। इससे चतुर्थ राशि मेष है। चन्द्राष्टक वर्ग में वहां फल ५ है। चन्द्रमा के शुद्ध पिण्ड १०७×५=५३५ गुणनफल को २७ से भाग दिया तो ५३५÷२७= लब्ध १९ व शेष २२ है। अश्विनी से गिनने पर २२वां नक्षत्र श्रवण है। अत: श्रवण नक्षत्र में या श्रवण से त्रिकोण रेवती व हस्त नक्षत्रों में शनि का गोचर होने पर माता को कष्ट होगा।

**दूसरा प्रकार:**

**किं कल्पयेत्कश्चन सन् दशाया-**
**श्छिद्रेषु मातुर्मरणं नराणाम् ।**
**ग्लौलग्नत: केऽसृजि भास्करौ वा**
**तत्स्थानभाभ्यां परिदृश्यते वा ।।१५।।**
**अनेहसं प्राक्कथितं समादिशे-**
**दसम्भवे तस्य मृतिर्मता स्वयम् ।**

उतेह देशान्तरकेतिरीरिते-
न्दुतोऽम्बुरंध्रेशलवत्रिकोणभे ॥१६॥
प्राप्ते यदा भास्वति तत्रमासे-
ऽम्बाया वियोगं निगदेत्कृतीन्द्रः ।
तद्वद्विलग्नात्सवितुर्वियोगं
मातुःस्मृतौ तातवदर्कपूर्वम् ॥१७॥

किमिति। अनेहसमिति। प्राप्त इति च। किमथवा दशायादायस्य मारकेशदशाया इत्यर्थः। छिद्रेषु दोषेषु कश्चन सन् पण्डितो नराणां मातुः, मरणं कल्पयेत्। ग्लौलग्नतश्चन्द्रलग्नराशितः के चतुर्थस्थानेऽसृजिभौमे वा भास्करौ शनौ, वा तत्स्थानं चन्द्राच्चतुर्थस्थानमान्यां मंगलमन्दाभ्यां, परिदृश्यते वीक्ष्यते तदा प्राक् कथितं पूर्वोक्त मनेहसं कालं समादिशेत्कथयेत्। तस्य मातृमरणस्यासम्भवेऽभावे तस्य स्वयमात्मना मृतिर्मृत्युर्मतोज्ञेयः। उताथवा देशान्तरकेतिविषयान्तरे गतिर्गमनं कथितम्। तथा च देवशालः—

'................कश्चिद्दशाच्छिद्रेषु कल्पयेत्।
चन्द्राल्लग्नात्सुखस्थाने भौमे वा भास्करात्मजे।
दृश्यते वा तयोः स्थानं पूर्वोक्ते कालसंगते।
तदभावे स्वयं मृत्युर्देशान्तरगतिश्च वा॥' इति

इन्दुतइति। इन्दुतश्चन्द्राद् अम्बु चतुर्थो रन्ध्रमष्टमं तयोरीशौ स्वामिनौ यस्मिन्नवांशे वर्तते ताभ्यां त्रिकोणभे पंचमनवमगृहे यदा भास्वति सूर्ये प्राप्ते तत्र तस्मिन्मासेऽम्बायाः मातुर्वियोगं विच्छेदं मरणमित्यर्थः। कृतीन्द्रः पण्डितवरः निगदेत्कथयेत्। तद्वतादृश एवं विलग्नाज्जन्मलग्नात्सुखाष्टमेशांशत्रिकोणे प्राप्ते सूर्ये पितुर्वियोगं वदेत्। मातुर्जनन्याः स्मृतौ चिन्तायां तातवत् पितृवद् अर्कपूर्वं सूर्यादि प्रकल्पयेत्। तथा च देवशालः—

'चन्द्रात्सुखाष्टमेशांशे त्रिकोणे दिवसाधिपे।
मात्रा वियोगमस्तीति निर्दिशेल्लग्नतः पितुः॥
पितृवन्मातृचिन्तायां भास्करादि प्रकल्पयेत्॥' इति

अथवा कुछ विद्वान् दशा के दोषों से अर्थात् मारकेशादि ग्रहों की दशा में माता का निधन बताते हैं।

यदि चन्द्र लग्न में या जन्म लग्न में चतुर्थ स्थान में मंगल या शनि हो या इस स्थान पर शनि व मंगल की दृष्टि हो तो भी पूर्वोक्त समय में माता की मृत्यु कहनी चाहिए।

यदि उक्त समय में माता का मरण असम्भव हो अर्थात् माता न हो तो स्वयं उस व्यक्ति की मृत्यु होती है या उसका विदेश गमन होता है।

चन्द्रमा की अधिष्ठित राशि से चतुर्थ तथा अष्टम स्थान का स्वामी जिस राशि के नवांश में हो, उस नवांश राशि से त्रिकोण राशियों में जब गोचर से सूर्य आए तब उस मास में माता का वियोग कहना चाहिए।

लग्न से चतुर्थ व अष्टम स्थान के स्वामी की नवांश राशि से त्रिकोण राशियों में जब गोचर से सूर्य आए तो पिता का वियोग कहना चाहिए।

माता का विचार करने में पिता के विचार की तरह सूर्यादि ग्रहों से विचार करना चाहिए। किस ग्रह से किस सम्बन्धी का विचार किया जाएगा, इस विषय में श्लोक ११ की व्याख्या में हम पीछे बता चुके हैं।

**भौमाष्टकवर्ग के विचारणीय विषय :**

**सञ्चिन्तयेत्सोदरसत्त्वधैर्य्य-**
**पराक्रमक्षोणिगुणान् कुजेन।**
**ततस्तृतीयेऽपि सहोत्थचिन्ता**
**खगेषु निक्षिप्य कुजाष्टवर्गम् ॥१८॥**
**पृथ्वीसुतस्थस्य सहोत्थराशि-**
**र्यो भ्रातृभावः स मतः सुधीन्द्रैः।**
**पिण्डं फलैस्तत्रगतैर्निहत्य**
**विभज्यधिष्ण्यै रवशेषधिष्ण्ये ॥१९॥**
**याते यदा सत्ततुरङ्गसूनौ**
**सहोत्थहानिं कथयेत्कृतीन्द्रः।**
**कृत्वा त्रिकोणर्क्षविशोधनाख्यं**
**यस्मिन्नदभ्राणि फलानि तत्र ॥२०॥**
**विचिन्तयेद्भूभवनार्थभार्या**
**व्यस्यासतस्तत्क्षतिमाहुराद्याः।**
**चेन्मुक्तवीर्य्योऽङ्गभवो धरित्र्याः**
**सोत्थास्तदानीं बहुजीविनः स्युः ॥२१॥**

मंगल के शोध्यपिण्ड को मंगल से तृतीय स्थान (भ्रातृ स्थान) की रेखाओं से गुणाकर २७ से भाग देना चाहिए। तब जो शेष बचे उसकी संख्या के तुल्य नक्षत्र में जब गोचर से शनि आए वह भ्राता की मृत्यु का समय जानना चाहिए।

मंगल के अष्टक वर्ग में एकाधिपत्य शोधन से रहित केवल त्रिकोण शुद्ध रेखाओं के आधार पर देखना चाहिए कि किस राशि में त्रिकोण शुद्ध रेखाएं अधिक हैं। उन अधिक त्रिकोण शुद्ध रेखा युक्त राशियों में जब-जब मंगल का गोचर हो तब भूमि, घर, स्त्री आदि का अधिक सुख कहना चाहिए। जिस जिस राशि में कम रेखाएं हों उनमें मंगल का गोचर होने पर भूमि, स्त्री व घर आदि की हानि कहनी चाहिए। जिसके जन्म समय मंगल निर्बल हो, उसके भाई प्रायः सुखी व दीर्घायु होते हैं।

यहां मंगल की केवल त्रिकोण शुद्ध रेखाओं से फल कहने का निर्देश दिया गया है। एकाधिपत्य शोधन युक्त रेखाओं से किस प्रकार हानि लाभ का विचार करना है यह आगे के श्लोकों में बताया जा रहा है।

**वैद्यनाथ** ने मंगल के अष्टक वर्ग से भाइयों की संख्या जानने का प्रकार भी बताया है।

भूमिजे सहजस्थाने यावतां विद्यते फलम्।
शत्रुनीचगृहं त्यक्त्वा तावन्तः सहजाः स्मृताः॥

(जातक पारिजात, अ० १२, श्लोक २०)

'मंगल के अष्टक वर्ग में मंगल से तृयीय स्थान में जितने ग्रह शुभ रेखा देने वाले हों, उतनी ही संख्या भाई बहिनों की समझनी चाहिए। किन्तु कोई ग्रह रेखाप्रद होने पर भी शत्रुराशि या नीचराशि में है तो उसको छोड़कर शेष रेखाप्रद ग्रहों से उक्त प्रकार से भ्रातृ संख्या का विचार करना चाहिए।

इस विषय में यह कहना आवश्यक है कि जहां वैद्यनाथ ने यह बताया है उसी प्रसंग में कई अन्य प्रकार भी बताए गए हैं। आजकल तो यह प्रकार ठीक हो सकता है किन्तु प्राचीन काल में जहां आठ से अधिक भाई बहन होते थे तब अष्टक वर्ग से कैसे विचार किया जा सकता था कि उनकी सही संख्या क्या होगी। कारण यह है कि अष्टक वर्ग में

अधिकाधिक आठ ग्रहों का ग्रहण है। अत: निश्चित रूप से भ्रातृ संख्या की चरम सीमा आठ ही माननी होगी।

अस्तु, प्रकृत विषय पर आते हैं। मंगल के अष्टक वर्ग से फल जानने के लिए पूर्वप्रदत्त उदाहरण को लेते हैं। वहां मंगल मीन राशि में स्थित है। मीन से तृतीय स्थान अर्थात् वृषराशि भ्रातृ स्थानगत हुई। वृष का फल १ है। इससे मंगल के शोध्य पिण्ड १६१ को गुणा किया तथा २७ से भाग दिया—

१ × १६१ = १६१ ÷ २७ = ७ लब्धि, शेष २

अश्विनी से गिनने पर शेष तुल्य नक्षत्र भरणी हुआ। अत: भरणी नक्षत्र में जब शनि का गोचर होगा तब भ्रातृ मरण योग होगा। अथवा इससे त्रिकोण नक्षत्र पूर्वाषाढ़ा या पूर्वाफाल्गुनी में शनि का चार होनें पर उक्त फल होगा।

कई भाइयों में से किस पर उक्त फल घटित होगा, इस विषय में भाइयों की दशा व अन्तर्दशादि का विचार हमारे विचार से करना चाहिए।

**मंगल की एकाधिपत्य शुद्ध रेखाओं से फल ज्ञान :**

**एकाधिपत्यं परिशोध्य यत्र**
**कुजाष्टवर्गे फलमाप्यते नो।**
**तत्र क्षयः स्याद्वसुधादिकाना-**
**मितीरयेत्पण्डितदेवशालः ॥२२॥**

एकाधिपत्यमिति। कुजाष्टवर्गे भौमाष्टवर्गे त्रिकोणशोधनानन्तरं एकाधिपत्यं परिशोध्य यत्र यस्मिन् राशौ एकाधिपत्यशोध्यावशिष्टंफलं नो आप्यते लभ्यते, तत्र राशौ गोचरेण भौमे आगच्छति तदा वसुधादिकानां भूम्यादीनां क्षयोनाशः स्यात्। इत्येवं पण्डितदेवशाल ईरयेत्कथयेत्। तथा च देवशालः—

'एकाधिपत्यं संशोध्य फलं यत्र न लभ्यते।
तत्र भूम्यादिनाशः स्याद्देवशालः प्रभाषते॥
फलानि यत्रभूयांसि सर्वेभ्यस्तत्र तत्र च॥' इति

भौमाष्टक वर्ग में त्रिकोण शोधन के पश्चात् एकाधिपत्य शोधन कर लेना चाहिए। अब जो राशि रेखा रहित हो उसमें मंगल का गोचर होने पर भूमि, स्त्री व गृह का नाश होता है। ऐसा पण्डित देवशाल

(देवशाल जातककार) ने कहा है। जहां फल हो उन रेखाओं में मंगल के गोचर समय इन-इन वस्तुओं का लाभ होगा यह बात अन्यथोपपत्ति से सिद्ध है।

हमारे प्रकृत उदाहरण में मंगल के अष्टक वर्ग में एकाधिपत्य शोधन करने के पश्चात् मेष, वृष, कर्क, तुला, धनु व कुम्भ राशियों में फल नहीं है। अतः इन राशियों में जब मंगल का संक्रमण होगा तब उक्त कष्ट होगा।

**बुधाष्टक वर्ग के विचारणीय विषय :**

**ज्ञात्के सुहृद्बन्धुकुटुम्बमातुल-**
**वाणिज्यकर्मोक्तिहिरण्यजीवनम् ।**
**तच्चेतनावेश्मनि चिन्तयेल्लिपि-**
**धीमंत्रविद्याः कुशलो विचक्षणः ॥२३॥**

ज्ञादिति। ज्ञाद्बुधात् के चतुर्थे सुहृन्मित्रं बन्धुः सगोत्रः, कुटुम्बं परिजनं, मातुलो वाणिज्यकर्म व्यापारः, उक्तिर्वाक् हिरण्यं द्रव्यं, जीवनं वृत्तिरेतत्सर्वं कुशलश्चतुरो विचक्षणः पण्डितः चिन्तयेत्।

तदिति। लिपिर्लेखन क्रिया, धीर्बुद्धिः, मन्त्रविद्या इन्द्रजालगारुडीशाबरी-प्रभृति विद्यैतत्सर्वं तस्माद् बुधाद् चेतना वेश्मनि पंचमस्थाने चिन्तयेत्। तदुक्तं देवशालजातके—

'तत्पंचमे मंत्रविद्यालिपिबुध्यादिचिन्तयेत्।' इति

बुध से चतुर्थ स्थान में मित्र, बान्धव, कुटुम्ब, मामापक्ष, व्यापार, वचन, धन और आजीविका का विचार करना चाहिए। इसी प्रकार बुध से पांचवें स्थान में लेखन, बुद्धि, मंत्र शक्ति आदि का विचार किया जाना चाहिए।

यहां पर बुध की रेखाओं का विचार त्रिकोण व एकाधिपत्य शोधन के बाद ही पूर्ववत् करना चाहिए। केवल मंगल के लिए ही उक्त पृथक् व्यवस्था थी। शुभाशुभ का विचार कैसे किया जाएगा, यह प्रकार आगे के श्लोक में बताया जा रहा है।

**द्युसत्सु निक्षिप्य बुधाष्टवर्गं**
**फलैर्विदो बान्धवर्गैर्निहत्य।**

पिण्डं भभक्तोर्वरितोडुनीते
मृदौ वदेन्मातुलमित्रहानिम् ।।२४।।

द्युसत्स्विति। द्युसत्सु ग्रहेषु बुधस्य पूर्वोक्ताष्टकवर्गांकान् निक्षिप्य ततः पिण्डं विधाय विदो विद्वान् वान्धवगैश्चतुर्थगैः फलैः पिण्डं बुधस्य शुद्धपिण्डं निहत्य संगुण्य भभक्तो वरितोडुनि सप्तविंशत्या भाजयित्वा शेषतुल्यनक्षत्रे इते गते मृदौ शनौ तदा मातुला मातुर्भ्रातरो मित्राणि सुहृदस्तेषां हानिं क्षतिं वदेत्। तथा च देवशालः—

'बुधाष्टवर्ग संशोध्य शेषमृक्षं गते शनौ।
वन्धुमित्रविनाशादींल्लभते नात्र संशयः ।।' इति

पूर्वोक्त प्रकार से बुध का अष्टकवर्ग बनाकर उसका त्रिकोण व एकाधिपत्य शोधन कर लेना चाहिए। उन शोधित रेखाओं से ही फल कहा जाएगा।

बुध से चतुर्थ स्थान में जो राशि स्थित हो उसकी रेखा संख्या से मंगल के शोध्य पिण्ड को गुणा कर २७ से भाग देना चाहिए। जो शेष बचे उसके तुल्य अश्विन्यादि नक्षत्र में जब गोचर से शनि आए अथवा उस नक्षत्र से त्रिकोण नक्षत्रों में जब शनि आए तो मामा व मित्रों आदि की हानि कहनी चाहिए।

पूर्वोक्त उदाहरण में बुध तुला राशि में स्थित है। उससे चतुर्थ राशि मकर है। मकर में ५ रेखाएं हैं। इनसे बुध के शोध्यपिण्ड को गुणाकर २७ का भाग दिया तथा शेष का ग्रहण किया—

५×६२=३१०÷२७=लब्धि ११, शेष १३।

अश्विनी से गिनने पर तेरहवां नक्षत्र हस्त है। अतः हस्त में शनि आने पर अथवा हस्त से त्रिकोण नक्षत्रों श्रवण व रोहिणी में शनि आने पर मामा व मित्रादि की हानि समझी जाएगी।

**जीवाष्टक वर्ग के विचारणीय विषय :**

**वर्णानि वासांसि बहूनि चिन्तये-**
**च्छत्रं यशोयानसुतार्थसम्पदः।**
**पुष्टिं तनोः संविदमिज्यतस्ततो**
**विद्यासुतज्ञानलिपीर्वृषं सुते।।२५।।**

वर्णानीति । बहूनि विविधानि, वर्णानि श्वेतपीतादीनि, वासांसिवस्त्राणि, छत्रं, यशः, यानं, सुतीऽर्थो धनं, सम्पत्सम्पत्तिस्तनोः शरीरस्य पुष्टिः वृद्धिः, संविद् बुद्धिः। एतानि सर्वाणि इज्यतो गुरोश्चिन्तयेत् । ततस्तस्माद् गुरोः सुते पंचम-स्थाने विद्या, सुतः, ज्ञानं, लिपिः, वृषोधर्मः, एतत्सर्वं विचारयेत् । तथा च देवशालः—

'छत्रवाहनकीर्तिश्च वहुवर्णाम्बराणि च ।
गुरुणा देहपुष्टिं च वृद्धिपुत्रार्थसम्पदः ।।
गुरोरष्टकवर्गेषु सन्तानमपि कल्पयेत् ।
जीवात्पंचमतो ज्ञानं पुत्रधर्मधनादिकम् ।।' इति

भिन्न-भिन्न रंगों के वस्त्र, छत्र, कीर्ति, वाहन, पुत्र, धन, सम्पत्ति, शरीर की शक्ति तथा बुद्धि इन सबका विचार वृहस्पति से किया जाता है ।

गुरु की अधिष्ठित राशि से पंचम राशि में विद्या, पुत्र, बुद्धि, धर्म व लेखन क्रिया आदि का विचार करना चाहिए ।

**सन्तान संख्या का विचार :**

**गीष्पतिस्थितसुतालये फलं**
**यावतां दिविषदां प्रवर्त्तते ।**
**शत्रुनीचमपहाय शेषिता**
**नन्दना निगदिता मनीषिणा ।।२६।।**

गीष्पतीति । गीष्पतिर्गुरुस्तदधिष्ठितराशेर्यत्सुतालयं पंचमस्थानं तस्मिन् यावतां यद्रुन्मितानां दिविषदां ग्रहाणां, फलं प्रवर्तते विद्यते तेषु शत्रुनीचं शत्रु-ग्रहदत्तरेखां नीचराशिगत ग्रहदत्तरेखां च, अपहाय विहाय शेषा अवशिष्टाः मनीषिणा पण्डितेन, नन्दयन्तीतिनन्दनाः पुत्रा निगदिताः कथिता इति । तथा च देवशालः—

'गुरुस्थितसुतस्थाने यावतां विद्यते फलम् ।
शत्रुनीचग्रहं त्यक्त्वा तावन्तश्चसुताः स्मृतः ।।' इति

शेषास्तस्यात्मजाः स्मृता इति वा पाठः । गुरोः स्थित शुभस्थाने यावतां विद्यते फलम्, इति वा पाठान्तरः ।

जन्म समय बृहस्पति जिस राशि में स्थित हो उससे पंचम स्थान-गत राशि में जितने ग्रह रेखाप्रद हों उनमें से शत्रुगत व नीचराशिगत

ग्रहों को छोड़ देना चाहिए। तदनन्तर जितने ग्रह रेखाप्रद बचें उनकी रेखाओं के तुल्य पुत्र पुत्रियों की संख्या जाननी चाहिए।

गुरु के अष्टवर्ग में गुरु से पंचम स्थान में जो ग्रह रेखाप्रद हों उन्हें एकत्र लिख लीजिए। अब उनमें से जो-जो ग्रह अपने शत्रु की राशि या अपनी नीच राशि में स्थित हों उन्हें निकाल लीजिए। शेष ग्रहों की जितनी रेखाएं हों उनकी संख्या के तुल्य ही सन्तान संख्या होगी।

**जातकादेशमार्ग** में अस्तगत ग्रह को भी छोड़ने के लिए कहा गया है। इसके साथ ही वहां कहा गया है कि यदि कोई रेखाप्रद ग्रह उच्च-राशि या स्वराशि या मित्रराशि में स्थित हो तो उसकी रेखाओं को क्रमशः तीन गुना व दुगुना करके ही ग्रहण करना चाहिए।

तीसरी विशेष बात वहां यह बताई है कि रेखाप्रद ग्रहों में जो ग्रह पुरुष हैं उनको रेखाओं के तुल्य पुत्र और जितने स्त्रीग्रह हैं उनकी रेखाओं के तुल्य पुत्रियां होंगी।

निक्षिप्याष्टकवर्गकं सुरगुरोस्तत्पंचमे यावतां,
शुक्लाक्षाणि विहाय वैरिगृहगान् मूढांश्च नीचस्थितान्।
तावन्तस्तनया भवन्ति गुणना कार्या च तुंगादिषु,
प्रोक्ताः पुंवनिताः कृतत्वपुरुषस्त्री खेचराः कीर्तिताः॥"

(देखें जातकादेश, सन्तानचिन्ता०, श्लोक १७)

**सन्तान संख्या ज्ञान का द्वितीय प्रकार :**

**बृहस्पतिस्तुङ्गसुतालये यदि**
**तदा तनूजास्त्रिगुणा मता बुधैः।**
**त्रिकोणराशौ किमु नैजमन्दिरे**
**स तत्र पुत्रा द्विगुणाः सदीक्षिते॥२७॥**
**तत्रैव वृद्धिः कथितादपि स्मृता**
**यावन्मिता ओजगृहांशका विश:।**
**तावन्मिताः स्युर्यदि युग्मभांशका**
**ज्ञेया वशाः प्राणभृतां तदुन्मिताः॥२८॥**

बृहस्पतिरिति। तत्रेति च। यदि बृहस्पतिस्तुंगसुतालये उच्चगत; सन् पंचमस्थाने तिष्ठति तदा त्रिगुणास्तनूजाः पुत्रा बुधैर्मताः। किमु स गुरुस्तत्र पंचमस्थाने त्रिकोणराशौ मूल त्रिकोणराशौ धनुषीत्यर्थः। नैजमन्दिरे स्वगृहे तिष्ठति

तदा द्विगुणाः पुत्रा वाच्या। यत्र सुतालये पंचमस्थाने सगुरौसदीक्षिते शुभग्रहदृष्टे तत्रैव कथितादपि वृद्धिः स्मृता ज्ञेया।

तत्र सुतालये यावन् मिता यावन्त ओजगृहांशका विषमराशिनवांशाः स्युस्तावन्मिताविशः पुरुषाः स्युः। यदि तत्र युग्मभांशकाः स्युस्तदा प्राणभृतां तदुन्मितास्तावत्यो वशाः कन्या ज्ञेयाः। तथा च देवशालः—

'गुरुस्तुंगसुतस्थाने यदि स्याद् त्रिगुण तदा।
स्वर्क्षमूलत्रिकोणे वा यदिस्याद्द्विगुणं तदा॥
शुभदृष्टे च तत्रैव वृद्धिः स्यात्कथितादपि।
यावदोजर्क्षभागाश्च तावन्तःपुरुषा मताः॥
यावत्यो युग्मभागाश्च तावत्यस्तत्रकन्यकाः॥' इति

यदि जन्म लग्न से पंचम स्थान में बृहस्पति अपनी उच्च राशि कर्क में स्थित हो तो पूर्वोक्त प्रकार से आई सन्तान संख्या को तीन गुना कर लेना चाहिए।

यदि बृहस्पति पंचम स्थान में मूलत्रिकोण राशि अथवा स्वराशि में स्थित हो तो पूर्वागत संख्या को दुगुना कर लेना चाहिए। यदि उच्च-स्वमूल त्रिकोणादिगत गुरु पंचम स्थान में स्थित होकर शुभग्रहों से दृष्ट हो तो कही गई संख्या से भी अधिक सन्तान होने की सम्भावना होती है।

पंचम स्थान में जितने विषम राशि के नवांश हों उतने पुत्र व जितने समराशि के नवांश हों उतनी कन्याएं जाननी चाहिएं।

**तृतीय प्रकार :**

**संख्याङ्कभागप्रमिता तदीशितुः**
**स्थानप्रमाणाः सुतभेड्युतस्य वा।**
**पूज्याष्टवर्गे सुतराशिसंस्थित-**
**रेखाप्रमाणांस्तनया उदाहृताः॥२९॥**

संख्येति। सुतस्थानस्यांकभागप्रमिता नवांशतुल्या सन्ततेः संख्या स्यादिति शेषः। अथवा तदीशितुः पंचम स्वामिनोऽकभागप्रमिता नवांशतुल्या सन्ततेः संख्या स्यात्। अथवा सुतभेड्युतस्य पंचमेशयुक्तस्य स्थानप्रमाणाः रेखातुल्यतनयाः उदाहृताः। अथवा पूज्याष्टकवर्गे गुरोरष्टवर्गे सुतराशिसंस्थितरेखा प्रमाणाः पंचम स्थानस्थरेखातुल्यास्तनयाः पुत्रा उदाहृताः कथिताः। इत्यत्र प्रमाणशब्दोऽजहल्लिगं

तेन न नपुंसकलिंगैक वचनमस्ति वेदाः मनुयो वा प्रमाणमिति ज्ञापकात् । तथा च देवशालः—

'संख्या नवांशतुल्या स्यात्तदीशस्याथवा पुनः ।
सुतभेशनवांशैश्च समानावधि कल्पयेत् ।।' इति

पंचम स्थान में स्थित नवांश संख्या के तुल्य सन्तान होती है। अथवा पंचमेश की नवांश संख्या के तुल्य सन्तान होती है। अथवा पंचमेश जिस राशि में स्थित हो उस राशि में जितनी रेखाएं हों उनके तुल्य ही सन्तान होती है।

अथवा गुरु के अष्टक वर्ग में लग्न से पंचम स्थान में जितनी रेखाएं हों उतनी ही संख्या सन्तान की समझनी चाहिए।

**चतुर्थ प्रकार :**

**शोध्यावशिष्टानि फलानि वासव-**
**वन्द्याष्टवर्गेषु भवन्तु तेषु च ।**
**रेखा विहायाशुभखेचराश्रिताः**
**शेषाः स्मृतास्तस्य शरीरसम्भवाः ।।३०।।**

शोध्येति। वासव इन्द्रस्तस्य वन्द्यो वन्दनीयो गुरुस्तस्याष्टकवर्गेषु यावन्ति शोध्यावशिष्टफलानि भवन्तु तेषु, अशुभखेचराश्रिताः पापग्रहसहिता रेखाः फलानि विहाय हित्वाशेषास्तस्य शरीरसम्भवाः पुत्राः स्मृता ज्ञेया बुधैरितिशेषः। तथा च देवशालः—

गुरोरष्टकवर्गेषु शोध्यशेषफलानि च ।
क्रूराश्रितफलं त्यक्त्वा शेषास्तस्यात्मजाः स्मृताः ।। इति

मतान्तरे तु शोधनं विनैव गुरोः केवलाष्टकवर्गज़ फलं कथयितव्यम् ।

गुरु के अष्टक वर्ग में त्रिकोण शोधन कर बाद में एकाधिपत्य शोधन भी कर लें। अब पापग्रहों की रेखाओं का त्याग कर दें। शेष रेखा संख्या जाननी चाहिएं।

पूर्वोक्त उदाहरण में त्रिकोणैकाधिपत्य शोधन के पश्चात् वृष में १, कर्क में ४, कन्या में २ रेखाएं बची हैं। वृष व कर्क ग्रह रहित हैं तथा कन्या में सूर्य क्रूरग्रह स्थित है। अतः १+४+२=७ योग में कन्या राशि का फल २ घटाया तो शेष ५ संख्या सन्तान संख्या हुई।

**अल्प सन्तान का योग :**

**अंहोविहङ्गैर्व्ययवित्तबुद्धिगै-**
**र्जातस्य जन्तोस्तनुसन्ततिर्भवेत् ।**
**सूरौ सुतस्थेऽपि कृशात्मजस्तदा**
**तत्पेक्षिताढ्ये तनयं समादिशेत् ।।३१।।**

अंहो विहंगैरिति । यदा जातस्य जन्तोः जन्मसमयेऽहोविहंगैः पापग्रहैः, व्ययवित्तबुद्धिगैर्द्वादशद्वितीयपंचमस्थितैः सद्भिस्तदा तनु सन्ततिरल्पसन्ततिर्भवेत् । तथा च देवशालः—

'व्ययार्थसुतसंस्थैश्च पापैः स्यात्क्षीणसन्ततिः ।' इति
व्ययाष्टमगतैः पापैः क्षीणार्थो हीनसन्ततिः । इत्यपि पाठः ।

सूराविति । सूरौ गुरौ सुतस्थे पंचमस्थे सत्यपि तदा कृशात्मजः स्वल्पपुत्रः स्यात् । यथा देवशालः—

गुरोरष्टकवर्गेषु सुतराशिस्थितः समः ।
अल्पात्मजः स विज्ञेयो गुरौ पंचमगेऽपि वा ।। इति

तदिति । यदि तत्र गुरौ तत्पेक्षिताढ्ये पंचमेशेन युतेदृष्टे वा तदा तनयं पुत्रं समादिशेत् । तथा च देवशालः—

'तदीशयोगदृष्टे तु तदा पुत्रं समादिशेत् ।
एतैर्बहुप्रकारैश्च कल्पयेत्कालवित्तमः ।।
बहुलक्षणसंयोगे दशास्तस्मिन् समादिशेत् ।
वंशक्षयादियोगाश्च पुरस्ताद्वक्ष्यते मया ।।
पूर्वोक्तलक्षणेनात्र वंशभर्तुः समादिशेत् ।।' इति

यदि जन्म समय बारहवें, दूसरे व पांचवें स्थान में पापग्रह विद्यमान हों तो कम सन्तान होती है।

यदि बृहस्पति स्वयं पंचम स्थान में हो तो भी कम सन्तान होती है। यदि पंचम स्थानगत बृहस्पति पंचमेश से युत या दृष्ट हो तो कम सन्तान तो होगी, किन्तु पुत्र सन्तति कहनी चाहिए।

बृहस्पति सन्तान का कारक होने के कारण जब स्वयं पंचम सन्तान स्थान में स्थित होगा तो उस भाव का नाश करेगा। सामान्यतः कारक ग्रह यदि उसी भाव में स्थित हो जिसका कि वह कारक है तो उस भाव की हानि होती है। किन्तु शुभ ग्रहों की युति व दृष्टि अवश्य ही कुफल का निवारण करेगी।

देवशालजातक के उपर्युक्त उद्धरण के पाठान्तर में बताया गया है कि अष्टम व द्वादश स्थान में यदि पापग्रह स्थित हों तो मनुष्य धन रहित व अल्प सन्तति वाला होता है। कारण अष्टम ग्रह का केन्द्रीय प्रभाव पंचम पर पड़ेगा और साथ ही अष्टम भाव नवम का हानि स्थान है। नवम से सन्तति का विचार 'भावाद्भावम्' के सिद्धान्त से किया जाएगा। द्वादशस्थ पापग्रह पंचम स्थान से षडष्टक योग बनाएगा।

यदि कई प्रकार से भिन्न निष्कर्ष निकल रहे हों तो पिता की कुण्डली में वंशक्षयादि योग, क्लीवत्व योगादि भी आवश्यक रूप से करके बहुमतपक्ष का ग्रहण करना चाहिए।

**यदाऽष्टवर्गेषु निलिम्पमंत्रिण-**
**स्त्रिकं फलं नन्दनमन्दिरे भवेत्।**
**कृशात्मजो यस्य विशो जनाविति**
**समीरयेत्कोविददेवशालकः ॥३२॥**

यदेति। यस्य विशः पुरुपस्य जनौ जन्मनि निलिम्पमंत्रिणो गुरोरष्ट वर्गेषु यदा नन्दनमन्दिरे पंचमे त्रिकं फलं फलत्रयं भवेत्। तदा स नरः कृशात्मजोऽल्पपुत्रो भवेत्। इत्येवं कोविददेवशालः समीरयेत्कथयेत्। तद्वचनं यथा—

गुरोष्टकवर्गेषु सुतराशौ त्रिकं फलम्।
यस्याल्पतनयः स स्याद् देवशालः प्रभापते ॥ इति

सन्ततिसम्भवसमयमाह जातकादेशकारः—

पुत्रेशाश्रितभे तदंशकगृहे मान्द्याश्रितर्क्षे तदी-
यांशर्क्षे च तथा त्रिकोणभवनेष्वेषां च बह्वक्षके।
राशौ स्वाष्टकवर्गके च विचरन् जीवो भवेत्पुत्रदः।
पुत्रेशोऽत्रविचिन्त्यतां हिमकरा लग्नाच्च जीवादपि।' इत्यादीति ।

यदि गुरु के अष्टक वर्ग में गुरु की अधिष्ठित राशि से पंचम राशि में तीन ही रेखाएं हों तो वह अल्प सन्तान वाला होगा। ऐसा पण्डित देवशाल ने कहा है।

उक्त स्थिति म सन्तान का अभाव नहीं होगा। अर्थात् सन्तान तो अवश्य होगी, किन्तु कम। कम की सीमा क्या हो सकती है? एक या दो सन्तान। यह संख्या प्राचीन काल में तो कम अवश्य मानी जाती

रही होगी, किन्तु आज कल तो यह सर्वथा उपयुक्त है। अतः हमारे विचार से कालज्ञ ज्योतिषी को आधुनिक परिप्रेक्ष्य में ही अल्पता व अधिकता की व्याख्या करनी चाहिए।

अस्तु, सन्तान कब होगी ? इस विषय में **जातकादेशमार्ग** में बताया गया है—

१. पंचमेश जिस राशि में हो।

२. पंचमेश जिस नवांश राशि में हो।

३. मान्दि जिस राशि में हो।

४. मान्दि जिस नवांश राशि में हो।

उक्त चारों राशियों के स्वामी ग्रहों के अष्टकवर्ग में देखिए कि किन राशियों में अधिक रेखाएं हैं। सबसे अधिक रेखा वाली राशि में जब बृहस्पति गोचर से आएगा तब पुत्र उत्पन्न होगा। पंचमेश का विचार लग्न, चन्द्र लग्न व गुरु इन तीनों से करना चाहिए।

साथ ही उक्त राशियों से त्रिकोण राशियों को भी देखना चाहिए।

एक अन्य प्रकार भी बताया गया है—

१. जन्म समय बृहस्पति जिस राशि में स्थित हो, उसमें जब लग्नेश, पंचमेश व गुरु आएं अथवा उस राशि से त्रिकोण राशि में आएं तो सन्तान होती है।

२. जब पंचमेश, सप्तमेश व लग्नेश तीन एक साथ किसी राशि में हों तो सन्तानोत्पत्ति होती है।

(देखें, जातकादेश, सन्तान चिन्ता. श्लोक २४-२५)

**सन्तान के कष्टकारक समय का ज्ञान :**

**फलेन सूरेः सुतसद्मगेन**
**शोध्यावशिष्टं फलमर्च्चितस्य।**
**संगुण्य तारोद्धृतशेषभत्ये**
**तत्कोण आर्कौ तनयस्य कष्टम् ॥३३॥**

फलेनेति। अर्चितस्य गुरोर्यच्छोध्यावशिष्टं फलं शोध्यशेषाणां योगं सूरेर्गुरुतः सुतसद्मगेन पंचमस्थेन फलेन संगुण्य निहत्य तारोद्धृत शेषभस्थे सप्तविंशत्या विभक्ते सति तदा यदवशिष्टं तत्तुल्यभं प्राप्ते वा तत्कोणे (१०.१९) नक्षत्रे आर्कौ शनौ भवति तदा तनयस्य पुत्रस्य कष्टं दुःखं वाच्यमिति शेषः।

गुरु के अष्टक वर्ग में बृहस्पति से पंचम स्थान में जितनी रेखाएं हों, उनसे बृहस्पति के शोध्य पिण्ड को गुणा कर लेना चाहिए।

उक्त गुणनफल में २७ का भाग देने से जो शेष बचे उसके तुल्य संख्यक नक्षत्र में जब गोचर से शनि आता है तो पुत्र सन्तान को कष्ट होता है। अथवा उससे त्रिकोण नक्षत्रों में शनि हो तो कष्ट होता है।

पूर्वोक्त उदाहरण में बृहस्पति का शोध्य पिण्ड ५८ है। बृहस्पति से पंचम भावस्थ राशि का फल ३ है। इन्हें परस्पर गुणा कर २७ से भाग दिया—

५८×३=१७४÷२७=लब्धि ६ शेष १२।

अश्विनी से गणना करने पर बारहवां नक्षत्र उत्तरा फाल्गुनी है। इससे त्रिकोण नक्षत्र उत्तराषाढ़ व कृत्तिका है। अत: उक्त नक्षत्रों में शनि का गोचर होने पर पुत्र को कष्ट होगा।

**शुक्राष्टक वर्ग के विचारणीय विषय :**

**वीर्य्यं तथा भोगपदं वशाविशो-**
**र्गात्राणि पाणिग्रहणं च धोरणम्।**
**दैतेयवन्द्यात्परिचिन्तयेत्ततो-**
**ऽनङ्गस्थले चन्दनसृक्सुखाबला: ॥३४॥**

वीर्यमिति। वीर्यं बीजं तथा तेनप्रकारेण भोगस्य पदं गुप्तेन्द्रियम्। विशावशो:स्त्रीपुरुषयोर्गात्राणि शरीरावयवानि पाणिग्रहणं धोरणं वाहनं दैतेय वन्द्याच्छुक्रात् परिचिन्तयेत्। ततस्तस्माच्छुक्रादनंगस्थले सप्तमस्थाने चन्दनं मलयागिरिजं सृङ्माला, सुखं, अबला स्त्री, एतत्सर्वं चिन्तयेत्। तथा च देवशाल:—

शुक्रं विवाहकर्माणि भोगस्थानं च वाहनम्।
विहस्त्रीजनगात्राणि शुक्रेणैव निरीक्षयेत्॥
शुक्रात्सप्तमतो नारी सृक् चन्दनसुखादिकम्॥' इति

वीर्य, गुप्तेन्द्रिय, स्त्री व पुरुष का शरीर सौन्दर्य, विवाह, वाहन व सन्तानोत्पादन की क्षमता आदि का विचार शुक्र से करना चाहिए।

शुक्र से सप्तम स्थान में स्त्रीजनों, कामिनी स्त्रियों का सुख,

शरीर सौन्दर्य बढ़ाने वाले प्रसाधनों का उपयोग व उनकी प्रभावशीलता आदि का विचार करना चाहिए।

**खसत्सु निक्षिप्य सिताष्टवर्गं**
**विद्वांस्त्रिकोणं परिशोधयादौ।**
**एकाधिपत्यं तु विशोधयानु**
**फलानि भूयांसि च येषु येषु ॥३५॥**
**तेषु तेषु निकेतेषु धनं नीरजलोचनाम्।**
**सर्वंसहां तद्वशतः कथयेन्मतिमान्नृणाम् ॥३६॥**

खसत्स्विति। तेष्विति च खसत्सु सूर्यादिग्रहेषु सलग्नेषु सिताष्टवर्गं शुक्राष्टवर्गं पूर्वोक्तशुक्राष्टक वर्गाकांनित्यर्थः। निक्षिप्यप्रक्षिप्य शुक्राष्टकवर्गं विरच्य, आदौ पूर्वं त्रिकोणं परिशोधय, अनुपश्चात् एकाधिपत्यं विशोधय तदा येषु येषु निकेतेषु भवनेषु राशिषु इति यावत्। भूयांसि बहूनि फलानि रेखाः स्युस्तेषु तद्वशतः एकाधिपत्यशोध्यावशिष्टरेखावशतः मतिमान् पण्डितः नृणां मनुष्याणां धनं द्रव्यं, नीरजलोचनां स्त्रीं, सर्वंसहां भूमिं कथयेद् विनिर्दिशेत्। तथा च देवशालः—

भृगोरष्टकवर्गं च निक्षिप्याकाशचारिषु।
त्रिकोणशोधनं कृत्वा पश्चादेकाधिपत्यताम्।
येषु येषु फलानि स्युर्विशेषाणि च तत्र हि।
भूमिं कलत्रं वित्तं च तद्वशान्निर्दिशेन्नृणाम् ॥' इति

शुक्र के अष्टक वर्ग का निर्माण कर लेना चाहिए। तदनन्तर त्रिकोण शोधन व एकाधिपत्य शोधन कर लेना चाहिए। जिन-जिन राशियों में अधिक रेखाएं हों, उनमें जब गोचर से शुक्र आए तब धन, स्त्री तथा भूमि आदि की वृद्धि कहनी चाहिए।

**स्त्रियों की संख्या का ज्ञान :**

**काव्याङ्गनानायकयुक्तराशि-**
**रेखाप्तमानाः प्रमदा वदन्ति।**
**क्षेत्रैणचक्षुर्ग्रहणं च साम्यं**
**पृथ्वीपतीनां द्विगुणं निरुक्तम् ॥३७॥**

काव्येति। काव्यः शुक्रः अंगनानायकः सप्तमे शस्ताभ्यां युक्तौ यौ राशी तयो रेखा समाना रेखातुल्याः प्रमदाः स्त्री वदन्ति। क्षेत्रं कृषिस्थान स्त्री वा एणचक्षुर्ग्रहणं विवाहः, उभयोः साम्यं तुल्यता वाच्येति शेषः एतत्सर्वं पृथ्वीपतीनां राज्ञां द्विगुणं निरुक्तं कथितम्। तथा च देवशालः—

भृगुदारेशयुक्तर्क्षफलसंख्यास्त्रियो विदुः।
क्षेत्रस्त्रीग्रहणं साम्यं नृपस्य द्विगुणं तथा॥' इति

शुक्र और सप्तमेश जिस राशि में स्थित हों उनमें जितनी रेखाएं हों उतनी ही संख्या स्त्रियों की जाननी चाहिए। क्षेत्रादि भूमि व विवाह की संख्या तो राजाओं व साधारण लोगों की पूर्वोक्त प्रकार से जाननी चाहिए किन्तु राजाओं के विषय में भोग्या स्त्रियों की संख्या दुगुनी समझनी चाहिए। स्त्री संख्या के विषय में **जातकादेशमार्ग** में एक अन्य पद्धति बताई गई है—

१. शुक्र से सप्तम व नवम स्थान के स्वामी जहां स्थित हों और लग्न व चन्द्रमा से नवम भाव के स्वामी जहां हों वहां एकाधिपत्य शोधन के पश्चात जितनी रेखाएं शेष हों, उतनी ही स्त्रियां होती हैं।

२. सप्तमेश ग्रह के अष्टक वर्ग में शोधन के उपरान्त जितनी रेखाएं सप्तमेश की उच्च व नीच राशियों में हों उतनी स्त्रियां होंगी।

३. यदि सप्तमेश निर्बल हो तो उक्त प्रकारों से आई भिन्न संख्या में से कम संख्या को स्त्री संख्यक मानना चाहिए, यदि सप्तमेश बली हो तो अधिक संख्या लेनी चाहिए।

(देखें, भार्या विचार प्रकरण, श्लोक १७)

हमारे विचार से आजकल बहु विवाह प्रथा नहीं है। दो विवाह करना भी कानूनी अपराध है, तब दो से अधिक विवाह का तो प्रश्न ही क्या? अतः इस प्रकरण में या तो भोग्यास्त्रियों की संख्या का ग्रहण करना चाहिए अथवा सम्भावित परिस्थितियों में अन्य विवाह की स्थिति में स्त्री संख्या का विचार करना चाहिए। वैसे आजकल इतने अधिक विवाह तो दुष्कर ही हैं। अतः ऐसी स्थिति में सुविज्ञ दैवज्ञों को तादृक स्थलों की समयानुकूल व्याख्या कर लेनी चाहिए।

**प्रकारान्तर से स्त्री संख्या व स्वभाव का विचार :**

**अङ्गना भृगुजभागसम्मिताः**
**सद्गुणाः स्मरलवोन्मिताः किमु।**

**स्वीयनाथसमसद्‌गुणाः स्त्रियो**
**जन्मिनामिति वदन्ति सूरयः ॥३८॥**

अंगना इति। भृगुजः शुक्रस्तस्य ये भागा नवांशास्तैः सम्मितास्तुल्या र्थाच्छुक्रो यस्मिन्नवांशे तिष्ठति तस्य या संख्यास्तत्तुल्याः सद्‌गुणा उत्तम गुणा जन्मिनां प्राणिनामंगना स्त्रियः स्युरिति। किमु अथवा स्मरलवोन्मिता सप्तम- ावस्थनवांशसंख्यातुल्याः स्वीयनाथसमसद्‌गुणाः सप्तमस्य नवांशस्वामि- समानोत्तमगुणाः स्त्रियः स्युः इत्येवं सूरयः पण्डिता वदन्ति। तथा च ग्रन्थान्तरे—

सितांशक प्रमाणिकाः स्त्रियो भवन्ति सद्‌गुणाः।
उतस्मरांशसम्मिताः स्वनाथतुल्यसद्‌गुणाः ॥' इति

शुक्र जिस नवांश में हों, उतनी ही संख्या गुणवती स्त्रियों की समझनी चाहिए।

अथवा सप्तम भाव में जो नवांश हो, उसकी संख्या के तुल्य स्त्रियों की संख्या जानें। वे स्त्रियां पति की मनोनुकूल प्रकृति वाली होती हैं। इस प्रकार पण्डितों को विचार करना चाहिए।

**विवाह की दिशा का ज्ञान :**

**लब्धिः स्त्रियाः काव्यकलत्रगेहाद्**
**दारेशसंयुक्तदिगुद्‌भवायाः ।**
**आहो ततो नन्दनदैवराशे-**
**र्दिग्देशजायाः प्रमदाभिधायाः ॥३९॥**

लब्धिरिति। काव्यः शुक्रस्तस्माद्यत्कलत्रगेहं तस्य य ईशोऽर्थात् शुक्रात् सप्तमेशस्तेन संयुता या दिक् दिशा तस्यानुद्‌भवाया उत्पन्नायाः स्त्रियाः कलत्रस्य लब्धिः प्राप्तिर्वाच्या। आहोऽथवा ततस्तस्मात्सप्तमराशेर्नन्दनदैवराशेः पंचम- नवमराशेर्दिग्देशजाया दिशि देशे चोत्पन्नायाः प्रमदायाः लब्धि स्यात्। तथा च ग्रन्थान्तरे—

शुक्राद्यामित्रतो लब्धिर्दारेशान्वितदिग्भवा।
शुक्रजामित्रतो लब्धिस्त्रिकोणाद्‌देशदिक् स्त्रियः ॥' इति

शुक्र से सप्तम स्थान में जो राशि हो, उसका स्वामी अर्थात् शुक्र से सप्तमेश जिस दिशा में कुण्डली में स्थित हो उस दिशा से स्त्री की प्राप्ति होती है।

अथवा सप्तम स्थान से (शुक्र से सप्तम) त्रिकोण स्थानों (५,६) में स्थित राशि की दिशा से अथवा उस दिशा के देश में उत्पन्न स्त्री की प्राप्ति होती है।

यहां सर्वत्र शुक्र से सप्तम स्थान का ही ग्रहण है। राशियों का दिशा विभाग इस प्रकार है—

| पूर्व | दक्षिण | पश्चिम | उत्तर |
|---|---|---|---|
| मेष | वृष | मिथुन | कर्क |
| सिंह | कन्या | तुला | वृश्चिक |
| धनु | मकर | कुम्भ | मीन |

**जातकादेशमार्ग** में स्त्री प्राप्ति की दिशा का एक अन्य प्रकार भी बताया गया है।

१. सप्तम स्थान (लग्न से) में जो ग्रह स्थित हो या जो ग्रह सप्तम भाव पर दृष्टि डाल रहा हो उसकी दिशा से स्त्री की प्राप्ति होती है।

२. सप्तमेश स्पष्ट व शुक्र स्पष्ट जोड़ने से जो राशि आए उसकी दिशा से स्त्री मिलती है।

३. सप्तमेश व शुक्र के स्पष्ट राश्यंशों के योग से जो नवांश आए, वह यदि स्थिर राशि नवांश हो तो पास से, द्विस्वभाव राशि हो तो न दूर से और न बहुत पास से और चर राशि हो तो दूर से स्त्री की प्राप्ति होती है। (देखें भार्या विचार, श्लोक १३)

वहीं पर एक और विशेष बात बताई गई है—

'दारेशे बलसम्पूर्णे विवाहो धनिनां कुलात्।
बलहीने दरिद्राणां न स्याद् रूपवती च सा॥'

(वही, श्लोक १४)

'सप्तमेश यदि बलवान् हो तो विवाह धनी घराने से होता है। यदि सप्तमेश बलहीन हो तो विवाह निर्धन कुल से होता है और स्त्री भी रूपवती नहीं होती।'

यहीं पर प्रसंगवशात् विवाह का काल जानने का प्रकार भी उक्त ग्रन्थ से बता रहे हैं—

१. निम्नलिखित ग्रहों की दशा या अन्तर्दशा में विवाह हो जाता है—

(अ) सप्तम भावस्थ ग्रह, (आ) सप्तम भाव को देखने वाला ग्रह, (इ) उक्त दोनों ग्रहों से सप्तम भाव में स्थित ग्रह, (ई) उक्त ग्रहों के अधिष्ठित राशीश या अधिष्ठित नवांशेश, (उ) शुक्र जिस नक्षत्र में हो उसका स्वामी (ऊ) लग्नेश का नवांशेश।

२. कुछ लोगों के मत से राहु की दशा या अन्तर्दशा में भी विवाह हो जाता है।

३. जब शुक्र, लग्नेश व सप्तमेश सप्तमभावस्थ राशि में जाएं या सप्तमेश की अधिष्ठित राशि या इन दोनों राशियों से सप्तम राशि या नवम पंचम स्थानों में जाएं तो विवाह हो जाता है।

४. बृहस्पति का जब निम्नलिखित राशियों में गोचर हो तो विवाह हो जाता है—सप्तम भावस्थ राशि, सप्तम भावगत नवांश राशि या इन दोनों से त्रिकोण राशि।

इस प्रसंग में उक्त विचार चन्द्र लग्न व जन्म लग्न दोनों से करना चाहिए। (देखें वही, श्लोक, ३०-३२)

**स्त्री की जन्मराशि का ज्ञान :**

**योषिद्गृहे तत्पथिपुत्रभे वा**
**तत्पस्थराश्यात्मजवीक्षणे वा।**
**नीचोच्चभे तस्य वदन्ति केचि-**
**त्किं वा तदंशात्मजपुण्यराशौ ॥४०॥**

**शरीरजैवातृकयोस्तपोभे**
**समागमर्क्षे च तयोरुताहो।**
**राशिः कलत्रस्य तनूजशाली**
**तदन्यराशिर्यदि पुत्रहीनः ॥४१॥**

योषिदिति। शरीरेति। योषिद् गृहे सप्तम भावे पुंजन्मलग्नादिति शेषः। यो राशिर्विद्यते स एव कलत्रस्य स्त्रियो जन्मनो राशिर्ज्ञेयः। वा तत्पथि पुत्रभे तस्मात् सप्तमराशेः पंचमनवमराशौ स्त्रिया जननं वाच्यम्। वा तत्पस्थ राश्यात्मजभाग्यभे सप्तमेशो तस्मिन् राशौ तिष्ठति वा सप्तमेश स्थितराशे पंचम-

नवमराशौ जननं वाच्यम् । अथवा तस्य सप्तमेशस्य नीचोच्चभे जन्मवाच्यम् । इति केचित् वदन्ति। किं वा तदशांतमजपुण्यराशौ सप्तमेशो यस्मिन्नवांशे तिष्ठति पंचमनवमराशौ जन्म वाच्यम् । तथा च देवशाल:

'दाराधिपस्यं तत्क्षेत्रं दारजन्मर्क्षकं विदुः ।
तस्योच्चनीचराशौ वा केचिदिच्छन्ति तद्विदः ।।
तस्यांशकत्रिकोणे वा भार्यायाजन्मभं वदेत् ।।' इति

शरीरेति । शरीरं लग्नं जैवातृकश्चन्द्रस्तयोर्मध्ये यो बलवान् तस्मात्तपोभे नवमराशौ, उताहो तयोर्लग्नचन्द्रयोः समागमर्क्षे लग्नचन्द्राधिष्ठित राशावित्यर्थः । यदि कलत्रस्य स्त्रिया जन्मनो राशिर्भवेत्तदा तनूजशाली पुत्रवान् भवेत् । जात इति शेषः । यदि स्त्रियास्तदन्य राशिः प्रोक्तेतरराशिः स्यात्तदा पुत्रेणौरसेन, हीनो रहितो भवेदिति शेषः । यथा च देवशाल:—

'लग्नेन्द्वोर्भाग्यभं जन्मलग्नभं परिकीर्तितम् ।
तयो समागमर्क्षे च कल्पयेत्तत्र बुद्धिमान् ।। इति
उक्तप्रकारमार्गेण भार्याया जन्म लग्नभम् ।
प्रोक्तराशिर्यदा दारजन्मर्क्षं सन्ततिस्तदा ।
अनुक्तराशिजन्मर्क्षमस्ति चेन्नास्ति सन्ततिः ।।' इति

मनुष्य के जन्म लग्न से सप्तम स्थान में जो राशि हो वह स्त्री की जन्म राशि होती है।

सप्तम स्थान से त्रिकोण स्थानों में स्थित राशि स्त्री की जन्म राशि होती है।

सप्तमेश जिस राशि में स्थित हो, वह राशि भी उसकी जन्म राशि हो सकती है।

अथवा सप्तमेश की अधिष्ठित राशि से नवम पंचम राशि अथवा सप्तमेश की उच्च या नीच राशि अथवा सप्तमेश जिस नवांश में हो उससे त्रिकोण राशि में स्त्री का जन्म होता है। अथवा लग्न व चन्द्रमा में से जो अपेक्षाकृत अधिक बली हो उससे नवम भावस्थ राशि या लग्न राशि या चन्द्र राशि ही स्त्री की जन्मराशि हो तो वह मनुष्य पुत्रों वाला होता है। यदि उक्त राशियों में से किसी भी राशि में स्त्री का जन्म न हो तो वह मनुष्य पुत्रहीन होता है।

**जातकादेशमार्ग** में स्त्री की जन्म राशि ज्ञान का अलग प्रकार बताया गया है—

(१) सप्तमेश की अधिष्ठित राशि, (२) सप्तमेश के अधिष्ठित नवांश की राशि, (३) सप्तमेश की उच्च राशि, (४) सप्तमेश की नीच राशि, (५) शुक्र की अधिष्ठित राशि, (६) शुक्र की अधिष्ठित राशि से सप्तम राशि, (७) चन्द्रमा के द्वादशांश की राशि, (८) चन्द्रमा की द्वादशांश राशि से नवम पंचम राशि, (९) चन्द्राष्टक वर्ग में सर्वाधिक रेखा वाली राशि, (१०) समुदायाष्टक में सर्वाधिक रेखा वाली राशि। (११) लग्नेश की अधिष्ठित राशि या नवांश राशि, (१२) चन्द्राष्टक वर्ग में, चन्द्रराशि में जिस कक्ष्या में कक्ष्यापति के द्वारा रेखा दी गई हो, उस कक्ष्यापति की राशि।

उक्त राशियों में किसी एक राशि में मनुष्य की स्त्री का जन्म-होता है। यदि उक्त राशियों में स्त्री का जन्म हो तो वह सुख व समृद्धि देने वाली होती है। इसी प्रकार कन्या की राशि से पुरुष की राशि हो तो शुभ होती है। (देखें, भार्या विचार, श्लोक १५-१६)

इसी ग्रन्थ के आनुकूल्य प्रकरण, श्लोक ३७-३८ में एक और विशेष बात बताई गई है।

१. कन्या के चन्द्राष्टक वर्ग में, उस राशि में जो वर की जन्म-चन्द्र राशि हो, स्वयं चन्द्र अपनी कक्ष्या (२२°.३०' से २६°.१५') तक में रेखाप्रद हो तो दोनों एक दूसरे के लिए परम अनुकूल होते हैं।

२. कन्या के चन्द्र नवांश से वर का चन्द्र नवांश यदि ८८वां हो तो घोर कष्टकारक सम्बन्ध होता है।

एक नवांश का मान ३ अंश २० कला होता है तथा नक्षत्र के एक चरण का नवांश भी ३° २०' होता है। अतः सरल शब्दों में कहें तो देखिए कि कन्या का जन्म जिस नक्षत्र के जिस चरण में हुआ हो उससे ८८वें चरण में यदि वर का जन्म हो तो अशुभ सम्बन्ध होता है। माना किसी का जन्म आर्द्रा के द्वितीय चरण में हुआ तो अश्विनी के द्वितीय चरण (८८वां) में वर का जन्म हो तो सम्बन्ध अशुभ होगा।

**स्त्री जन्म राशि ज्ञान का अन्य प्रकार :**

**स्थानाधिकं यत्र गुरोः सुरारे-**
**श्चेत्तत्र जायाजननं नराणाम्।**
**वंशाभिवृद्धिं प्रवदन्ति तस्यां**
**स्यात्क्षीणसन्तानधनं फलेऽल्पे॥४२॥**

स्थानाधिकमिति। यत्र यस्मिन्राशौ सुरारेर्गुरोः शुक्रस्याष्टकवर्गे स्थानाधिकं फलाधिकं भवति चेत्तत्र नराणां मनुष्याणां जायायाः स्त्रिया जननं जन्म स्यादिति शेषः। तस्यां भार्याया वंशाभिवृद्धि कुलवृद्धि प्रवदन्ति कथयन्ति (दैवज्ञाः)। अल्पे फले न्यूनफले राशौ यदि स्त्रिया जननं स्यात्तदा क्षीणं कृशमल्पं सन्तान सन्ततिर्धनं द्रव्यं स्यात्। तथा च मंत्रेश्वरः—

फलाधिकं भृगोर्यत्र तत्र भार्याजनिर्यदि।
तस्यां वंशाभिवृद्धिः स्यादल्पे क्षीणार्थसन्ततिः॥' इति

शुक्र के अष्टक वर्ग में जिस राशि में सबसे अधिक रेखाएं हों, यदि उसी राशि में स्त्री का जन्म हो तो वह कुल की वृद्धि करने वाली होती है।

यदि कम रेखा वाली राशि में स्त्री का जन्म हो तो मनुष्य की सन्तान व धन कम होता है।

**स्त्री लक्षण का ज्ञान :**

**स्वभस्थितः स्वतुङ्गगः स्वमित्रभांशगोऽपि वा।**
**तदीशिता यदा ततो वदेत्कलत्रलक्षणम्॥४३॥**

स्वभस्थित इति नगस्वरूपिण्येति छन्दः। यदा तदीशिता पुंजन्मलग्न-राशितः सप्तमराशिस्वामीत्यर्थः। स्वभस्थितः स्वराशिगतः, स्वतुंगगोवाऽथवा स्वमित्रभांशगोऽपि ततस्तस्माद्धेतोः कलत्रस्य स्त्रिया लक्षणं चिन्हं स्वरूपादिक-मिति यावत् वदेद् दैवज्ञ इति। तथा च देवशालः—

स्वक्षेत्र स्वोच्चगो वापि स्वमित्रर्क्षगतोऽपिवा।
स्वमित्रांशगतो वापि वक्तव्यं दारलक्षणम्॥' इति

यदि सप्तमेश अपनी राशि में, अपने उच्च मित्र की राशि में या अपने नवांश में स्थित हो तो उसके स्वरूप से ही स्त्री के स्वरूप लक्षणादि का विचार करना चाहिए।

आशय यह है कि उस ग्रह का जो शील स्वभाव, प्रकृति आकृति वर्ण आदि होगा तदनुसार ही स्त्री का स्वरूप समझना चाहिए। **प्रश्न मार्ग** नामक ग्रन्थ में इस विषय में कुछ विशेष बताया गया है। स्त्री के विचार में निम्नोक्त विषयों को उपकरण के रूप में प्रयोग करना चाहिए—

'सप्तम स्थान, सप्तमेश, सप्तम भाव द्रष्टा, सप्तमस्थ ग्रह एवं शुक्र।' **प्रश्नमार्गकार** का स्पष्ट मत है कि सप्तमेश ग्रह के गुणों की अनुकूलता पत्नी में स्पष्ट दृष्टिगोचर होतो है।

स्वस्वामिभूतामनुगुणस्वभार्यां कुर्युरङ्गनानाम्।
मेषाद्याः द्यूनगाः पुंसां स्वभावः सोऽथ कथ्यते।"

(अध्याय २०, श्लोक ४)

'सप्तम स्थान में स्थित राशि अपने स्वामी के गुणों के अनुकूल स्वभाव पत्नी को प्रदान करती है। अतः अब सप्तमगत राशि के आधार पर स्वभाव निरूपण किया जा रहा है।'

यहीं पर आगे प्रश्नमार्गकार कहते हैं कि सप्तम में स्थित राशि से मेषादि क्रम से स्त्रियों का स्वभाव निर्दिष्ट कर रहा हूं।

| **सप्तमस्थ राशि** | **स्त्री का स्वभाव** |
|---|---|
| मेष | देवताओं का दर्शन करने में तत्पर। |
| वृष | श्रेष्ठ अन्न-पानादिक देने वाली। |
| मिथुन | वर्तनों को खूब साफ रखने वाली। |
| कर्क | स्नान, वस्त्राभूषणों की शौकीन। |
| सिंह | सुगन्धि से प्रेम करने वाली। |
| कन्या | बर्तन आदि घरेलू उपकरणों का संग्रह करने वाली। |
| तुला | गम्भीर व चतुर वाणी वाली। |
| वृश्चिक | बात न मानने वाली। |
| धनु | शास्त्रों के श्रवण की इच्छुक। |
| मकर | सदा निकटता चाहने वाली। |
| कुम्भ | अन्य लोगों से चीजें लेकर संग्रह करने वाली। |
| मीन | अच्छे कार्य वाली व वाक्चतुर। |

**(वही, श्लोक ५)**

आगे पुनः प्रश्नमार्गकार कहते हैं कि सप्तम में गुरु या शुक्र हों तो पत्नी सुन्दर होती है।

यदि सप्तम में अन्य ग्रह हों तो कैसे विचार करें। एतदर्थं सप्तमेश का अधिष्ठित नवांशेश एवं सप्तमेश की अधिष्ठित राशि का स्वामी, इन दोनों में से जो बली हो तदनुसार स्त्री के स्वरूपादि का विचार करना चाहिए।

अथवा शुक्र, सप्तमेश व सप्तम स्थान इन तीनों में से जो बली हो तदनुसार ही स्त्री का बाह्य व्यक्तित्व होता है।

कुछ विशेष शुभ योग भी प्रश्नमार्गकार ने बताए हैं—

१. शुक्र से नवम स्थान में शुभ ग्रह हो तथा शुक्र से नवमेश बलवान् हो तो पत्नी भाग्यवान्, सुपुत्रों वाली और धार्मिक स्वभाव वाली होती है।

२. सप्तमेश शुभ ग्रह हो तथा वह शुभ ग्रहों से युत या दृष्ट हो अथवा सप्तमेश जिस राशि में हो, उससे ५, ९, ७, ११ स्थानों में शुभ ग्रह हों या कोई अन्य बली ग्रह हो।

उक्त परिस्थिति में स्त्री व पुरुष दोनों सुखी व सुपुत्रवान् होते हैं। इसके विपरीत स्थिति में स्त्री बांझ या रोगिणी होती है।

३. सप्तम भाव पर अपने स्वामी की दृष्टि हो या सप्तमेश स्वयं सप्तम में स्थित हो।

अथवा सप्तमेश बलवान् होकर शुक्र से शुभ भावों में बैठा हो तो मनुष्य की पत्नी सम्पत्ति देने वाली होती है। अर्थात् स्त्री धन कमाने वाली तथा सम्पत्तिप्रद होती है।

(देखें, प्रश्न मार्ग, अ० २०,श्लोक २७-३२)

**दानवार्चितलवप्रमाऽबला**
**वर्णरूपगुणसंयुताऽथवा ।**
**यामिनीरमणभागसम्मिता**
**मारमन्दिरपतेर्गुणान्विता ॥४४॥**

दानवेति। दानवार्चितः शुक्रस्तस्य यो लवो नवांशराशिस्तस्य प्रमातुल्या, वर्णेन गौरादिकेन, रूपेणसौन्दर्येण, गुणेन शौर्यादिना, संयुता सहिता, अबला स्त्री, नराणामिति शेषः। अथवा यामिनीरमणश्चन्द्रस्तस्य यो भागो नवांशस्तस्य सम्मिता तुल्या, मारमन्दिरं सप्तमस्थानं, तस्य पते स्वामिनो ये संज्ञाध्यायोक्त गुणास्तैरन्विता युक्ता स्त्रीति शेषः। तथा च ग्रन्थान्तरे—

शुक्रांशकसमाना स्त्री वर्णरूपगुणान्विता।
भवेच्छशांकतुल्या वा दारेशस्य गुणान्विता।।' इति

शुक्र की नवांश राशि के समान स्त्री का रंग रूप जानना चाहिए।

अथवा चन्द्रमा जिस नवांश में स्थित हो उसके स्वामी व सप्तमेश के मिश्रित गुणों के आधार पर स्त्री के रूपादि का विचार चाहिए।

**स्त्री के कष्टकारक समय का ज्ञान :**

**शनौ कवेः कोणगते न शस्तं**
**तथाविधे देवगुरावसौख्यम्।**
**बलाबलत्वेन वदन्ति तेषां**
**विचक्षणा लक्षणमङ्गनायाः ।।४५।।**

शनाविति। कवेः शुक्रात्, कोणगते पंचमनवमराशिगते, शनौ सति तदा शस्तं शुभं न स्यादिति। तथाविधे देवगुरौ बृहस्पतौ सति चेत्तदा असौख्यं स्त्रिया इति शेषः। तेषां स्त्री कारकग्रहाणां बलाबलत्वेन विचक्षणा पण्डिता अंगनाया स्त्रिया लक्षणं चिह्नादि वदन्ति। तथा च ग्रन्थान्तरे—

शुक्रान्मन्दे त्रिकोणस्थे नेष्टं जीवेऽसुखप्रदम्।
तेषां बलाबलत्वेन भार्याया लक्षणं वदेत्।
एवमादिफलं ज्ञात्वा निर्दिशेच्छुक्रवर्गतः।" इति

शुक्र से त्रिकोण में यदि शनि हो तो पत्नी के लिए अशुभ फल देने वाला होता है।

शुक्र से त्रिकोण में यदि बृहस्पति हो तो कष्टकारक होता है। स्त्रीकारक ग्रहों की सबलता व निर्बलता का विचार भी स्त्री के प्रसंग में कर लेना चाहिए। यह समस्त विचार शुक्र के अष्टक वर्ग से करना चाहिए।

**नीच स्त्री गमन योग :**

**भार्गवे यमलवे यमयुक्ते**
**मित्रपुत्रनिलये किमु काव्ये।**
**साधखेट उताधरभागे**
**भोगमिच्छति नताङ्ग्यनार्य्याः ।।४६।।**

भार्गव इति। भार्गवे शुक्रे यमलवे शन्यंशके मकरांशे कुम्भांशे वा, यमेन शनिना युक्ते सति, किमु काव्ये शुक्रे, मित्रः सूर्यस्तस्य पुत्रः शनिस्तस्य निलये गृहे वेत्यर्थः। उताथवा काव्ये शुक्रे, साघखेटे पापग्रहयुक्तेऽग्रभागे नीचनवांशे वर्तमाने सति तदा, नताह्वय नार्याः नीचस्त्रिया भोगमिच्छति वाञ्छति जनः। तथा च ग्रन्थान्तरे—

मन्दांशे मन्दसंयुक्ते मन्दक्षेत्रेऽथवा भृगौ।
नीचांशे पापसंयुक्ते नीचस्त्रीभोगमिच्छति ॥' इति

यदि शुक्र मकर या कुम्भ के नवांश में स्थित हो या शुक्र शनि से युक्त हो अथवा मकर या कुम्भ राशि में शुक्र स्थित हो।

अथवा शुक्र अपने नीच अर्थात् कन्या के नवांश में हो या वह पापग्रह से युक्त हो।

उक्त योगों में उत्पन्न मनुष्य नीच स्त्री से सम्भोग की इच्छा करता है।

प्रश्नमार्गकार ने उक्त योगों के अतिरिक्त शुक्र की नीच राशि में स्थिति होने पर भी उक्त फल को माना है।

(अध्याय २०, श्लोक १६)

**पुरुष के व्यभिचारी होने के योग :**

**वसुधाभवभागयुतोऽथवा**
**वसुधाभवराशिसमाश्रितः ।**
**वसुधात्मभवेन युतेक्षितः**
**परदाररतो यदि भो भवी ॥४७॥**

वसुधेति। यदि भः शुक्रो वसुधाभवभागयुतो मंगलनवांशगतः, अथवा वसुधाभवराशि समाश्रितो भौमराशिगतः सन् वसुधात्मभवेन भौमेन युतेक्षितो वा तदा भवी जन्मी परदाररतोऽन्यस्त्रीगामी भवेदिति शेषः। तथा च ग्रन्थान्तरे—

भौमांशगते शुक्रे भौमक्षेत्रगतेऽथवा।
भौमेन युक्तदृष्टे च परस्त्रीभोगमिच्छति ॥' इति

अन्यत्रापि—

मेदिनीतनयभागनिवासी, मेदिनीभवनिकेतन युक्तः।
मंगलेक्षणयुतः सितस्तदाऽन्यसुन्दरपरांगनारतः ॥' इति

यदि शुक्र मंगल के नवांश या मंगल की राशि में हो अथवा मंगल से युत या दृष्ट हो तो वह मनुष्य पराई स्त्री में आसक्त होता है।

इस योग का फल प्रश्नमार्गकार ने कुछ और बताया है।

भौमक्षेत्रे तदंशे वा तद्दृष्टो वाऽथ तद्युतः।
शुक्रो यस्य भवेत्पुंसः क्रूरमिच्छति साङ्गना ॥
(प्रश्नमार्ग, अ० २० श्लोक १५)

'मंगल के क्षेत्र, नवांश में या मंगल से युत दृष्ट शुक्र होने पर मनुष्य की पत्नी क्रूर पुरुष ? को चाहती है।'

'क्रूर पुरुष' यह अर्थ प्रश्नमार्ग के हिन्दी व अंग्रेजी टीका में बताया गया है। स्पष्ट है कि पुरुष शब्द का यहां अध्याहार किया गया है। यदि हम रमण, संभोग या अन्य किसी पर्याय का अध्याहार करें तो अर्थ होगा कि वह स्त्री संभोग के समय क्रूरता (आक्रामकता, तीव्रता या प्रगल्भता) की इच्छा करती है। मंगल का प्रभाव पराक्रम प्रदर्शन में निहित होता है। अतः सम्भोग के समय रमण शूरता अर्थ संगत ही रहेगा।

किन्तु संस्कृत टीका में दो उद्धरण दिए गए हैं जो मूल ग्रन्थकार के सम्मत अर्थ का समर्थन कर रहे हैं। यह विरोधात्मक फल विद्वानों द्वारा निर्णेय है क्योंकि दोनों आधार प्रामाणिक हैं।

**स्त्री के व्यभिचारिणी होने का योग :**

**यस्याङ्गिनोऽनङ्गगृहे कुजांशे**
**पातङ्गिभांशेऽस्त्रयमेक्ष्यमाणे ।**
**तत्स्त्रीत्वरी वारवधूश्च दासी**
**वा चञ्चलानायकतोषनिघ्नी ॥४८॥**

यस्येति। यस्य अंगिनो नरस्यानंगगृहे सप्तम भवने, कुजांशे मंगलस्य नवांशे, पातंगिभांशे शनिराश्यंशे वा अस्त्रयमेक्ष्यमाणे भौमशनिदृष्टे सति चेत्तदा तस्य जातस्य स्त्री भार्या इत्वरी अभिसारिका भवतीति।

दासी दासपत्नी वा चचंला वा नायकतोषनिघ्नी पति सन्तोषहंत्री भवेदिति शेषः। तथा च ग्रन्थान्तरे—

'दारागारे मन्दभांशे कुजांशे, मन्दाराभ्यां वीक्षिते यस्य पुंसः।
स्यात्तद्दारा जारिणी चंचला वा, वेश्या दासी स्वामिसन्तोषनिघ्नी ॥' इति

यदि सप्तम स्थान में शनि की राशि या नवांश हो या सप्तम में मंगल का नवांश हो और शनि मंगल की वहां दृष्टि हो तो ऐसे व्यक्ति

की पत्नी वेश्या, दासी, चंचल स्वभाव वाली या पति को रुष्ट करने वाली होती है।

इस विषय में **प्रश्नमार्ग**कार ने शुक्र के प्रसंग से भी स्त्री के व्यभिचार आदि का विचार किया है—

"चरराशिगतः शुक्रः पापमध्यगतो यदि।
मन्ददृष्टोऽथवायुक्तो भ्रष्टा स्यादस्य भामिनी॥'

(प्रश्नमार्ग, अध्याय २०, श्लोक १४)

यदि शुक्र चरराशि में स्थित हो तथा वह दो पापग्रहों के मध्य में हो तथा शनि दृष्ट या युक्त हो तो पुरुष की स्त्री भ्रष्ट आचरण करने वाली होती है।'

हमारे विचार से स्त्री के चरित्रादि विवेक में सावधानीपूर्वक गवेषणा करने की आवश्यकता होती है। प्रायः कर्क लग्न में उत्पन्न व्यक्तियों का दाम्पत्य जीवन सौम्य नहीं होता। कारण, इनके सप्तम स्थान में शनि की राशि होती है। अतः कर्क लग्नोत्पन्न व्यक्तियों की पत्नियां व्यभिचार करने वाली होंगी, ऐसा सामान्य नियम लोक दृष्ट नहीं है। अतः केवल शनि की राशि व शनि का नवांश सप्तमगत होने पर तथा शनि से दृष्ट व युत होने पर मनोनुकूल पत्नी की अप्राप्ति, उसका उग्र स्वभावादि फल तो कहे जा सकते हैं; किन्तु व्यभिचार जैसा उग्र फल घटित होने के लिए सप्तमेश, सप्तगत ग्रह व द्रष्टा ग्रह एवं शुक्र आदि की स्थिति सम्मिलित रूप से विचारणीय होनी चाहिए।

जातकादेशमार्ग में स्त्रीव्यभिचार के कुछ योग और भी बताए हैं—

"....अन्योन्यांशगयोः सितावनिजयोरन्यप्रसक्तांगना।
द्यूने वा यदि शीतरश्मिसहिते भर्तुस्तदानुज्ञया॥"

(जातकादेश मार्ग, भार्या विचार० श्लोक २५)'

'यदि शुक्र व मंगल एक दूसरे के नवांश में हों तो स्त्री पर पुरुष में आसक्त होती है।

यदि सप्तम स्थान में चन्द्रमा, मंगल व शुक्र ये तीनों ग्रह हों तो पत्नी अपने पति की सहमति से परपुरुष संग करती है।

यहीं पर श्लोक ४ में एक और योग बताया है—

"....सौम्ये नीचारातिभे सप्तमस्थे ।
भार्या दुष्टा जारिणी वैशिकी वा ॥"

'यदि सप्तम स्थान में सौम्य ग्रह नीच या शत्रु राशि में हों तो पत्नी जारिणी (परपुरुषगामिनी) या वेश्या होती है।'

**स्त्री के कारण शोक व विपत्ति के योग :**

**असाधुयुक्तांशगते सुधाकरे-**
**ऽवसानयाते किमनङ्गगेऽपि वा ।**
**सिते सपापे प्रमदानिमित्ततः**
**शुचं तथापत्तिमुपैति जन्मभृत् ॥४६॥**

असाध्विति । सुधाकरे चन्द्रेऽसाधुयुक्तांशगते पापारूढांशगेऽवसानयाते व्ययस्थानस्थिते किमथवाऽनंगगे सप्तमभावगतेऽथवासिपे शुक्रे सपापे पापसहिते सति तदा प्रमदानिमित्ततः स्त्रियाः कारणेन जन्मभृत् मनुष्यः, शुचं शोकं तथापत्ति विपत्तिमुपैति लभते । तथा च ग्रन्थातरे—

सपापभागगे विधौ व्ययेऽंगनालयेऽपि चेत् ।
सपापभार्गवेऽंगना निमित्ततः शुचापदम् ॥' इति

पापग्रह युक्त नवांश में ही यदि चन्द्रमा स्थित हो और वह व्यय स्थान या सप्तम स्थान में हो।

अथवा शुक्र पापग्रह से युक्त हो तो मनुष्य को स्त्री के कारण शोक तथा विपत्ति का सामना करना पड़ता है।

इस विषय में **प्रश्नमार्गकार** ने जब शुक्र पापमध्यत्व में हो तब स्त्री कारण से विपत्ति को माना है। यह विपत्ति स्त्री की मृत्यु के बाद उत्पन्न कठिन पारिवारिक परिस्थितियां भी हो सकती हैं। वहां पर उल्लिखित योगों का सार निम्नलिखित है—

(i) शुक्र दो पापग्रहों के अन्तराल में शुभग्रहों की दृष्टि या युति से रहित हो तो पत्नी के कारण विपत्ति होती है या पत्नी की मृत्यु होती है।

(ii) शुक्र से चतुर्थ और अष्टम स्थान में यदि पापग्रह हो तथा वहां शुभयुति या दृष्टि न हो तो भी उक्त फल होता है।

(iii) जिस व्यक्ति की कुण्डली में सप्तम स्थान में सूर्य व राहु साथ

हों तो उसे स्त्री के कारण सर्वस्वनाश का सामना करना पड़ता है।

(प्रश्नमार्ग, अध्याय २०, श्लोक ११-१३)

**स्त्री के कष्टकारक समय का ज्ञान :**

**बलेर्गुरोः शोध्यकशेषयोगं**
**तस्मात्कलत्रस्थफलेन हन्यात्।**
**विभज्य भैः शेषितमृक्षमाप्ते**
**मन्देऽङ्गनाकष्टमुत त्रिकोणे ॥५०॥**

बलेरिति। बलेर्गुरोः शुक्रस्य शोध्यकशेषयोगं, एकाधिपत्यशोध्यावशिष्ट-रेखायोगं, तस्माच्छुक्रादर्थाच्छुक्राधिष्ठितराशेर्यः सप्तमो राशिस्तत्र स्थितफलेन हन्याद् गुणयेत्। ततो भैः सप्तविंशत्या विभज्य विहृत्य शेषितं ऋक्षं नक्षत्रमाप्ते मन्दे उताथवा त्रिकोणे दशमैकोनविंशतिभे याते शनौ अंगनायाः स्त्रिया कष्टं दुःखं वाच्यमिति।

शुक्र के शुद्ध पिण्ड को शुक्र से सप्तम भाव में स्थित रेखायोग से गुणा करके २७ का भाग देना चाहिए। तब शेष संख्या के तुल्य अश्विन्यादि नक्षत्र में जब गोचर से शनि आए या उक्त नक्षत्र से त्रिकोण नक्षत्रों में जब शनि आए तो व्यक्ति की पत्नी को कष्ट होता है।

पूर्वोक्त उदाहरण में शुक्र तुला राशि में स्थित है। शुक्र से सप्तम राशि मेष है। मेष का रेखायोग ४ व शुक्र का शुद्ध पिण्ड १८३ है। इन्हें परस्पर गुणा करके २७ से भाग दिया—

१८३×४=७३२÷२७=लब्धि २७, शेष ३ अश्विनी से तीसरा नक्षत्र कृत्तिका है। कृत्तिका से त्रिकोण नक्षत्र उत्तराफाल्गुनी व उत्तराषाढ़ा है। अतः कृत्तिका, उ०फा०, उ०षा० में जब गोचर से शनि आएगा तो जातक की स्त्री को कष्ट होगा।

**तन्यष्टक वर्ग के विचारणीय विषय :**

**स्वस्यायुष्यं जीवनोपायमृत्यू**
**दुःखं शोकं सर्वनाशं सुभीतिम्।**

**भास्वद्भूतश्चिन्तयेत्तद्विनाशे**
**क्लेशाद्यायुश्चिन्तनीयं ग्रहज्ञैः ।।५१।।**

स्वस्येति। स्वस्यात्मन आयुष्यमायुः, जीवनस्य वृतेरुपायं साधनं, मृत्युं दुःखं, शोकं, सर्वनाशं सकलवस्तुनाशं, सुभीतिमतिभयं एतत्सर्वं भास्वद् भूतः शनेश्चिन्तयेद् विचारयेत्। तथा च देवशालः—

'आयुष्यं जीवनोपायं दुःखशोकमहद्भयम्।
सर्वक्षयं च मरणं मन्देनैव निरीक्षयेत्।।
बलहीना ग्रहा ये स्युर्जन्मकाले नृणां सदा।
ग्रहोक्तफलभिन्नाः स्युर्विपरीतं शनेः फलम्।।
स्वेषु स्वेष्वटवर्गेषु ग्रहोक्तफलमादिशेत्।
अष्टवर्गाहिते तस्मिन् दशा ज्ञातुं न शक्यते।।' इति

तदिति। तस्मान्मन्दाधिष्ठितराशेर्यद्विनाशमष्टमस्थानं तस्मिन् क्लेशादि, आयुः, ग्रहज्ञैश्चिन्तनीयं जातस्येति शेषः। तथा च देवशालः—

मन्दादष्टमतश्चायुः क्लेशाद्यं तु विचिन्तयेत्। इति

आयु अर्थात् जीवन की अवधि, आजीविका का साधन, मृत्यु, दुःख, शोक, सर्वस्वनाश और अत्यन्त भय, विपत्ति आदि का विचार शनि से करना चाहिए।

जन्म कुण्डली में शनि जिस राशि में स्थित हो, उससे आठवीं राशि से उक्त विषयों का विचार करना चाहिए।

**मृत्यु समय का परिज्ञान :**

**निक्षिप्य पङ्‌क्‍वष्टगणं ग्रहेषु**
**कलेवरात्कालगतैः फलैस्तत्।**
**संताड्यपिण्डं विभजेद्भसंख्यैः**
**शेषोन्मितर्क्षे मृदुगेऽर्च्चितेऽन्तः ।।५२।।**

निक्षिप्येति। ग्रहेषु सूर्यादिषु सलग्नेषु, पंग्वष्टगणं शन्यष्टवर्गं निक्षिप्यार्थान्मन्दाष्टकवर्गं निर्माय, ततस्त्रिकोणैकाधिपत्यशोधनं कृत्वा ततः पिण्डानयनरीत्या पिण्डं विधाय तत्पिण्डं कलेवराच्छनेर्लग्नात्कालगतैरष्टमस्थैः फलैः रेखाभिः सन्ताड्य संगुण्य, भसंख्यैः सप्तविंशत्या विभजेद् हरेत्। शेषोन्मितर्क्षे शेषतुल्यनक्षत्रे, मृदुगे शनावर्चिते गुरौवाऽऽगच्छति तदान्तो मृत्युः स्यात्। तथा च देवशालः—

शनेरष्टकवर्ग च निक्षिप्याकाशचारिषु ।
त्रिकोणैकाधिपत्यर्क्षं शोधनं विरचय्य च ॥
पिण्डं संस्थाप्य गुणयेल्लग्नादष्टमगैः फलैः ।
सप्तविंशतिहृच्छेषं मृत्युकालंवदेदबुधः ॥' इति

जन्मकालीन ग्रहों की स्थिति के आधार पर शनि का अष्टकवर्ग बना लेना चाहिए। तत्पश्चात् त्रिकोण शोधन व एकाधिपत्य शोधन कर लेना चाहिए। तब शनि के शोध्यपिण्ड को, शनि की अधिष्ठित राशि से अष्टम राशि के रेखा योग से गुणा करना चाहिए। इस गुणनफल को २७ से भाग देकर बची शेष संख्या तुल्य अश्विन्यादि नक्षत्र में या इस नक्षत्र से त्रिकोण नक्षत्रों में शनि या बृहस्पति आए तो मनुष्य मृत्यु को प्राप्त होता है।

मृत्यु का प्रकार, कारण व आयु की अवधि आदि का विस्तृत व प्रामाणिक विवेचन हम **आयुर्निर्णय** नामक ग्रन्थ के अभिनवभाष्य में कर चुके हैं। यह ग्रन्थ रंजन पब्लिकेशन्स दरियागंज, नई दिल्ली से प्रकाशित हो चुका है।

प्रस्तुत विषय को समझने के लिए पूर्वोक्त उदाहरण को लिया। वहां शनि मीन राशि में स्थित है। मीन से अष्टम राशि तुला है। तुला का रेखायोग १ है। शनि के शुद्ध योग पिण्ड १८२ को इससे गुणा कर २७ से भाग दिया—

१ × १८२ = १८२ ÷ २७ = लब्धि ६, शेष २० अश्विनी से गणना करने पर बीसवां नक्षत्र पूर्वाषाढ़ है तथा इसके त्रिकोण नक्षत्रों भरणी व पूर्वाफाल्गुनी में जब गोचर से शनि व बृहस्पति आएंगे तो मृत्यु समय जानना चाहिए।

**प्रकारान्तर से मरण समय का ज्ञान :**

**किं कल्पतोऽन्तस्थफलैः प्रताडये-**
**त्पिण्डं तुरङ्गाश्विमितैर्विभाजयेत् ।**
**पिण्डं यदूर्ध्वं शतसम्मिताद्यदा**
**तस्माद् सुधीन्द्रः शतमेव शोधयेत् ॥५३॥**
**पिण्डमायुष उदीरितं ततो**
**वक्ष्यमाणविधिना प्रकल्पयेत् ।**

वेलिकां बुधवरोऽथवा दशा-
छिद्रकेषु मरणं विनिश्चितम् ॥५४॥

किमिति। पिण्डमिति च। किमथवाकल्पतो लग्नादन्तःस्थफलैरष्टमस्थरेखाभिः शोध्यपिण्डं प्रताडयेद् गुणयेत्। ततस्तुरंगाश्विमितैः सप्तविंशत्या विभाजयेत्। यल्लब्धं पिण्डं शतसम्मिताच्छततुल्याद् यदोर्ध्वमधिकं तस्माल्लब्धपिण्डात् सुधीन्द्र. पण्डितवरः शतमेव शोधयेत्। तदायुषो जीवितकालस्य पिण्डं वर्षवृन्दमुदीरितं कथितम्। ततस्माच्छोध्यावशिष्टपिण्डाद् वक्ष्यमाणविधिना समुदायाष्टकवर्गविधिना वेलिकां मृत्युसमयं प्रकल्पयेत् साधयेत्। अथवा दशाया विंशोत्तरी पूर्वायाश्छिद्रेषु दोषेषु मारकेशदशास्ति यावत्। मरणं निधनं विनिश्चितं ज्ञेयम्। तथा च ब्रह्मयामले—

'शोध्यादि गुणनं कृत्वा पिण्डं संस्थाप्य यत्नतः।
अष्टमस्थफलैर्हृत्वा सप्तविंशतिभाजितम्॥
शतादूर्ध्वं तु तत्पिण्डं शतमेव त्यजेत्ततः॥' इति

इह पाठान्तरम्—

शतादूर्ध्वं भवति चेच्छतमेव विशोधयेत्। इति
'आयुः पिण्डं विजानीयात्प्राग्वद्वेलां तु कल्पयेत्।
दशाच्छिद्र समायोगे मृत्युरेव न संशयः॥' इति

देवशालजातकेऽपि—

'पिण्डं संस्थाप्य गुणयेल्लग्नादष्टमगैः फलैः।
सप्तविंशतिहृच्छेषं मृत्युकालं वदेद्बुधः॥' इति

लग्न या शनि के अष्टक वर्ग में लग्न से अष्टम स्थान में स्थित राशि में जितनी रेखाएं हों, उनसे शनि के शोध्यपिण्ड को गुणा कर २७ से भाग देने से लब्धि 'वर्षादि पिण्ड' होती है। यदि लब्धि वर्षादि पिण्ड १०० से अधिक हो तो उनमें से १०० घटा लेना चाहिए। इस प्रकार शेष 'आयु पिण्ड' होगा। अब इस आयु पिण्ड से समुदायाष्टक वर्गायुर्दाय पद्धति के अनुसार स्पष्ट आयु का साधन करें। इस आयु समाप्ति पर मृत्यु समय जानना चाहिए अथवा दशा के दोषों से मृत्यु समय जानना चाहिए।

समुदायाष्टक वर्ग में आयुर्दाय का साधन आगे अष्टकवर्गायुर्दायाध्याय में बताया जा रहा है। इस प्रकार आयु का स्पष्ट साधन करना चाहिए। यह ग्रन्थकार का मत है। यही मत पण्डित देवशाल का

भी है। किन्तु **फलदीपिका** में मन्त्रेश्वर ने स्पष्ट कहा है कि आयु पिण्ड ही आयुमान है।

२७

'अष्टमस्थफलैर्लग्नात्पिण्डं हत्वा सुखैर्भजेत्।
फलमायुर्विजानीयात्प्राग्वद्वेलां तु कल्पयेत्॥"

(अष्टकवर्गाध्याय, श्लोक १५)

यदि उक्त पद्धति से जो आयुमान हो तथा तभी दशाच्छिद्र अर्थात् मारक दशा हो तो निश्चय से मृत्यु कहनी चाहिए।

अब इस विषय को पूर्वोक्त उदाहरण के संदर्भ में समझते हैं। यहां जन्म लग्न मेष है। मेष से अष्टम स्थान में वृश्चिक राशि है। शनि के अष्टक वर्ग में वृश्चिक राशि में फल १ है। शनि का शुद्ध पिण्ड १८२ है। दोनों को परस्पर गुणा किया तो १८२ गुणनफल है। इसे २७ से भाग दिया तो लब्धि ६ व शेष २० है। अतः ६ वर्ष हुए। शेष को मास बनाने के लिए १२ से गुणा किया २०×१२=२४०÷२७=लब्धि ८ मास, शेष २४ को पुनः ३० से गुणा किया—२४×३०=७२०÷२७ लब्धि २६ दिन। शेष १८ को ६० से गुणा किया १८×६०=१०८०÷२७=लब्धि ४० घड़ी। इस प्रकार आयु हुई ६ वर्ष, ८ मास, २६ दिन, ४० घड़ी। यह १०० से कम है। अतः यही आयु पिण्ड या आयु माना जाएगा।

यदि लग्न से अष्टम स्थान की रेखाएं लग्नाष्टक वर्ग से लेकर गुणा करें तो १८२×४ रेखा=७२८÷२७=२६ वर्ष, ११ मास, १६ दिन ४० घड़ी स्पष्टायु हुई। यहां भी मण्डल संस्कार (१०० घटाना) नहीं होगा। किन्तु दशाविचार से देखने पर उक्त अवस्था बीतने पर मारक दशा नहीं है। अतः मृत्यु नहीं होगी, केवल कष्ट होगा।

**मरण समय ज्ञान का तृतीय प्रकार :**

**समूलाष्टवर्गे फलं यत्र नास्ति**
**गृहे तत्र न स्यात्फलं तत्र याति।**
**यदा मन्दगस्तद्गृहे सूर्यसोमौ**
**भवेतां दशाच्छिद्रके मृत्युमाहुः॥५५॥**

समूलेति। समूलाष्टवर्गे पूर्वोक्त मन्दाष्टवर्गकेभ्यो मन्दाष्टवर्गं विरचय्य तत्र मन्दाष्टवर्गे यत्र यस्मिन् गृहेराशौ फलं रेखानास्ति तत्र फलमपि न स्यात्। यदा तत्र मन्दगः शनिर्याति तथा तद्गृहे तस्मिन्राशौ यदा सूर्यसोमौ रविचन्द्रावपि भवेतामागच्छेतां दशाछिद्रके मृत्युं मरणं बुधा आहुः। तथा च देवशालः—

'समूलाष्टकवर्गे च यत्र नास्ति फलं गृहे।
तत्र नास्ति फलं तत्र यदायाति शनैश्चरः।
तद्गृहे रविचन्द्रौ चेद्दशाच्छिद्रेमृतिं वदेत्॥' इति

शनि के अष्टक वर्ग में जिस राशि में रेखा न हो, उस राशि में गोचर से शनि, सूर्य व चन्द्रमा के आने पर मृत्यु जाननी चाहिए। साथ ही मारकेशादि ग्रहों की दशा का समन्वय भी कर लेना चाहिए।

मूल पाठ में मूलाष्टक वर्ग भिन्नाष्टक वर्ग का ही वाचक है।

**कारक ग्रहों का ज्ञान :**

**पिता पिङ्गलः शीतभानुः सवित्री**
**कुजः सोदरो ज्ञः सखा मातुलेयः।**
**गुरुर्ज्ञान पुण्यात्मजा भोऽबला त-**
**द्भ ऐनिर्मृतिं तत्र काले करोति॥५६॥**

पितेति। पिंगलः सूर्यः पिता, शीतभानुः सवित्री चन्द्रः माता, कुजः सोदरो भ्राता, ज्ञो बुधः सखा मित्रं मातुलेयो मातुर्भ्रातुरपत्यं, गुरुर्बृहस्पतिर्ज्ञानं मोक्षधीः पुण्यं धर्मः, आत्मजः पुत्रः, भः शुक्रोऽबला स्त्री, ज्ञेयेति शेषः। तद्भे तेषां नक्षत्रे तत्र काले समये ऐनिः शनि मृत्युं करोति। तथा च देवशालः—

'रविः पिता शशी माता भ्राता भौमो बुधः सुहृत्।
मातुलेयः स्मृतो जीवो ज्ञानपुण्ये सितः स्त्रियः॥
एषामृक्षे च तत्काले मरणं कुरुते शनिः॥' इति

सूर्य से पिता का विचार करना चाहिए। चन्द्रमा से माता, मंगल से भाई, बुध से मित्र एवं ममेरे भाई, गुरु से ज्ञान, पुण्य व पुत्र व शुक्र से स्त्री का विचार करना चाहिए।

जिस समय इन कारक ग्रहों के नक्षत्रों में गोचर से शनि आए तब तत्तत् सम्बन्धी लोगों की मृत्यु की सम्भावना होती है।

मन्दवैनाशिक नक्षत्रों का विचार :

भावानां ये कारका नाकपान्था-
स्तेषां शोध्योच्छिष्टकं यत्फलं तत् ।
भावस्थानैस्ताडितं भैर्विभक्ता-
दुच्छिष्टर्क्षं सङ्गते गोचरेण ॥५७॥
सञ्ज्ञासूनौ तस्य तातो जनित्री
भ्राता बन्धुर्नन्दनः स्त्री स्वयं च ।
तत्तुल्या वा नाशमायान्ति यद्वा
भूयिष्ठाया नाशहेतू रमायाः ॥५८॥

भावानामिति । संज्ञासूनाविति च । भावानां तन्वादीनां द्वादशानां ये कारकाः नाकपान्थाः ग्रहास्तेषां यच्छोध्योच्छिष्टकं त्रिकोणैकाधिपत्यशोध्यावशिष्टं फलं राशिग्रहयोगपिण्डं वा तद् भावानां स्थानै रेखाभिस्ताडितं गुणितं कार्यं, ततो भैः सप्तविंशत्या विभक्ताद् यदुच्छिष्टर्क्षं शेषनक्षत्रं तद् गोचरेण संगते प्राप्ते संज्ञासूनौ शनौ, तदा तस्य जातस्य तातः पिता, जनित्री माता, भ्राता सहोदरः, बन्धुः सगोत्रः, नन्दनः पुत्रः, स्त्री, स्वमात्मा वा तत्तुल्यास्तेषां तातादीनां तुल्याः समाना वा नाशं क्षयमायान्ति, यद्वा भूयिष्ठाया, प्रभूतायाः रमायाः लक्ष्म्या नाशहेतु-विनाशकारणं भवेदिति शेषः ।

पहले ग्रहों का कारकत्व बताया है। इसके अतिरिक्त जन्म कुण्डली के बारह भावों का कारकत्व भी सूर्यादि ग्रहों को प्राप्त है। तन्वादि भावों से जिन सम्बन्धियों का विचार किया जाता है उनके मरणकारक समय का विचार यहां बताया जा रहा है। मूल श्लोकों व संस्कृत टीका में विषय कुछ उलझ गया है, अतः स्पष्टतया समझाने का प्रयास करते हैं।

तन्वादि बारह भावों के जो कारक ग्रह हों, उनके शोध्यावशिष्ट फल व शोध्यपिण्ड को अभीष्ट भाव के रेखा योग से गुणा कर पूर्ववत् २७ का भाग देना चाहिए। तब जो शेष बचे उसके तुल्य संख्यक नक्षत्र में जब गोचर से शनि आए तब पिता, माता, भ्राता, पुत्र, स्त्री आदि की मृत्यु समझनी चाहिए अथवा पिता आदि के समकक्ष मनुष्यों की मृत्यु होती है। यदि उक्त सम्बन्धियों की मृत्यु सम्भव न हो तो उक्त समय में सम्पत्ति का अत्यधिक नाश होता है।

माना पिता का विचार हमें अभीष्ट है तो सूर्य पिता का कारक है। सूर्य से नवम पितृभाव माना जाएगा। अतः सूर्य के शोध्यावशिष्ट फल को सूर्य से नवमभावस्थ राशि की रेखाओं से गुणा किया जाएगा। यही पद्धति सब जगह अपनायी जाएगी। जैसे मातृकारक चन्द्र व चन्द्र से चतुर्थ भाव, भ्रातृ कारक मंगल तथा मंगल से तृतीय भाव, मित्र कारक बुध व बुध से चतुर्थ भाव इसी प्रकार गुरु से पंचम स्थान, शुक्र से सप्तम स्थान की रेखाओं से गुणा कर शेष किया जाएगा। अपनी मृत्यु का विचार शनि व शनि से अष्टम भाव के आधार पर किया जाता है। अब इस विषय को उदाहरण द्वारा स्पष्ट करने से पहले इनके नाम का अर्थ समझते हैं। सामान्यतः जन्म नक्षत्र से बाईसवां नक्षत्र 'वैनाशिक नक्षत्र' कहा गया है। प्रायः बाईसवां नक्षत्र चन्द्र से अष्टम भाव में पड़ता है। अतः विनाशक होने के कारण ये वैनाशिक कहलाते हैं। यहां शनि अर्थात् मन्द के संयोग से विनाशकारक होते हैं, अतः मन्दवैनाशिक नक्षत्र कहे जाते हैं। **काल प्रकाशिका में कहा गया है—**

"द्वाविंशं जन्मनक्षत्राद् वैनाशिकमिति स्मृतम्।
विनाशं कुरुते यस्मात् तस्मात् वैनाशिकं भवेत्॥"

अब पूर्वोक्त उदाहरण में पिता का विचार करना अभीष्ट है। वहां पितृकारक सूर्य कन्या राशि में है तथा सूर्य का शोध्यावशिष्ट फल १५ है। सूर्य से नवम राशि वृषभ में रेखायोग २ है। इनकी गुणा करने पर प्राप्त गुणनफल ३० को २७ से भाग देने पर शेप ३ बचा। अतः अश्विनी से तृतीय नक्षत्र कृत्तिका में जब शनि आएगा तो पितृ नाश होगा। शोध्यावशिष्ट फल का तात्पर्य त्रिकोण व एकाधिपत्य शोधन के पश्चात् बचे हुए फल से है। यथा सूर्य के फल का तात्पर्य शोधनानन्तर शेष सारी शुद्ध रेखाओं का योग है।

मातृकारक चन्द्रमा मकर में है। चन्द्र का शोध्यावशिष्ट फल १४ है। चन्द्रमा से चतुर्थ स्थान में ५ रेखाएं हैं। दोनों को परस्पर गुणा किया तथा शेष क्रिया की: १४×५=७०÷२७=२ लब्धि, शेष १६।

सोलहवें नक्षत्र विशाखा में शनि का गोचर मातृनाशक होगा।

भ्रातृ कारक मंगल मीन में है। शोध्यावशिष्ट फल १२ को भौम से तृतीय स्थान वृष के फल १ से गुणा कर शेष पूर्ववत् क्रिया की

तो शेष तुल्य बारहवें नक्षत्र उत्तरा फाल्गुनी में जब शनि गोचर करेगा तो भ्रातृ नाश होगा।

मित्र कारक वुध तुला राशि में है। शोध्यावशिष्ट फल ६ है। बुध से चतुर्थ भाव में फल ५ है। दोनों के गुणनफल ३० को २७ से भाग देने पर प्राप्त शेष ३ तुल्य कृत्तिका नक्षत्र में शनि होने पर मित्रादि को कष्ट होगा।

पुत्र कारक वृहस्पति कन्या में है। उसकी त्रिकोणैकाधिपत्य शोधन के बाद बची समस्त रेखाओं का योग (शोध्यावशिष्ट फल) ५ है। बृहस्पति से पंचम मकर राशि का फल ३ है। ५×३=१५÷२७=१५ शेष। अतः पन्द्रहवें नक्षत्र स्वाति में जब शनि होगा तो पुत्र को कष्ट होगा।

स्त्री कारक शुक्र तुला में है। शोध्यावशिष्ट फल योग २२ है। तुला से सप्तम राशि मेष का फल ४ है। अतः २२×४=८८÷२७= शेष ७ तुल्य नक्षत्र पुनर्वसु में शनि होगा तो स्त्री को कष्ट होगा।

मृत्यु कारक शनि मीन में है। शोध्यावशिष्ट फल योग १६ को मीन से अष्टम तुला के फल १ से गुणा कर २७ का भाग दिया तो शेष १६ तुल्य नक्षत्र विशाखा में शनि हो तो स्वयं की मृत्यु या मृत्यु तुल्य कष्ट होगा।

यहां तक त्रिकोण शोधन व एकाधिपत्य शोधन के बाद बची रेखाओं के समस्त योग के आधार पर कष्ट कारक समय का परिज्ञान कराया गया। अब द्वितीय प्रकार अर्थात् शोध्य पिण्ड के आधार पर कष्टकारक समय का ज्ञान करने का प्रकार समझाते हैं। इसकी व्युत्पत्ति के लिए इसी अध्याय का श्लोक १०-११ भी देखें।

राशि पिण्ड व ग्रह पिण्ड के योग से ज्ञात शोध्यपिण्ड को तत्तद् भाव के बिन्दुमान (अशुभ फल) से गुणा किया जाएगा। गुणनफल को १२ से भाग देकर शेष तुल्य राशि (नक्षत्र नहीं) या उससे त्रिकोण राशियों में शनि के जाने पर पिता आदि का कष्टकारक समय जाना जा सकेगा। शुभ फल (रेखा) को ८ में से घटाने पर शेष बिन्दुमान होता है।

सूर्य का शोध्य पिण्ड २४४×६ वृष बिन्दुमान=१४६४÷१२=लब्धि १२२, शेष ०। अतः शून्य अर्थात् मीन राशि व मीन से

त्रिकोण कर्क वृश्चिक राशि में शनि होगा तो पितृ कष्ट होगा।

चन्द्र शोध्य पिण्ड १०७×मेष बिन्दु ३=३२१÷१२=लब्धि २६ शेष ९। अतः धनु, मेष व सिंह के शनि में मातृ कष्ट होगा।

भौम शोध्य पिण्ड १९१×वृष बिन्दु ७=१३३७÷१२=१११ लब्धि, शेष ५। अतः सिंह, मेष व धनु के शनि में भ्रातृ कष्ट होगा।

बुध शोध्य पिण्ड ६२×मकर विन्दु ३=१८६÷१२=लब्धि १५, शेष ६। अतः कन्या, मकर व वृष के शनि में मित्र व मातुलेय को कष्ट होगा।

गुरु का शोध्य पिण्ड ५८×मकर विन्दु ५=२९०÷१२= लब्धि २४, शेष २। अतः वृष, कन्या व मकर में जव शनि गोचर करेगा तव पुत्र को कष्ट होगा।

शुक्र शोध्य पिण्ड १८३×मेष बिन्दु ४=७३२÷१२=६१ लब्धि, शेष ०। अतः मीन, कर्क व वृश्चिक का शनि स्त्री के लिए कष्टप्रद होगा।

शनि शोध्य पिण्ड १८२×वृश्चिक विन्दु ७=१२७४÷१२= लब्धि १०६ शेष २। अतः वृषभ, कन्या व मकर के शनि में स्वयं को कष्ट होगा।

यदि उक्त समय में तत्तत् सम्वन्धियों को कष्ट की सम्भावना न हो तो सम्पत्ति का नाश होगा।

**निर्बल ग्रह का फल :**

**अदभ्रहीना जनने विहङ्गा**
**भवन्ति ये जन्मभृतां च तेषाम्।**
**फलानि यानि प्रथमोदितानी-**
**तराणि मन्दस्य फलं प्रतीपम्॥५९॥**

अदभ्रेति। जन्मभृतां प्राणिनां, जनने जन्मनि ये विहंगा ग्रहा अदभ्रहीनाः प्रभूतविबलाः भवन्ति जायन्ते तेषां ग्रहाणां यानि फलानि शुभाशुभात्मकानि प्रथमोदितानिपूर्वोक्तानि तानीतराणि भिन्नानि स्युरिति शेषः। मन्दस्य शनेः फलं प्रतीपं विपरीतं ज्ञेयम्। तथा च देवशालः—

'बहुहीना ग्रहा ये स्युर्जन्मकाले नृणां सदा।
ग्रहोक्तफलभिन्नाः स्युर्विपरीतं शनेः फलम्॥' इति

मनुष्य के जन्म समय जो ग्रह बहुत निर्बल हों, उनका पूर्वोक्त फल विपरीत होगा। अर्थात् अन्यथा प्राप्त शुभ फल अशुभ में व अशुभ फल शुभ में परिणत हो जाएगा।

किन्तु शनि के विषय में विपरीत समझना चाहिए। यदि शनि निर्बल हो तो शुभ फल व बली हो तो अशुभ फल होगा।

**अपने-अपने अष्टक वर्ग से विचार आवश्यक :**

**स्वस्वाष्टवर्गेषु विहङ्गमोक्त-**
**फलं मनीषी कथयेदजस्रम्।**
**तस्मिन् दशा ज्ञातुमृतेऽष्टवर्गा-**
**न्न शक्यते ज्यौतिषिकैः प्रवीणैः॥६०॥**

स्वस्वेति। स्वस्वाष्टवर्गेषु निजनिजाष्टकवर्गेषु पूर्वविरचितेषु रेखाष्टकवर्गेषु विहंगमानां ग्रहाणां यदुक्तं फलं तदस्रं नित्यं मनीषी विद्वान् कथयेत्। अष्टवर्गाद् अष्टकवर्गं ऋते विना तस्मिन् तत्र दशा अवस्था विंशोत्तरी पूर्वा वा ज्ञातुं प्रवीणैश्चतुरैर्न शक्यते। तथा च देवशालः—

'स्वेषु स्वेष्वष्टवर्गेषु ग्रहोक्तफलमादिशेत्।
अष्टवर्गादृते तस्मिन् दशा ज्ञातुं न शक्यते॥' इति

शुभाशुभ फल का विचार अपने-अपने अष्टक वर्ग के आधार पर ही किया जाएगा। कारण यह है कि अष्टक वर्ग के ज्ञान के बिना मनुष्य के जीवन की अवस्थाएं (उतार-चढ़ाव) या विंशोत्तरी आदि दशाओं का सटीक फल नहीं जाना जा सकता।

[इति श्रीमत्पण्डितमुकुन्ददैवज्ञविरचितेऽष्टकवर्गमहानिबन्धे पं० सुरेशमिश्रकृतायां 'मञ्जुलाक्षरायां' हिन्दी व्याख्यायां ग्रहजन्याष्टकवर्गफलाध्याय पंचमोऽवसितः।]

# ६

# भावजन्याष्टकवर्गफलाध्याय

**भावों के विचारणीय विषय :**

**सञ्चिन्तयेत्संहननं च सम्पदं**
**देहप्रमाणं हरिजे विचक्षणः।**
**सौभाग्यसत्यद्रविणानि वित्तभे**
**सोत्थे स्वरं विक्रमसत्त्वसोदरान् ॥१॥**

संचिन्तयेदिति। विचक्षणः पण्डितः, हरिजे लग्ने संहननं शरीरं, सम्पदं विभवं देहस्य प्रमाणं मानं संचिन्तयेत्। तथा च देवशालः—

मूर्तौ शरीरसम्पत्तिसांगोपांगविचिन्तनम्। इति

सौभाग्येति। वित्तभे धनस्थाने सौभाग्यं सत्यमृतं द्रविणं धनमेतानिसर्वाणि संचिन्तयेत्।

सोत्थ इति। सोत्थे तृतीये स्वरं गानशब्दं, विक्रमोऽतिशक्तिता, सत्वंबलं सोदरो भ्राता एतान् सर्वान् संचिन्तयेद् विचारयेत्। तथा च देवशालः—

'सत्यसौभाग्यवित्तं च द्वितीयस्थानतो विदुः।
स्वरं सत्त्वं विक्रमं च भ्रातृस्थानं तृतीयकम्॥' इति

लग्न से शरीर शोभा, वैभव, देह का परिमाण आदि देखा जाता है। धनस्थान से सुन्दर भाग्य, सत्यभाषण और धन सम्पत्ति देखनी चाहिए।

तृतीय स्थान से स्वर, पराक्रम, बल व भाइयों का विचार करना चाहिए।

**जले जनित्रीसुखबन्धुमन्दिरं**
**मनौ स्वभावं मतिमंत्रनन्दनान्।**

**निरीक्षयेज्ज्ञातिरिपुक्षतान्यरौ**

**स्मरे प्रवासं प्रमदासुखं विदुः ॥२॥**

जल इति। जले चतुर्थे जनित्री माता, सुखं, बन्धुः, मन्दिरं गृहं, एतत्सर्वं निरीक्षपेत्। मताविति। मतौ पंचमे स्वभावं शीलं, मतिर्बुद्धिः, मंत्रोमारण-मोहनादि, नन्दनः पुत्रः एतान्सर्वान् विलोकयेत्। तथा च देवशालः—

सुखबन्धु गृहं चैव मातृचिन्ता चतुर्थतः।
स्वभावं बुद्धिविस्तारं पुत्रस्थानं तु पंचमम् ॥' इति

ज्ञातीति। अरौ षष्ठे, ज्ञातिः सगोत्रः, रिपुः, क्षतं व्रणं ऐतानि विलोकयेत्। स्मर इति। स्मरे सप्तमभावे प्रवासं दूरदेशवासं, प्रमदायाः स्त्रियाः सुखं विदुर्जानन्ति। तथा च देवशालः—

ज्ञाति शत्रुक्षतादीनि शत्रुस्थानान्निरीक्षयेत्।
प्रवासं दारसौभाग्यं सप्तमस्थानतो विदुः ॥' इति

चतुर्थ स्थान से माता, सुख, बन्धुबान्धव, मित्र तथा मकान वाहनादि का विचार करना चाहिए।

पंचम स्थान से स्वभाव, विद्या, बुद्धि, मंत्र शक्ति व पुत्रादि का विचार करना चाहिए।

षष्ठ स्थान से बिरादरी (ज्ञाति जन), शत्रु, घाव व रोगादि का विचार करना चाहिए।

सप्तम स्थान से प्रवास, स्त्री सुख व कामोपभोगादि का विचार करना चाहिए।

**निमीलने नाशगदाधिपञ्चता**

**विधौ विधिं पुण्यगुरु अथाम्बरे।**

**अवर्षणं वर्षणकं यशः कुपं**

**प्रतापवार्त्ताशुचिकर्मपौरुषम् ॥३॥**

निमीलन इति। निमीलनेऽष्टमे, नाशः पलायनं, गदो रोगः आधिर्मानसी-व्यथा, पंचता मृत्युरेतत्सर्वं विलोकयेत्। विधावीति। विधौ नवमे विधिं भाग्यं पुण्यं धर्मं गुरुमेतत्सर्वं विचिन्तयेत्। यथाऽत्र देवशालः—

'आधिव्याधी मृतिं नाशमष्टमे परि चक्षते।
भाग्यस्थानं गुरुस्थानं धर्मस्थानं च तद् विदुः ॥' इति

अथेति। अथेत्यानन्तर्ये, अम्बरे दशमेऽवर्षणमवृष्टिः, वृष्टिः, यशः, कुषो

भूपतिः, प्रतापः प्रभावः, वार्ता जीविका, शुचिः शुद्धाचरणं, कर्म सदसत्कृत्यं पौरुषं पुरुषार्थमेतसत्र्वं विलोकयेत्। तथा च देवशालः—

कर्माजीवं तु दशमे प्रतापं पौरुषं शुचिम्।
कीर्ति क्षमापति तत्र वृष्ट्यवृष्टि निरूपणम्॥' इति

अष्टम स्थान से पलायन, रोग, मानसिक बीमारियां व मृत्यु का विचार किया जाता है।

नवम स्थान से भाग्य, गुरु व धर्म का विचार करना चाहिए।

दशम भाव से वर्षा की कमी, सूखा या अतिवृष्टि, कीर्ति, मान, भूस्वामित्व, प्रभाव, जीविका, सदाचार, अच्छे-बुरे काम और पुरुषार्थ का विचार करना चाहिए।

**भवे विभूतिं द्रविणस्य लाभं**
**विनिर्दिशेद्बुद्धिसहायगेहे ।**
**व्ययं समस्तं दुरितं स्मृतिं च**
**शरीरनाशं निगदेद्विपश्चित् ॥४॥**

भव इति। भव एकादशे विभूतिमैश्वर्यं, द्रविणस्य धनस्य लाभं, प्राप्तिं विनिर्दिशेत्कथयेद् दैवज्ञ इति शेषः। बुद्धीति। बुद्धिसहायगेहे द्वादश स्थाने समस्तं सम्पूर्णं शुभाशुभं, व्ययं विगमभवगमं वा, दुरितं पापं, स्मृतिं चिन्ता, शरीरस्य देहस्य नाशं मरणं विपश्चिद् विद्वान् निगदेत्। तथा च देवशालः—

ऐश्वर्यमर्थलाभं च एकादश गृहात् फलम्।
द्वादशं च व्ययस्थानं पापस्थानं प्रचक्षते॥
शरीरनाशदेहं च चिन्तास्थानं विनिर्दिशेत्॥ इति

एकादश स्थान से ऐश्वर्य, आय व धनागम का विचार करना चाहिए।

व्यय स्थान से सब प्रकार के व्यय (हानि व खर्च) का विचार करना चाहिए। साथ ही पापाचार, चिन्ता व देह की हानि का भी विचार द्वादश भाव से ही किया जाएगा।

भावों के कारकत्व व हानि वृद्धि का विस्तृत व प्रामाणिक विचार हमारी **भावमंजरी** नामक पुस्तक में किया गया है।

**भावों की वृद्धि व हानि :**

**भावेष्विति द्वादशसु प्रचिन्तयेद्**
**भावाः सपापाः क्षयतां व्रजन्ति ते।**
**ते सिद्धिदा ये सहिताः शुभग्रहै-**
**र्मिश्रान्विता मिश्रफलप्रदा मताः ॥५॥**

भावेष्विति। इत्येवं द्वादशसु भावेषु विचारणीयवस्तुनि प्रचिन्तयेद् विचारयेत्। ये भावाः सपापाः पापसहितास्ते क्षयतां व्रजन्ति। ये भावः शुभग्रहैर-पापबुधचन्द्रगुरुशुक्रैः सहितास्ते सिद्धिदाः शुभफलदाः स्युः ये भावाः मिश्रैः शुभाशुभरूपग्रहैरन्विता युक्तास्ते मिश्रफलप्रदाः। मता ज्ञेयाः। तथा च देवशालः—

'एवं द्वादशभावेषु चिन्तयेन्मतिमान्नरः।
पापान्वितास्तु ये भावास्ते भावाः नाशतां ययुः॥
सौम्याः सिद्धिकरा ज्ञेया मिश्रा मिश्रफलप्रदाः॥' इति

पूर्वोक्त प्रकार से भावों के कारकत्व (विचारणीय पदार्थों) का विद्वानों को विचार करना चाहिए।

जिन भावों में पापग्रह स्थित हों, वे भाव अपना फल नष्ट कर देते हैं। इसके विपरीत जिन भावों में शुभ ग्रह स्थित हों वे भाव सिद्धि-दायक होते हैं। मिश्रित ग्रहों से युक्त भावों का फल भी शुभाशुभ मिश्रित ही होता है।

यहां भावों की हानि व वृद्धि का सामान्य विचार बताया गया है। सामान्यतः शुभग्रह वृद्धिप्रद व पापग्रह हानिप्रद होते हैं। यदि अशुभ भावों में (६,८,१२) पापग्रह हों तो वे उन भावों की हानि करते हैं। यह हानि अभीष्ट होती है। अर्थात् वे क्रमशः रोग, मृत्यु व व्यय की हानि करने के कारण शुभ फलप्रद ही अन्यथावृत्या माने जाएंगे। इसी कारण केन्द्र त्रिकोणादि में शुभग्रह व पाप भावों में अशुभ ग्रह अन्ततोगत्वा शुभ फलप्रद ही माने जाते हैं। यही बात ग्रन्थकार आगे के श्लोकों में बता रहे हैं।

**त्रिकादिभावगत ग्रहों का फल :**

**पुण्यपापविहगैस्त्रिकयातै-**
**स्तत्फलं निगदितं विपरीतम्।**

**पामरोऽपि कुरुते शुभतां स्व-**
**मित्रतुङ्गगृहगोऽथ शुभोऽपि ॥६॥**
**मूढनिम्नरिपुमन्दिरयातः**
**क्रूरतां प्रकुरुते त्रिकपः सन् ।**
**तुङ्गगोऽप्यशुभदोऽथ खलोऽपि**
**स्वोच्चगः सुगृहपः शुभकर्त्ता ॥७॥**

पुण्येति । मूढेति च । त्रिकयातैः षष्ठाष्टमद्वादशयातैः पुण्यपापत्रिहगैः ग्रहैः क्रमेण तत्फलं विपरीतं शुभानामशुभफलं पापानां च शुभफलमित्यर्थः । निगदितं कथितं बुधैरिति शेषः ।

पामर इति । पामरः पापग्रहोऽपि स्वमित्रतुंगगृहगो निजराशौ, मित्रराशौ, स्वोच्चराशौ वा स्थितः सन् शुभतां कुरुते । अथ शुभोऽपि सौम्यग्रहोऽपि मूढोऽस्तगतः, निम्नो नीचराशिगतः, रिपुमन्दिरयातः शत्रुराशिगतः, सन् क्रूरतां दुष्टतां प्रकुरुते विधत्ते । तथा च देवशालः—

'षष्ठाष्टमव्ययस्थैश्च विपरीतं शुभाशुभैः ।
मित्रोच्चभवनस्थश्चेत्पापोऽपि शुभमृच्छति ।
अरिनीचगतोमूढः शुभोऽपि क्रूरतामियात् ॥' इति

त्रिकप इति । सन् शुभग्रहस्तुंगगो निजोच्चराशि गतः सन् त्रिकपो दुष्टस्थानस्वामी अस्ति चेत्तदा अशुभदोऽशुभफलकर्त्ता भवेदिति शेषः । खलःपापग्रहोऽपि यदि स्वोच्चगः सुगृहपस्त्रिकेतरस्थानाधिपः स्यात्तदा शुभकर्त्ता भवेत् । यथा श्रुतकीर्ति—

ईषत्सुहृत्स्वोच्चभृदिष्टदृष्टो, मित्रर्क्षजन्मोपचये बलीयान् ।
योजातकेऽभूत्सतु जन्मसंस्थो दद्याच्छुभं न त्वशुभोऽप्यनिष्टम् ॥
अपचयराशौ नीचे शत्रुक्षेत्रे च जन्मकाले स्यात् ।
यस्तु स दद्यात्पापं फलमपि शुभदो यथाकालम् ॥ इति

